PRAUḌHADEVARĀYA'S

BRAHMASŪTRAVṚTTI

प्रौढदेवरायविरचिता

ब्रह्मसूत्रवृत्तिः

General Editor

VIDVAN DR. H. P. MALLEDEVARU, M.A., Ph.D.

Editor

VIDVAN K. S. VARADACHARYA

ORIENTAL RESEARCH INSTITUTE, MYSORE

1982

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES No. 136

मैसूरु विश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमाला—१३६

BRAHMASŪTRAVṚTTI

OF

SRI PRAUḌHA DEVĀRAYA

श्रीप्रौढदेवरायविरचिता

ब्रह्मसूत्रवृत्तिः

ORIENTAL RESEARCH INSTITUTE, MYSORE.

प्राच्यविद्यासंशोधनालयः मैसूरु

1982

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES No. 136

मैसूरु विश्वविद्यानिलयः

प्राच्यविद्यासंशोधनालयग्रन्थमाला—१३६

BRAHMASŪTRAVṚTTI

OF

SRI PRAUḌHA DEVĀRAYA

श्रीप्रौढदेवरायविरचिता

ब्रह्मसूत्रवृत्तिः

ORIENTAL RESEARCH INSTITUTE, MYSORE.

प्राच्यविद्यासंशोधनालयः मैसूरु

1982

First Edition 1982

Price: Rs. 24-00

Published By:

The Oriental Research Institute,
University of Mysore, Mysore.

Printed at:

Bhaskara Printers, Geethamandiram Road, Mysore-1.

UNIVERSITY OF MYSORE

ORIENTAL RESEARCH INSTITUTE SERIES

General Editor :

Vidvan **Dr. H. P. Malledevaru,** M.A., Ph.D.

Director :

Oriental Research Institute, Mysore and Professor and Head. Department of P. G. Studies and Research in Sanskrit, Manasagangotri, Mysore.

ORIENTAL RESEARCH INSTITUTE, MYSORE.

1982

प्राच्यविद्यासंशोधनालयग्रन्थमाला—१३६

श्रीप्रौढदेवरायविरचिता

ब्रह्मसूत्रवृत्तिः

BRAHMASŪTRAVṚTTI
OF
SRI PRAUḌHADEVARĀYA

संपादकः

के. एस्. वरदाचार्यः

प्राचीननवीनन्याय–वेदान्तविद्वान्

संशोधनसहायकः

प्राच्यविद्यासंशोधनालयः, मैसूरु.

Critically Edited by:

Vidvan, K. S. Varadacharya
Senior Research Assistant,
Oriental Research Institute, Mysore.

प्राच्यविद्यासंशोधनालयः

ORIENTAL RESEARCH INSTITUTE, MYSORE
1982

FOREWARD

It is a matter of pleasure and pride that we are able to present to the world of learning an important work on Vedanta, viz., the 'Brahmasutravṛtti' of Prauḍhadevarāya. This work, the magnum opus of a great king, was hitherto unpublished. The Oriental Research Institute has the rare privilege of bringing this precious work into light. There is no doubt that this will be welcomed by all scholars interested in philosophy, and particularly in Advaitavedānta.

Bhāratavarṣa, the sacred land now called India, has given birth to numerous thinkers, logicians and philosophers. Ṛṣis of lore discovered Truth and reality by their power of concentration and their revelations are manifested in the Upaniṣads. Bādarāyaṇa wrote the aphorisms of Vedānta (Brahmasutra) to systemetise the thoughts of the Upaniṣads. The teachings of the Upaniṣads were collected and presented in poetic form in the Bhagavadgītā. These three (namely, Upaniṣads, Bhagavadgītā and Brahmasutras) are together called 'Prasthāna-traya' and form the bedrock of Indian Philosophy. The sutras of Bādarāyaṇa are lucid and clear, but are also open to many interpretations, which are often different and sometimes opposed to one another. Thus we have the Dvaita (Dualism) interpretation by Madhva and the Advaita (Monism) interpretation by Śaṅkara both claiming to lay bare the real and true heart of the Brahmasutras. Besides these two diametrically

opposite schools, there are many other commentaries on the same sutras of Bādarāyaṇa by illustrious intellectual giants like Bhāskara, Rāmānuja, Vallabha, Srikaṇṭha, Sripatipaṇḍita etc. Each of these Ācāryas has propounded in his own way of understanding the import of the upaniṣads and the sutras of Bādarāyaṇa. Each has his own followers who wrote valuable commentaries, subcommentaries and independent treatises to support and defend the tenets of their school. In this way, Vedāntaśāstra has grown and developed abundantly, receiving impetus from time to time at the hands of great thinkers.

The Advaita school : Gauḍapāda In his Māṇḍukyakārikās has attempted to establish the main tenets of Advaita. Śaṅkara appears on the scene later as the most celebrated philosopher of India. He has to his credit many voluminous works, the most important among them being the Brahmasutrabhāṣya, Upaniṣad bhāṣyas and the Gītābhāṣya. These commentaries on the Prasthānatraya made Advaita one of the most influential systems of Indian philosophy. The Brahmasutrabhāṣya, especially has always attracted the attention of many a genius. Hence the great sub-commentaries like the Bhāmatī of Vācaspatimiśra, Ratnaprabhā of Dharmasuri, Pañcapādikā of Padmapāda etc. on it. The Bhāmati of Vācaspatimiśra itself has commentaries and subcommentaries on it (Kalpataru and Parimala respectively) while the Pañcapādikā has a famous commentary called Vivaraṇa. *Bhamati* and *Vivarana* differ considerably from each other on many essential

points as a result of which there have been two streams of Advaita, as it were. It appears that followers of the Vivaraṇa school are in larger numbers.

Prauḍhadevaraya :

The author of the Vṛtti on Brahmasutras, now being published is Prauḍhadevarāya II. He ruled over the Vijayanagar empire in the second quarter of the fifteenth cen. A. D. (1424–46).

The Kings of Vijayanagar were not only benevolent patrons of literature and art, but also were great scholars themselves. Prauḍhadevarāya II (who is also known as Immaḍi Devaraya, Abhinava Vira and Pratāpadevarāya) bore the epithet *Gajabentekara* (Hunter of elephants). He deserves to be reckoned among the great monarchs of Karnataka and of South India both as a consummate politician and a courageous military genius. But from our point of view, he is more to be reckoned as a patron of learning and a man of letters. Cāmarasa and Kumāravyāsa were the two great Kannada poets that adorned the court of Prauḍhadevarāya. The Telugu poet Srīnātha was the recipient of the highest honour viz., *Kanakabhisheka* at the hands of this great monarch.[1] In short, Prauḍhadevarāya can be compared to Bhoja of Dhārā.

---

1. A History of Karanataka ed. by Dr. P. B. Desai, Kannada Research Institute, Karnataka University, Dharwar, 1970, pp 356-57.

The Vritti :

The language and style of Prauḍhadevarāya's work are clear, lucid and perspicuous. He often refers to and supports Brahmājnānavāda and śābdāparokṣa. Hence it is possible to assert that he belongs to the Vivaraṇa school. The Vṛtti is neither too elaborate nor too concise. It elucidates many knotty points of Advaita philosophy and helps even novices in the field to grasp the essential teachings of this school. Thus Prauḍhadevarāya has rendered a precious service to the world of scholars by his lucid and very valuable Vṛtti on 'Brahmasutras'.

Panditaratnam Vidvan Sri. K. S. Varadacharya has taken considerable pains to prepare this edition. It is based on a single manuscript preserved in our Institute. The palm-leaf manuscript (No. p. 4950) is written in the Nandināgari script and contains 86 folios. There are some lacunae which have been filled up in this edition with the Brahmasutra Vṛtti of Sadāśivabrahmendra.

The editor's deep knowledge of Indian philosophy and his mastery on Sanskrit have come to his help in deciding many readings which are difficult to decipher in the original manuscript. His acumen in elucidating the knotty points of Advaita exegesis is evident in his notes and Sanskrit introduction.

I should mention here the good and expeditious work of Sri. S. Chandrashekar, proprietor of Bhaskar Printers, Mysore. It is a pleasant duty

to acknowledge the kind cooperation of the members of the Syndicate of the University of Mysore, and the Advisory Committee of the Oriental Reasearch Institute in publishing rare Sanskrit works.

Our beloved Vice Chancellor Prof K. S. Hegde and Registrar Sri N. R. Venkatesh are extending their timely help and encouragement for the research work and publications of our Institute. I take this opportunity to express our sincere gratitude to them and assure that the Institute will strive hard to bring out many more valuable works.

H. P. Malledevaru
Director

भूमिका

[जगदुपादानं किम्?]

विविधविचित्ररचनस्यास्य स्थूलस्य विश्वस्य मूलमन्वेष्टुं प्रवृत्ता दार्शनिकाः आरम्भवादः, सङ्घातवादः, परिणामवादः, विवर्तवादः, शून्यवादश्चेति बहुविधान् वादानातिष्ठन्ते। तत्र सूक्ष्मैः परमाणुभिरिदं जगत् नूतनतयाऽऽरभ्यत इति आरम्भवादः नैयायिकानाम्। परमाणुसङ्घातरूपमिदं जगदिति सङ्घातवादो वैभाषिकाणाम्। उपादानसमसत्ताकान्यथाभावरूपपरिणामरूपमिदं जगदिति परिणामवादः सांख्यादीनाम्। उपादानविषमसत्ताकान्यथाभावरूपविवर्तरूपमिति विवर्तवादः वेदान्तिप्रमुखानाम्। अनिर्वचनीयमेव जगतो मूलमिति शून्यवादः माध्यमिकानाम्॥

[परिणामविवर्तयोः स्वरूपम्]

उपादानसमसत्ताकान्यथाभावः परिणामः, उपादानविषमसत्ताकान्यथाभावो विवर्त इति शास्त्रमर्यादा। अयं भावः—सत्यत्वं त्रिविधं—प्रातिभासिकं व्यावहारिकं पारमार्थिकमिति। कालत्रयाबाध्यं ब्रह्मैकमेव पारमार्थिकसत्यम्। व्यवहारकालाबाध्यत्वरूपव्यावहारिकसत्यत्ववत् परिदृश्यमानं जगत्। शुक्तौ रजतादेः, रज्जौ सर्पादेर्वा यदा प्रतिभासः, तदा तस्यापि सत्यतयैव भासमानत्वात् प्रातिभासिकं सत्यं रज्जुसर्पादीति संग्रहः॥

उपादानोपादेययोः सत्यत्वं यदा समं तदा परिणामः, यथा मृद्घटयोः। तत्र मृदोऽपि व्यावहारिकं सत्यत्वं, घटस्यापि व्यावहारिकं सत्यत्वमिति उभयोः सत्यत्वं समानम्। अतः मृदः परिणामो घटः। रज्जौ सर्पप्रतीतिकाले रज्जौ व्यावहारिकं सत्यत्वं, सर्पे तु प्रातिभासिकं सत्यत्वमिति उभयोः सत्यत्वस्य विषमत्वात् रज्जुविवर्तभूतः सर्पः॥

एवं जगतः उपादानभूतं ब्रह्म पारमार्थिकसत्यं, उपादेयं तु जगत् व्यावहारिकसत्यम् । अतः जगत् ब्रह्मणो विवर्तरूपं, न परिणामरूपम् ॥

[विवर्तवादः त्रिविधः]

अयं च विवर्तवादः—ब्रह्मविवर्तवादः, विज्ञानविवर्तवादः, शब्दविवर्तवादः, शून्यविवर्तवादश्चेति चतुर्विधः । आद्यः ब्रह्मवादिनां श्रीशङ्कराचार्याणाम्, द्वितीयः विज्ञानवादिनां वसुबन्धुप्रभृतीना योगाचाराणाम्, तृतीयः शाब्दिकानां भर्तृहरिप्रमुखानाम्, चतुर्थः माध्यमिकाना बौद्धानाम् ॥

[विमर्शनीयं तत्त्वम्]

इदमत्र विमर्शनीयं निर्मत्सरैः—जगतस्सत्यत्वमातिष्ठमानैरितरैरपि सत्यपदं ब्रह्मणि यादृशतात्पर्येण प्रयुज्यते, तेनैव तात्पर्येण न तत्पदं जगति प्रयोक्तुं शक्यम्, प्रयुज्यते वा । 'सत्यं ज्ञानमनन्तं ब्रह्म'[1] इत्यादौ परस्मिन् ब्रह्मणि यादृशमर्थमाधाय 'सत्य'पदं प्रयुज्यते, न तादृशमर्थमाधाय 'जगत् सत्यम्' इति जगत्सत्यत्ववादिभिरपि प्रयोक्तुं शक्यते । 'सत्यपदं निरुपाधिकसत्तायोगि ब्रह्म ह, तेन विकारास्पदमचेतनं, तत्संसृष्टश्चेतनश्च व्यावृत्तः । नामान्तरभजनार्हावस्थान्तरयोगेन तयोर्निरुपाधिकसत्तायोगविरहात्[2] — इति श्रीभाष्यम् । एवञ्च सततनिर्विकारत्ववाचकं सत्यपदं ब्रह्मण्येव संपूर्णार्थकम् । तदर्थमादाय 'जगत् सत्यम्' इति वक्तुं न शक्यमेव । एतादृशदृष्ट्या तु जगत् असत्यमेव ॥

[वस्तुतत्त्वं किम् ?]

वयं तु मन्यामहे—सत्यत्वं नाम स्वदेशकालाबाध्यत्वमेव न तु त्रिकालाबाध्यत्वम् । अत एव प्रतिभासिकसत्यं, व्यावहारिकसत्यं पारमार्थिक

---

[1] तै. आ. 1. [2] श्रीभाष्य (रामानुजभाष्यम्) 1–1–2.

सत्यं इति सर्वत्र सत्यपदं अविशेषेण प्रयुज्यते । तत्तद्देशकालावच्छिन्नस्वरूपं सत्यत्वं त्रिष्वपि समानम् । एवञ्च सत्यत्वं महत्त्वादिवत् आपेक्षिकमित्यायातम् । घटादावपेक्षिकमहत्त्ववति 'महानयं' इति प्रयोगः यथा साधुः, स्वरसश्च, तथा 'जगत् सत्यम्' इति प्रयोगोऽपि साधुरेव, स्वरसश्च । एवं व्यावहारिकसत्यत्वदृष्ट्या प्रातिभासिकस्य सर्पादेः यथा असत्यत्वं, तथा पारमार्थिकसत्यब्रह्मदृष्ट्या व्यावहारिकजगतः असत्यत्वमपि वक्तुं शक्यमेव । अतश्च जगत्सत्यतावादः, जगदसत्यतावादश्च एतावन्तमर्थमादायैव प्रवृत्तौ ॥

[सत्यत्वं तरतमभावापन्नमेव]

अपरश्चात्र कश्चनांशोऽवधेयः । 'ब्रह्म पारमार्थिकसत्यं' इत्यत्र सर्वातिशय (Superlative) वाचि 'परम' पदं वर्तते । तेन सत्यं, सत्यतरं, सत्यतमं इति त्रैविध्य (Positive, Comparitive and Superlative) मपि सिद्ध्यति । रज्जुसर्पादिकं सत्यं, जगत् सत्यतरं, ब्रह्म सत्यतमं—परमार्थसत्यं इति जगतः सत्यत्वं, असत्यत्वं च दृष्टिभेदेन भवत्येव । रज्जुसर्पादेः कथं सत्यत्वमिति चेत्; सन्तु नामैते विचाराः, महाग्रन्थसाध्यः खल्वयम् । रज्जुसर्पादिकं प्रातिभासिकसत्यमिति तु संप्रतिपन्नमेव । अलं तावदेवात्रत्यार्थनिर्णयाय ॥

[ब्रह्मण एव परमार्थत्वम्]

अन्यच्च—परमः अर्थः—पुरुषार्थः ब्रह्मैवेति सर्ववेदान्तिनां सम्मतम् । तद्दृष्ट्या च जगत् न परमः अर्थः—पुरुषार्थभूतम् । जगतः हेयत्वं खलु सर्वसम्मतम् ।

अतः जगत् अपरमार्थम्, ब्रह्मैव परमार्थमिति युक्तमेव ॥

जगन्मिथ्यात्ववादोऽपि एतादृशाशयेनैव प्रवृत्तः ॥

[शब्दानां मर्यादा]

सर्वस्यापि पदस्य काचन मर्यादा वर्तते। तस्या उल्लंघने वा, संकोचने वा तत्पदं अपार्थं=अपहृतार्थमेव भवति। यथा 'बहुज्ञोऽयं पण्डितः' इत्यत्र प्रयुक्तस्य बहुज्ञपदस्य सर्वज्ञत्वं नार्थः, नापि बालाद्यपेक्षया बहुज्ञत्वम्। किन्तु तत्रोक्तस्य बहुत्वस्य काचन पूर्वावधिः, काचन उत्तरावधिश्च वर्तते। अन्यतरावधेरुल्लंघने तत्पदं अपार्थकं=अविवक्षितार्थकमेव भवेत्. अतः यावती अर्थव्याप्तिः पदस्य विवक्षिता, तावतीं व्याप्तिमादायैव शब्दस्यार्थोऽवधेयः। एवमेव 'सत्य'पदस्यापि तत्र तत्र काचन मर्यादा वर्तते। तद्दशमर्यादा अवधार्यैवार्थोऽपि निर्णेयः। अतः जगन्मिथ्यात्ववादे वा जगत्सत्यत्ववादे वा नातीवाग्रहिभिर्भवितव्यमिति भावयामः॥

यद्यप्येतदुपरि बह्व्यः शङ्काः समङ्कुरेयुः, बहुदूरं आन्तं गन्तुं शक्यं च; अथापि ग्रन्थविस्तरभिया बीजरूपतयेदं प्रस्तुत्य प्रकृतमुपसरामः॥

[ब्रह्मसूत्रभाष्यं, तत्र प्रस्थानद्वयं च]

तमिमं विवर्तवादमवलम्ब्य श्रीमद्भिः शङ्करभगवत्पादैः ब्रह्मसूत्राणां विस्तृतं भाष्यं व्यरचि। तद्व्याख्यातृवर्गे तु विवरणप्रस्थानं, भामतीप्रस्थानं चेति प्रस्थानद्वयं प्रावर्तत। विवरणप्रस्थानस्य प्रवर्तकः विवरणकार इति नाम्ना प्रसिद्धः प्रकाशात्मा। शाङ्करब्रह्मसूत्रभाष्यस्य तच्छिष्यैरेव सुरेश्वरैः विरचितमेकं व्याख्यानं पञ्चपादिकेति। तस्य विवरणं प्रकाशात्मविरचितम्। अतस्स विवरणकार इति प्रथामवाप। भामतीप्रस्थानं च षड्दर्शनटीकाकारेण वाचस्पतिमिश्रेण प्रवर्तितम्। ब्रह्मसूत्रभाष्यस्य तेन कृतं भामतीनामकं व्याख्यानमाश्रित्य प्रवृत्तत्वात् तस्य तथा प्रसिद्धिः॥

[भामतीविवरणप्रस्थानयोर्वैषम्यम्]

अनयोः प्रस्थानयोस्तु मुख्यो भेदः—

विवरणम्	भामती
१) ब्रह्मैवा विद्याश्रयः (अयमेव ब्रह्माज्ञानवादः)	जीव एवाविद्याश्रयः (अयमेव जीवाज्ञानवादः)
२) मोक्षहेतुभूतं ब्रह्मापरोक्षं शब्दजन्यम् (अयमेव शाब्दापरोक्षवादः)	अपरोक्षं ज्ञानं मानसम् (अयमेव मानसापरोक्षवादः)
३) मनः नेन्द्रियम्	मनः इन्द्रियम् ।

इत्यादीनि ॥

अनयोः विवरणप्रस्थानमेव बहुलं प्रचारे वर्तते बहुधा पण्डितैः पोषितं च ॥

[प्रस्थानभेदानामधिकारिभेदेन सार्थक्यम्]

सर्वाज्ञ त्मुनिस्तु—(३. २४० & २-८९)

'कृ णमध्यमपक्वधियां नृणां मतिविलासविधात्रितयं क्रमात् ।
परिणतिर्बहुजीवतमस्विता परमपुंसि तमः परिकल्पना'[1]

इति वदन् परिणामवादस्य मन्दाधिकारिकत्वं, जीवाज्ञानवादस्य मध्याधिकारिकत्वं, ब्रह्माज्ञानवादस्य उत्तमाधिकारिकत्वं च व्यवस्थापयति । मधुसूदनसरस्वतिरपि ब्रह्माज्ञान वाद एव दृष्टिसृष्टिवादापरपर्यायः मुख्यवेदान्तिपक्ष इति सर्वज्ञात्माशयं पोषयति[2] ॥

---

1 संक्षेपशारीरकं–126·

2 सिद्धान्तबिन्दुः-पु. 86

[अधिकार्यनुगुणमुपदेशभेद आवश्यकः]

त्रिविधोऽप्ययं वादः आचार्याणां ग्रन्थेषु तत्र तत्रोपलभ्यते । एतेषु मन्दाः के ? मध्यमाः के ? उत्तमाः के ? इति व्यक्तिविषये न केनापि विवदितव्यम्, यतः प्रायः सर्वेऽपि मन्दा एव, मध्यमास्तु विरलाः, उत्तमास्तु !

परन्तु—परस्परविरुद्धतया भासमानानिमान् वादान् कथं आचार्यपादाः प्रवर्तयामासुः ? ये बौद्धमतनिराकरणावसरे 'बाह्यार्थ-विज्ञान-शून्य-वादत्रयमिदं इतरेतरविरुद्धमुपदिशता सुगतेन स्पष्टीकृतमात्मनोऽसंबद्धप्रलापित्वम् । प्रद्वेषो वा प्रजासु विरुद्धार्थप्रतिपत्त्या विमुह्येयुरिमाः प्रजाः' इत्युद्घोषयन्ति—इतिशङ्काङ्कणं सहजमेव । परन्तु प्रामाणिकमाचार्यपादाशयं बहुग्रन्थसाध्यं प्रकरणान्तरे परिशीलयामः ॥

[ब्रह्मसूत्रवृत्तिः]

प्रकृता चेयं ब्रह्मसूत्रवृत्तिः प्रौढदेवराजविरचिता विवरणप्रस्थानमाश्रित्य प्रवृत्तेति तत्र तत्र ब्रह्माज्ञानवाद[1]शाब्दापरोक्षवादा[2]दिप्रतिपादनेन सुस्पष्टमेवावगम्यते । अतिविस्तृतं ब्रह्मसूत्रसागरं प्रविविक्षूणां कर्णधारायमाणा नातिविस्तृता, नातिसंक्षिप्ता चेयं ब्रह्मसूत्रवृत्तिः महदुपकुर्यादित्यत्र न संशयः । परन्तु खेदस्थानमिदं, यत् एकैव मातृका इयमुपलब्धा, या मध्ये तत्र तत्र द्वित्रपत्रैर्लुप्ता चेति । तद्दशस्थलं चागत्या सदाशिवब्रह्मेन्द्रवृत्त्या पूरितम् ॥

[द्वितीयप्रौढदेवरायः]

एतद्ग्रन्थकर्ता च विजयनगरसाम्राज्याभिषिक्तः द्वितीयः प्रौढदेवरा इति तत्तत्पादाध्यायान्तेषु दृश्यमानया पुष्पिकयाऽवगम्यते । स चात्मानं

---

[1] प्रकृतब्रह्मसूत्रवृत्तिः 1-1-1. [2] प्रकृतब्रह्मसूत्रवृत्तिः–4-1-2.

गजमृगयाधिराजं वर्णयति। शासनेषु[1] च 'गजबेंटगार' इति देशभाषयाऽयं निर्दिश्यते। तस्य च कालः शासनवशादेव क्रैस्तः १४४६ शतकरूप इति निश्चप्रचमेव ॥

[उपसंहारः]

सेयं वृत्तिः सरलया शैल्या ग्रथिता, अथापिगम्भीरा, पण्डितमण्डली-श्लाघ्या चेति यथावस्थितकथनमेव नूनम्। अत एव सर्वजनादरपात्रं भूयादित्याशास्महे ॥

३१-१२-१९६९ के. एस् वरदाचार्यः

---

[1] V. R. Vol. II. P. 861.

—शास्त्रप्रवृत्तिक्रमः—

'अङ्गानि वेदाश्चत्वारो मीमांसान्यायविस्तरः। पुराणं धर्मशास्त्रं च विद्या ह्येताश्चतुर्दश' इति चतुर्दशविद्यास्थानान्यभिहितानि महर्षिभिः। तत्र च मीमांसा कर्ममीमांसा, ब्रह्ममीमांसा चेति द्विविधा। प्रकृतमिदं शारीरकमीमांसाशास्त्रमेव ब्रह्ममीमांसेत्युच्यते। इदं च चतुरध्यायात्मकम्। एकैकेऽप्यध्याये चत्वारः पादाः॥

अध्यायचतुष्टयेऽपि आद्याध्यायद्वयं सिद्धब्रह्मपरम्। उत्तरद्वयं साध्योपासनापरम्। आद्याध्यायद्वयेऽपि आद्यः अध्यायः उपनिषदां ब्रह्मणि समन्वयपरः। द्वितीयश्च तस्मिन् विरोधपरिहारपरः। द्वितीयद्विके आद्यः तृतीयः उपासनापरः, चतुर्थश्च फलपरः। आहत्यैवं पादादिभेदेन विषयव्यवस्था—

प्रथमाध्यायः—समन्वयाध्यायः।

प्रथमपादः—स्पष्टब्रह्मलिङ्गकपादः।

द्वितीयः—अस्पष्टलिङ्गकोपास्यब्रह्मपरः।

तृतीयः—अस्पष्टलिङ्गकज्ञेयब्रह्मपरः।

चतुर्थः—अव्यक्तच्छयानुसारिवाक्यविषयकः।

द्वितीयाध्यायः—अविरोधाध्यायः।

प्रथमपादः—स्मृतितर्कपरः।

द्वितीयः—परपक्षनिराकरणपरः।

तृतीयः—वियदादिविचारपरः।

चतुर्थः—प्राणादिविचारपरः।

तृतीयाध्यायः—साधनाध्यायः ।

प्रथमपादः—वैराग्यपादः ।

द्वितीयः—विवेकपादः ।

तृतीयः—सगुणविद्यागुणोपसंहारपादः ।

चतुर्थः—अङ्गपादः ।

चतुर्थाध्यायः—फलाध्यायः ।

प्रथमपादः—जीवन्मुक्तिपादः ।

द्वितीयः—उत्क्रान्तिपादः ।

तृतीयः—गतिक्रमपादः ।

चतुर्थः—मुक्तिपादः ।

— प्रौढदेवरायविरचिता ब्रह्मसूत्रवृत्तिः —

विषयानुक्रमणिका

प्रथमाध्यायः—समन्वयाध्यायः

[प्रथमपादः—स्पष्टब्रह्मलिङ्गपादः]

द्वितीयाध्यायः—अविरोधाध्यायः

[प्रथमपादः—स्मृतितर्कपादः]

क्रमसंख्या | पृष्ठसंख्या

[द्वितीयाध्याये द्वितीयपादः—परपक्षनिराकरणपादः]

———

[द्वितीयाध्यायचतुर्थपादः—प्राणपादः]

———

तृतीयाध्यायः—साधनाध्यायः

[प्रथमपादः—वैराग्यपादः]

[तृतीयाध्यायतृतीयपादः—गुणोपसंहारपादः]

[तृतीयाध्यायचतुर्थपादः—अङ्गपादः]

चतुर्थाध्यायः—फलाध्यायः

[प्रथमपादः—साधनशेषपादः]

——०——

ब्रह्मसूत्रवृत्तिः

॥ श्रीः ॥

॥ श्री महागणपतये नमः ॥

पम्पाभिधाना

ब्रह्मसूत्रवृत्तिः

प्रौढदेवराजविरचिता

प्रथमाध्यायः

प्रथमः पादः

[जिज्ञासाधिकरणम्]

वागीशाद्याः सुमनसः सर्वार्थानामुपक्रमे ।
यं नत्वा कृतकृत्याः स्युः तं नमामि गजाननम् ॥

स्थित्युद्भवप्रविलया जगतो यतः स्युः
यं प्राहुरेकमजमव्ययमद्वितीयम् ।
तं हेमकूटनिलयं सुरराजवन्द्यं
* . . . . ॥

. . . . . भवानीपतिमव्ययम् ।
विरूपाक्षं महादेवं प्रत्यगात्मानमाश्रये ॥

---

* मातृकायां गलितो भागः

यद्वाप्यामृतपानेन जरामरणवर्जितम् ।
पदं याता हि विबुधाः शङ्करं नौमि तं गुरुम् ।।

अनुष्ठितधर्म* विदलितान्तःकरणस्याधिकारिणः पुरुषस्य 'तरति शोकमात्मवित्' (छा-७-१-३) 'ब्रह्म वेद ब्रह्मैव भवति' (मु- ३-२-९) इत्यादिवेदान्तवाक्येषु संशयो भवति—किमेतानि वेदान्तवाक्यानि सकलानर्थनिवृत्तिद्वारेण परमसुखस्वरूपब्रह्मात्मैकत्वलक्षणमोक्षप्रवृत्तिसाधनज्ञानायारम्भणीयानि ? उत न ? इति ।।

तत्र देहेन्द्रियादिप्रपञ्चस्य जीवेश्वरत्वजगदाकृतिभेदस्य च सत्यत्वेनात्मवत् ज्ञानेन निवृत्त्ययोगात् देहेन्द्रियादेर्विषयादेनात्मनो विषयिणश्चात्मनः स्वयंप्रकाशस्य तमःप्रकाशवत् भेदेन प्रतीयमानत्वादात्मन्यध्यस्तत्वानुपपत्त्यः मिथ्यात्वायोगात् तन्निवृत्तिसाधनब्रह्मात्मैकत्वज्ञानाय नारम्भणीयमिति तदर्थनिर्णायकं शारीरकमीमांसाशास्त्रमपि नारम्भणीयमिति प्राप्ते— सिद्धान्तः—

१. अथातो ब्रह्मजिज्ञासा-१-१-१

अथ—नित्यानित्यवस्तुविवेकादिसाधनचतुष्टयसंपत्त्यनन्तरं, यस्मात् वेद एव 'तद्यथेह कर्मचितो लोकः क्षीयते एवमेवामुत्र पुण्यचितो लोकः क्षीयते' (छा. ८-१-६) इत्यादिः कर्मणामनित्यफलतां दर्शयति 'ब्रह्मविदाप्नोति परम्' (तै-आ. १-१) इति ब्रह्मज्ञानात् परमपुरुषार्थप्राप्तिमपि दर्शयति, अत एवेहामुत्रफलभोगवैराग्योपपत्तेः शमदमादिसाधनसंभवाच्च मोक्षसाधनब्रह्मज्ञानायारब्धवेदान्तवाक्यविचारः कर्तव्यः ।।

कर्मानुष्ठानशुद्धान्तःकरणस्य ब्रह्मज्ञानेच्छायाः स्वयमेव जातत्वात्, वस्त्वधीनत्वे च कर्तुमशक्यत्वात् ज्ञानस्य च प्रमाणाधीनत्वेन पुरुषानधीनत्वात्

---

* विदलितान्तःकरणकषायस्येति युक्तम् ।।

न ज्ञानतदिच्छयोः कर्तव्यत्वविधिः । तस्मात् ज्ञानेच्छयोरन्तर्नीतो विचार इह ज्ञानसाधनं कर्तव्यत्वेन विधीयते ॥

'तं त्वौपनिषदं पृच्छामि' (बृ-३-९-२६) इत्यादावुपनिषद्वाक्यविचारस्य ब्रह्मज्ञानहेतुत्वमवगतम्, न षोडशपदार्थविचारादेरिति ब्रह्मपदसन्निधेरवगम्यते ॥

किञ्च 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-५-६, ४-५-६) इति ज्ञानमनूद्य तत्साधनत्वेन वेदान्तानां ब्रह्मणि तात्पर्यावधारणं नाम श्रवणं विधीयते 'श्रोतव्यो मन्तव्यो निदिध्यासितव्यो मैत्रेयि' (बृ. २-५-६, ४-५-६) इति । मनननिदिध्यासनयोरपरोक्षज्ञानसाधनश्रवणं प्रति फलोपकारित्वं चेह विवक्षितम् । श्रवणस्यापरोक्षज्ञानं प्रति मुख्यसाधनत्वं तृतीये निपुणतरमुपपादयिष्यते ॥

यथा ज्योतिष्टोमादिवाक्ये*ऽर्थादपूर्वप्रतिपत्तिः, तथा 'तरति शोकमात्मवित्' (छा. ७-१-३) इत्यादिवाक्येऽप्यर्थान्मिथ्यात्वं शोकादीनां देहेन्द्रियादिप्रपञ्चस्य च जीवेश्वरत्वजगदाकृतिभेदस्य च प्रतीयत एव ॥

ननु सत्यस्यापि शास्त्रप्रामाण्यान्निवृत्तिः सिद्ध्यति । न चात्मनिवृत्तिप्रसङ्गः, तस्य शास्त्रेण निवृत्त्यप्रतिपादनात्—उच्यते—'आख्यातानामर्थं प्रतिपादयतां शक्तिः सहकारिणी' इति न्यायात् सत्यस्य सर्पादेः क्रियया विना ज्ञानेन निवृत्त्ययोगात्, रज्ज्वाद्यारोपितसर्पादेरधिष्ठानयाथात्म्यज्ञानेन निवृत्तिदर्शनात् इहापि भेदप्रपञ्चेनाध्यारोपितेन भवितव्यम्, अन्यथा

---

* अर्थात्—आशुतरविनाशिनां कर्मणां कालान्तरभाविफलान्यथाऽनुपपत्तिरूपार्थापत्तेः इत्यर्थः ॥

प्रपञ्चनिवृत्तिप्रतिपादनशास्त्रं अनर्थकं स्यात्। न हि कृष्णलानां श्रपणं शास्त्रविहितमिति पुरुषेण कर्तुं शक्यं तण्डुलादिश्रपणवत् ॥

किञ्च 'वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्' (छा. ६-१-३) इति स्वयमेव विस्पष्टं, यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवतीति-प्रतिज्ञासिद्ध्यर्थं रज्वामिव सर्पत्रसनवत् कार्यप्रपञ्चस्य प्रत्यग्ब्रह्मणि कारणे घटादीनामिव मृदादिषु कल्पितत्वं दर्शयतीति चारम्भणाधिकरणे वक्ष्यते। इह च नित्यमुक्तशुद्धबुद्धाद्वयं सर्वदा संस्फुरत्येव प्रत्यग्ब्रह्मास्तीति ॥

एतदेव च विषयीकृत्य गुहादिगततमोवदनादिभावरूपं मूलाज्ञानम्। तदेवावरणशक्तियोगात् आच्छाद्य, विभ्रमशक्तियोगाच्च जीवेश्वरत्वजगदाकृतिभेदं मृषैव विक्षिपति। अस्य च पूर्वसिद्धस्य पश्चात्सिद्धो जीवो नाश्रयः विषयो वा भवितुमर्हति। कस्तर्हि? प्रत्यगात्मैवाज्ञो ज्ञानी च यथाऽऽहुः—

'आश्रयत्वविषयत्वभागिनी निर्विभागचितिरेव केवला।
पूर्वसिद्धतमसो *हि पश्चिमो नाश्रयो भवति नापि गोचरः'
(सं-शा-१-३१९) इति ॥

न च जीवस्याप्यनादित्वात् प्रत्यग्ब्रह्मवत् पूर्वसिद्धत्वमस्तीति वाच्यम्; अनादित्वाविशेषेऽपि मूलाज्ञानस्य जीवभावात्पूर्वसिद्धत्वस्यावश्यापेक्षणात्, यथा जगतो जन्मादीनां अनादिसंसारान्तर्भूतानामपि जन्मन एव पूर्वसिद्धत्वं, जन्मना लब्धात्मकस्य स्थितिप्रलयसंभवात्। आछादनविक्षेपलक्षणकार्यद्वय-दर्शनात् अज्ञानस्य तस्य शक्तिद्वयमेव कल्प्यम्। उक्तं च—

---

* 'न पश्चिमः' इति मातृकायां पाठः। अथाप्यौचित्यात् प्रसिद्धेश्च एवं निवेशितम्।

'आच्छाद्य विक्षिपति संस्फुरदात्मरूपम्' (सं-शा-१-२०) इति ॥

एवंविधं साभासं प्रत्यग्ब्रह्माज्ञानं सकलसंसारानर्थकारणमिति 'तद्धेदं तर्ह्यव्याकृतमासीत् तन्नामरूपाभ्यां व्याक्रियत' (बृ १-४-७) इत्यादिश्रुतिरेव दर्शयति। सगुणज्ञानकर्माख्यं साधनं हिरण्यगर्भान्तफलं अविद्यापट-संवीतज्ञानचक्षुषामविद्यासिद्धकर्त्रादिकारकापेक्षं 'इषे त्वा' (तै.सं. १.१.१) इत्यादिश्रुत्या व्याख्यातम्। यज्जगत्तस्य संसारस्य बीजावस्थायां प्रत्यगवि-द्येति वक्तुं इदं वाक्यम् * ॥

अक्षरार्थस्तु—अज्ञातात्मैकसंसिद्धं बीजावस्थमेवेदं जगत् परोक्षार्था-भिधायिना तच्छब्देनोच्यते। अव्याकृतस्य जगतः यः भूतकालाभि-सम्बन्धः, तस्य सुखावबोधनाय हेति निपातः प्रयुज्यते। नामरूपादि-विकृतं पराक्त्वैकगोचरं सहस्रभेदभिन्नं प्रत्यक्षादिसिद्धमिदमित्युच्यते। तदिदं-पदयोस्सामानाधिकरण्येन चानादिकलितः कार्यकारणभेदो निराकृतः। यतो वैश्वरूप्येण प्रथममविद्यैव सर्वदा वर्तत इति अविद्यामात्रयाथात्म्यात् न कारणव्यतिरेकेण कार्यसद्भावः। तर्हीति नामरूपाद्यभिव्यक्तेः प्राक्तनः काल उच्यते। अव्याकृतशब्देनानभिव्यक्तमुच्यते। मिथ्याज्ञानकर्म-संस्काराणां आकाशादिभूतसूक्ष्माणां च भोक्तुर्जीवात्मनश्च मूलकारणे साभासप्रत्यगज्ञाने विलीनानां त्वस्तितामात्रमव्यक्तशब्दार्थः। तन्मूलकारणे विलीनं जगत् नामरूपाभ्यामेव व्याक्रियत—अभिव्यक्तमभूदिति तन्नाम-रूपाभ्यां व्याक्रियतेत्यस्यार्थः ॥

जगत् नामरूपाभ्यामेवाभिव्यक्तं, न स्वरूपेण प्रत्यगात्मना; शुक्तिरिव रजतरूपेणेत्येवकारार्थः। इह च †अव्यक्तशब्देनाज्ञातप्रत्यग्ब्रह्मणः

---

* 'तद्धेदं' इत्यादिवाक्यमित्यर्थः

† 'अव्याकृत' शब्देनेति युक्तम्। अथवा अव्याकृतशब्दस्य अव्यक्तशब्देन स्वयं विवरणात् तथोक्तिः। एवमुत्तरत्रापि ॥

प्रतिपादनात् अज्ञानं *प्रतीच्येव स्थितं, नात्मनि ; प्रत्यगात्मव्यतिरेकेणान्यस्य 'अज्ञोऽस्मि' इत्यनुभवायोगात् । अतः विषयोऽपि स एव, यस्मात्प्रत्यग्ब्रह्मैवाज्ञातम् । तद्बोधकमेव प्रमाणं, नान्यत् ।।

ननु ! तर्हि प्रत्यगात्मैवाज्ञात इति प्रत्यक्षादेरपि तत्रैव प्रवृत्तेः आत्मनः सिद्धत्वात् वेदान्तश्रवणं व्यर्थमिति — उच्यते — क्रियाकारकरूपं खल्वस्मिन् संसारव्यवहारे मूलाज्ञानस्य सर्वत्रान्वयादक्रियाकारकं वस्तु पारोक्ष्यात् प्रत्यक्षादिषु मानफलत्वेन प्रतीयमानमपि न लभ्यते । न च क्रियाकारके जगति वस्तु न लभ्यत इति तदन्यत्र जगतसद्भावात् अद्वैतभङ्गप्रसङ्ग इति वाच्यम् — यतो रज्वामिव पन्नगवत् प्रत्यगात्मन्येव समारोपितं सदसत्त्वाभ्यामनिर्वचनीयं ब्रह्मात्मैकत्वज्ञानात् अज्ञानविलये रज्जुस्वरूपपरिज्ञानात् पन्नग इव विलीयते । संसाराख्यमहाव्याधेः किं मूलमित्याकांक्षायां प्रत्यग्ब्रह्माज्ञानं श्रुत्योक्तम् । ततश्च तद्ध्वस्तिहेतुज्ञानाय वेदान्तवाक्यविचारचिकित्सा फलवती भवेत् ।।

किञ्च लोकेऽपि योऽपि ह्यहमेवंविध इत्यविदित्वा परदारादौ प्रवर्तते, सोऽनर्थं प्राप्नुवन् दृश्यत इति प्रत्यगात्माज्ञानमनर्थकारणं सिद्धम् । तदुक्तम्—

'यतो मूलमनर्थानां आत्माज्ञानं जगत्यपि' इति ।।

न च नाज्ञातं ब्रह्म संसारकारणम्, निवृत्तेऽप्यज्ञाने संसारदर्शनादिति वाच्यम् ; यतोऽशेषानर्थमूलस्याज्ञानस्य विध्वस्तौ पुनर्नानर्थावकाशः । तथा च श्रुतिः—

---

* प्रतीचि—प्रत्यग्वस्तुनि, अहमर्थ इति यावत् ॥

'भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः ।
क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे '
(मु-२-२-८) इति ॥

ननु ! एवमपि प्रत्यगात्मन्यव्यक्तशब्देनाज्ञातत्वविवक्षा न संभवति, आत्मने प्रमात्रादेविभागासंभवेन प्रमाणेनाज्ञातत्वासिद्धेः—उच्यते—यद्यपि विधुताशेषसम्बन्धं अनन्यानुभवात्मकं कूटस्थसंवित्स्वभावकं ब्रह्मात्मस्वरूपं सर्वदाऽतिरोहितज्ञानस्वरूपं सदाऽनस्तमितं निरवद्यं च—तथापि अविद्यापेक्षया ज्ञातत्वं संभवति । तत्तु तद्वास्तवं स्वतः संभवति । अहमहमित्यादिस्वानुभवमात्रेणाज्ञातत्वं प्रमाणाभावेऽपि सिद्धयति । यथाऽऽहुः—

'स्वानुभूत्यनुसारेण यथोक्तार्थोऽवसीयताम् ।
मानहेत्वतिवर्तित्वात् नेह मानादिसंभवः ' इति ॥

न च प्रत्यगात्मनः स्वयंप्रकाशत्वात् कथमज्ञानसंभव इति वाच्यम्, अपहतध्वान्तेऽप्यात्मन्यनुभवबलेनाज्ञानकल्पनात् । 'न वेद्मि' इति स्वानुभूतिरपि प्रत्यगात्मावबोधपर्यन्ता । तदुक्तं—

'स्वानुभूतिर्न वेद्मीति प्रागैकात्म्यप्रबोधनात् ' इति ।

*स्वयंप्रभेऽप्यज्ञानं चेत् सहस्रकिरण इव तमः, कथं तर्हि तन्निवृत्तिः ? उच्यते—ज्ञातात्मतत्त्वस्य प्रत्यगात्मनि त्रिकालं तदसंभवावगमात् तन्निवृत्त्युपपत्तेः । असङ्गस्यापि अज्ञानसङ्गतिरविचारितसिद्धिका भवति, अन्वयव्यतिरेकाभ्यामज्ञानासिद्धेरसंभवात् । यदा त्वज्ञातत्वस्यान्वयव्यतिरेकाभ्यां प्रमाणेनानवगतिः, तदा न तदैकात्म्यस्वरूपेण गम्यत इति दूरतो निरस्तम् ॥

---

* स्वयंप्रभे स्वप्रकाशे

ननु ! 'तद्धेदं' इतिवाक्यादेव प्रमाणादज्ञातत्वं साधितम् । *तदानीं तु न प्रमाणसिद्धमिति वदतः पूर्वापरविरोधप्रसङ्ग इति—नैष दोषः—उक्तानुभवसिद्धाज्ञातत्वस्य श्रुत्याऽनुवादमात्रस्य कृतत्वात् । अनुवादश्च प्रत्यगात्मन एव प्रमाणयोग्यतोपपादनायाज्ञानानुभवस्य साध्यासिकत्व इत्युक्तम् ॥

किञ्च अज्ञानस्य मानघटनायोग्यत्वाच्च न प्रमाणसिद्धता । प्रमाणसिद्धत्वे तत्त्वमस्यादिप्रमाणेन तन्निवृत्त्ययोगप्रसङ्गात् । तदेवं नित्यशुद्धोऽद्वयः प्रत्यगात्मा । स एवाज्ञातो ज्ञानी च । तद्बलादेव तदुभयस्फुरणम्, न प्रमाणबलादिति सिद्धम् ॥

एवमाच्छादकत्वे सिद्धे तस्य विक्षेपशक्तिविकारोऽपि कथ्यते । तस्मादज्ञानात् समष्टिरूपः प्रपञ्चो जायते । स च सूक्ष्मस्थूलभेदेन द्विविधो भवति । अपञ्चीकृतपञ्चमहाभूतानि तत्कार्यात्मकसप्तदशकं लिङ्गात्मकं सूक्ष्मशरीरं एकः प्रपञ्चः । पञ्चीकृतपञ्चमहाभूतानि तत्कार्यात्मकं स्थूलं शरीरं वैराजमपरः । द्विविधेनोपाधिना प्रपञ्चेन व्यष्टिरूपेणाहितभेदद्वयैक्याध्यासात् अहं कर्ता भोक्तेत्याद्यविस्पष्टभ्रान्तयो भवन्ति । भ्रान्तत्वादेव तन्निदानाज्ञानावृतत्वेन स्वरूपास्फुरणात् जीवः, जगत्, परमेश्वर इति †भेदादद्वये प्रत्यगात्मनि कल्पयति । उक्तं च—

'स्वाज्ञानकल्पितजगत्परमेश्वरत्व-
जीवत्वभेदकलुषीकृतभूमभावा ।
स्वाभाविकस्वमहिमस्थितिरस्तमोहा
प्रत्यक्चितिर्विजयते भुवनैकयोनिः'

(सं. शा. १-२) इति ॥

---

* तदानीं—सृष्टेः पूर्वं ; तदानीं प्रमाणप्रमेयादिविभागाभावादित्यर्थः ॥
† भेदात् अद्वये इति पदच्छेदः ॥

ब्रह्मैव संसरति, ब्रह्मैव विमुच्यत इत्येतदपि विस्पष्टम्* । 'ब्रह्म वा इदमग्र आसीत् । तदात्मानमेवावेदहं ब्रह्मास्मीति तस्मात्तत्सर्वमभवत्' (बृ. १-४-११) इत्यादिश्रुत्योक्तम् ॥

अस्यास्त्वयमर्थः—अग्रे–ब्रह्मात्मावबोधात् प्राक् ब्रह्मैवाज्ञानात् संसार्यासीत् । तत्—संसार्यवस्थं ब्रह्म आत्मानमेवावेत्—आत्मानमेव ब्रह्मेत्यबोधि । तस्मात् तत्सर्वमभवत्—यस्मात् तद्ब्रह्म देशकालवस्तुस्वरूप-रहितमासीत्, तस्मात् तद्ब्रह्म सर्वमभवदिति ॥

अत्र च नित्यशुद्धाद्वयप्रत्यगात्मा मूलकारणाविद्योपाधिकः परमेश्वरो जगत्कारणं तत्पदवाच्यश्च । ब्रह्मादिस्तम्बपर्यन्तं यत् कार्यं जगत्, तदुपाधिकः प्रत्यगात्मा जीवः त्वंपदवाच्यः । तदुक्तं श्रुत्यैव 'स एष इह प्रविष्टः' (बृ. १-४-७) इति ॥

अस्यास्त्वयमर्थः—'तद्धेदं' इत्यत्र प्रकृतोऽज्ञातः सर्वात्मा स इत्युच्यते । यश्च नामरूपादिसर्जने परमेश्वरसंज्ञकः कारणतां गतः, स एष एवाद्वयो जीवो ब्रह्मादिस्तम्बपर्यन्तेषु कार्येषु प्रविष्ट इति । उक्तमाचार्यैरपि—

'सूत्रादिस्तम्बपर्यन्तं जगत्सृष्ट्वाऽऽत्ममायया ।
स्वाभासैकसहायात्मा तदेव प्राविशद्धरिः' इति ॥

अस्य वार्तिकस्यायमर्थः—हरिः–प्रत्यगात्मा सूत्रादिस्तम्बपर्यन्तं—विराड्बुद्धिमनश्चक्षुरादीन्द्रियशरीरस्थाणुपर्यन्तं जगत् स्वमायया सृष्ट्वा, †स्वाभासैकसहायात्मा तत्सूत्रादिकं जगत् प्राविशदिति । एषु सूत्रादिषु प्रविष्टस्य परमात्मनः प्रत्यक्त्वादसङ्गत्वाच्च न पराचीनसूत्रत्वाद्युपाधिसम्बन्धः ।

---

* बृहदारण्यभाष्ये स्पष्टं आचार्यैस्तथोक्तिः ॥

† अधिष्ठानभानस्य भ्रमहेतुत्वादेवमुक्तिः ॥

कथं तर्हि तस्य प्रपञ्चसाक्षित्वमुच्यते? साक्षित्वमप्यज्ञानकल्पितम्। यथा स्थाणावज्ञानमादाय चोरादीक्षणम्। तथाऽज्ञानेन विनाऽऽत्मेक्षणासंभवात्, तथा तत्पदवाच्यपरमेश्वरत्वान्तर्यामित्वकारणत्वादिकं अज्ञानकल्पितम्। प्रत्यग्ब्रह्मणोऽज्ञानवशात् किमपि न दुष्करमिति स्वस्यैव संसारित्वमध्यस्यम्, असंसारित्वं स्वभाविकं चेत्य विरुद्धम्। असंसारित्वं स्वाभाविकं यथाऽनीलमेव नीलत्वेन प्रतीयते, संसारित्वस्याविद्याकृतत्वात् तथा नित्यमुक्तशुद्धस्यासंसारित्वं गगनं स्वत एवेति न्याय्यम्॥

ननु! एवमपि न प्रत्यगात्मनो बुद्ध्यादिषु प्रवेशः संभवति, अनवच्छिन्नस्यनोर्निर्विभागवस्तुनः पूर्वस्थानवियोगेन प्रवेशासंभवात्। 'दिव्यो ह्यमूर्तः पुरुषः' (मु. २-१-२) इत्यादिश्रुतिप्रामाण्यात् परिच्छिन्नत्वमपि तस्य न घटते॥

किञ्च बीजफलयोरिवावयवावयविभावाभावात् फले बीजवत् न प्रवेशः। पाषाणादौ सर्वगतभूतानां †क्रिमिसर्पादीनां सर्पादिपरिणामसभवात् सर्पादीनां प्रवेशो घटते। स्रष्टुः रूपान्तरमनापन्नस्यैव कार्यप्रवेशश्रवणात् पाषाणसर्पप्रवेशसदृशः प्रवेशो न संभवति। न च 'एष सर्वेश्वरः' (बृ. ४-४-२२) इत्यादिश्रुतिसिद्धस्वतन्त्रस्य परतन्त्रगुणस्येव द्रव्ये प्रवेशः संभवति। बुद्ध्यादौ परमात्मनो निरवयवस्य संयोगविभागासंभवात् न तेष्वस्य प्रतिबिम्बभावोऽपि सभवति। तस्मात् सर्वप्रकारप्रवेशासंभवात् परस्मादन्यो जीव इह परिच्छिन्नः प्रविष्ट इति॥

अत्रोच्यते—'तत्सृष्ट्वा। तदेवानुप्राविशत्' (तै. आ-६) इत्यादिश्रुतौ स्रष्टृप्रविष्टोरेकत्वावगमात् न परस्मादन्यस्य प्रवेशः संभवति।

---

† क्रिमिसर्पाः—कृमिरूपः सर्पाः॥

अविद्यायां तदुत्पादितसूत्राद्युपाधिषु च, सूर्यादीनामिव जलपात्रादिषु प्रतिबिम्बवत्. प्रवेशोऽपि संभवत्येव ॥

संयोगाद्यभावात् तदसंभव इति तु न युक्तं — सुषुप्तौ भोक्तृत्वादिविलक्षणात् बिम्बात् जलपात्रोद्भाविताद्भानोरिव दिविस्थस्य स्थानभेदसंभवात् । आविद्यके संबन्धसंभावाच्च । प्रतिबिम्बस्थानीयाज्जीवात् बिम्बस्थानीयब्रह्मणोऽविद्याकृतव्यतिरेकोऽपि संभवति । यतो जगत्सर्गात्पुरा बुद्धिस्थः प्रतिबिम्बरहितः प्रत्यगात्माऽऽसीत्, जगत्सर्गोत्तरकालं बुद्धिस्थस्य प्रतिबिम्बात्मनो द्रष्टृत्वादिसंसार आसीत् । तन्निवृत्त्यर्थं चात एव शास्त्रारंभोऽप्युपपद्यते ॥

किञ्च *शास्त्राचार्यादिव्याकृतं जगत् यथा †ज्ञानार्थत्वेन क्लृप्तं. एवं प्रवेशस्यापि ब्रह्मैक्यज्ञानार्थत्वान्न प्रवेशविषयं चोद्यमुद्भावनीयम् । शास्त्राचार्यद्वारेणोत्पन्नमैकात्म्यज्ञानं सकलभेदप्रपञ्चजालं निराकरोति । तथाच सति दशमोऽसीति वाक्योत्थसम्यग्ज्ञानार्चिषाऽऽत्मनि दशमभावतयं पुष्ट्वाऽऽत्मदशमज्ञानं यथा लोके माणवकः प्रतिपद्यते, तथा 'तत्त्वमसि' इतिवाक्योत्थज्ञानवह्निनाऽऽत्माज्ञानं, तज्जगद्भ्रमं च देहेन्द्रियमनोबुद्धिविराट्सूत्रान्तर्यामिलक्षणाष्टावस्थाभेदभिन्नं प्लुष्ट्वा ‡नित्यज्ञानानन्तानन्दप्रत्यग्ब्रह्मात्मैक्यं प्रतिपद्यते ॥

श्रुतिसूत्रयोश्च ब्रह्मशब्दस्य लक्षणावृत्त्योपचरितार्थत्वनिवृत्त्यर्थं देशकालवस्तुपरिच्छेदरहितब्रह्मात्मैक्यप्रतिपादकत्वात् तदेव विषयोऽभिमतः ॥

तत्र यद्यपि व्युत्पन्नस्य 'आत्मानं चेद्विजानीयादयमस्मीति पूरुषः' (बृ. ४-४-१२) 'ब्रह्मैव सन् ब्रह्माप्येति' (तै. आ. २-२) 'तत्र को

---

* शास्त्राचार्यादिरूपं जगदित्यर्थः ॥

† 'सर्वं ज्ञाने परिसमाप्यते' इतिन्यायात् ॥ एवञ्चानुप्रवेशस्य मिथ्यात्वेऽपि न दोषः ॥

‡ सत्येति स्याद्वा ।

मोहः कः शोक एकत्वमनुपश्यतः ' (ईश. ७) इत्यादिश्रुतिदर्शनात् ब्रह्मात्मैक्यावगतिर्भवति—तथापि वादिविप्रतिपत्तेः, श्रुतावपि कुत्रचिद्विप्रतिपत्तिदर्शनात्, असंभावनासंशयविपर्ययादिदोषसंभवात्, तन्निवृत्तिद्वारा सर्ववेदान्तार्थनिर्णायकं तदीयविषयप्रयोजनवद्ब्रह्ममीमांसाशास्त्रमप्यारंभणीयमिति सिद्धम् ॥ १ ॥

[इति जिज्ञासाधिकरणम्]

———

[२. जन्माद्यधिकरणम्]

*मुमुक्षोः त्वंपदवाच्यस्यैकात्म्यं जिज्ञासोः प्रथमसूत्रेण विषयप्रयोजननिरूपणात् वेदान्तशास्त्रविचारारंभकर्तव्यतामुपपाद्य तस्यैव मुमुक्षोः 'योऽयं विज्ञानमयः पुरुषः' (बृ. ४-३-७) इत्यादिश्रुतिसिद्धकार्यकरणस्वामिनः साक्षिणः त्वंपदलक्ष्यचैतन्यमात्रस्वरूपमित्युक्तवेदानीं सत्यज्ञानादिलक्षणं तत्पदलक्ष्यस्वरूपं 'सदेव सौम्येदमग्र आसीत्' (छा. ६) इत्यादिश्रुतिसिद्धं 'असि' इत्यनेनैक्यबोधनाय ब्रह्मणो लक्षणमाह—

जन्माद्यस्य यतः १-१-२

अस्मिन् सूत्रे जगत्कारणं तटस्थलक्षणं कण्ठत उच्यते । अर्थात्तु विज्ञानानन्दादिरूपं स्वरूपलक्षणम् । तदुक्तं—

---

* नन्वित्थं ब्रह्मणस्त्वयन्तविचारमुखेन विचार्यत्वमवादि, तदसारम्, लक्षणाभावेन स्वरूपस्यैवासिद्धेरित्याक्षिप्याह—'जन्माद्यस्य यतः' इति—अस्य पूर्वाधिकरणेनाक्षेपिकी संगतिः ॥ स-शि-वृ.

'जगज्जन्मस्थितिध्वंसा यतः सिध्यन्ति कारणात् ।
तत्स्वरूपतटस्थाभ्यां लक्षणाभ्यां प्रदर्श्यते '

इति ॥

'यतो वा इमानि भूतानि जायन्ते' (तै. भृ-१) इत्यादि तैत्तरीयके श्रूयमाणं जगत्कारणत्वं किं ब्रह्मणो लक्षणम्? उत न? इति संशये नित्यानन्दज्ञानरूपब्रह्मणो नित्यदुःखजडरूपं जगत् विरोधान्न लक्षणमिति पूर्वपक्षे प्राप्ते—

राद्धान्तः—'जन्माद्यस्य यतः' इति । जन्म आदिर्ययोः स्थितिभङ्गयोः, तौ जन्मादी इत्यन्यपदार्थौ यदि *विशेषरूपेण विवक्ष्यते, तदा 'जन्मादी अस्य' इति निर्देशप्रसङ्गेन गौरवं स्यात् । तन्मा भूदिति समाहारद्वन्द्वमाश्रित्य सामान्यविवक्षणेन नपुंसकलिङ्गप्रयोगो लाघवात् कृतः ॥

लघुत्वमेव सूत्राणामुचितम् । यथाऽऽहुः—

'लघूनि सूचितार्थानि स्वल्पाक्षरपदानि च ।
सर्वतः सारभूतानि सूत्राण्याहुर्मनीषिणः '

इति ॥

जन्म—उत्पत्तिः आदिर्यस्य स्थितिभङ्गस्य, तत् जन्मादि । लम्बकर्णमानयेत्यादाविव तद्गुणसंविज्ञानबहुव्रीहेर्विवक्षितत्वात् जन्मनोऽपि ग्रहणं सिद्ध्यति । ततश्च जन्मस्थितिभङ्गं समासार्थः । सर्वस्य विशेषणत्वे

---

* विशेषरूपेणेति । सृष्टिस्थितिप्रलयरूपसमुदायैकदेशभूतस्थितिप्रलयमात्रस्यान्यपदार्थत्वं न युक्तम्, तयोः विशिष्य विवक्षायामुपस्थितिगौरवप्रसङ्गात् । किन्तु समुदायत्वेन समुदायस्यैव तथात्वविवक्षणं युक्तमित्याशयः ॥

समासासंभवात् समासार्थैकदेशो विशेषणमिति लभ्यते । जन्मनश्चादित्वं श्रुतिनिर्देशापेक्षम् । जन्मना लब्धात्मकस्य वस्तुनः स्थितिभङ्गसंभवात् श्रुतावपि जन्मादित्वश्रवणमुपपद्यते ।।

अस्येति प्रत्यक्षादिसन्निधापितस्य धर्मिण इदमा निर्देशः । षष्ठी जन्मादिसम्बन्धार्था । तथा चायं सूत्रार्थःसंपद्यते—अस्य जगतः नामरूपाभ्यां व्याकृतस्यानेककर्तृभोक्तृसंयुक्तस्य प्रतिनियतदेशकालनिमित्तक्रियाफलाश्रयस्य मनसाऽप्यचिन्त्यरचनारूपस्य जन्मस्थितिभङ्गं, यतः सर्वशक्तेः कारणात् भवति, तत् ब्रह्मेति ; पूर्वसूत्रात् ब्रह्मशब्दस्यात्रानुवर्तनात् ।।

न ह्यस्माभिः जगत् ब्रह्मणो लक्षणत्वेनोच्यते, येन पूर्ववाद्युक्तदोषसङ्गः स्यात् ; किन्तु जगत्प्रति कारणत्वम् । तदपि *भावरूपताद्यनिर्वाच्याविद्यावशात् । ब्रह्मणः कारणत्वं न स्वतः, †अकार्याकारणरूपब्रह्मप्रतिपादनपरत्वात् सर्वेषां वेदान्तानाम् ।।

सूत्रकारः 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (ब्र.सू. ३-२-११) इत्यादिना तृतीये तत्पदार्थविचारे स्वयमेव, 'अशब्दमस्पर्शमरूपम्' (सुकठ. १-३-१५) इत्यादिसामर्थ्यात् 'अथात आदेशो नेति नेति' (बृ. २-३-६) इत्यादिसामर्थ्यात्, ब्रह्मणः सर्वप्रपञ्चरूपत्वजगत्कारणत्वादिकं अविद्याकल्पितं निराकृत्य विज्ञानानन्दादिरूपं ब्रह्म दर्शयिष्यति ।।

अत्रापि च 'यतः' इति 'सत्यं ज्ञानमनन्तं' (तै. आ. १) इति प्रकृतं विज्ञानानन्दादिरूपं ब्रह्म कारणत्वेन निर्दिष्टम् ।।

---

* भावरूपता—सद्रूपता । आदिपदेनासद्रूपतायाः ग्रहणम् ।

† अकार्येत्यादि । ब्रह्म कस्यापि न कार्यं, कारणं वा ; उभयथाऽपि सविकारत्वप्रसङ्गादित्यर्थः ॥

भाष्यकारेणापि 'यतः सर्वज्ञात् सर्वशक्तेः कारणात्' (शं. ब्र. सू. भा. १-१-२) इत्यविद्याकल्पितं कारणत्वमनुभाषितम्. सर्वशक्तिशब्देनाविद्याशक्तेर्ग्रहणात्। तस्मात् कारणत्वमपि ब्रह्मण उपलक्षणं काकनिलयनं देवदत्तगृहमित्यादिवत् ॥ १ ॥

[इति जन्माद्यधिकरणम्]

[३ शास्त्रयोनित्वाधिकरणम्]

*एवमपि वेदस्य नित्यत्वात् ब्रह्मकार्यत्वानुपपत्तेः अव्यापकं लक्षणमिति नैकाद्वितीयप्रत्यग्ब्रह्मावगमः इतीमां शङ्कां निराकरोति—

शास्त्रयोनित्वात्—१-१-३

वाजसनेयके श्रूयते—'अस्य महतो भूतस्य निश्वसितमेतद्यदृग्वेदो यजूर्वेदः' (बृ. २-४-१०) इत्यादि। किमेतद्वाक्यं वेदस्य ब्रह्मकार्यत्वं प्रतिपादयति? उत न? इति संशये—ब्रह्मकार्यत्वे वेदस्य सापेक्षत्वलक्षणाप्रामाण्यप्रसङ्गात् न वेदो ब्रह्मकार्यं—इति प्राप्ते—

राद्धान्तः—शास्त्रस्य—हितशासनशीलस्य वेदस्य योनिः—कारणं ब्रह्म। शास्त्रं प्रति कारणत्वादेव हेतोः न ब्रह्मलक्षणमव्यापकमिति शेषः ॥

वेदस्य यथापूर्वमेव कल्पादाववकल्पनात् न वेदरचनायां स्वातन्त्र्यं ब्रह्मणः, 'यथापूर्वमकल्पयत्' (ते. महा. ५-७) इति श्रुतेः। सुषुप्त्यादौ श्वासनप्रश्वासनादीनां स्वातन्त्र्याभावेऽपि पुरुषकार्यत्वदर्शनात् अत्रापि ब्रह्म-

---

* जगत्कारणत्वप्रदर्शनेन सर्वज्ञं ब्रह्मेत्युपक्षिप्तम्। तदेव द्रढयन्नाह (शंकर-सूत्रभाष्यम्)

कार्यत्वं न विरुध्यते। तस्मादपौरुषेयत्वं नाम वेदस्य रचनायां स्वातन्त्र्याभावः। तदुक्तं—

'सर्वथा प्रतिषेध्या नः पुरुषाणां स्वतन्त्रता' इति॥

तस्मात् सकलशब्दप्रपञ्चोऽपि ब्रह्मविवर्त इति तन्निषेधेन ब्रह्मात्मैक्यं सिद्ध्यति॥

अस्यैवापरा व्याख्या—स्वरूपतः सिद्धे ब्रह्मणि प्रमाणमनेनोच्यते। शास्त्रमेव योनिः—*प्रमाणं अस्य यथावत्स्वरूपाधिगमे। जगत्कारणत्वे तु †जन्मादिसूत्रोदाहरणमेव वाक्यं प्रमाणम्।

ब्रह्मण्ये सर्वप्रपञ्चभ्रमसंभवमुपपाद्य अध्यारोपापवादन्यायेन 'एकमेव' इत्यादिवाक्यैः तन्निषिध्य तत्त्वमस्यादिवाक्यैः ब्रह्मात्मैक्यप्रतिपादनात् सर्वे वेदान्ताः ब्रह्मात्मैकत्वे प्रमाणम्॥ १॥

[इति शास्त्रयोनित्वाधिकरणम्]

[४ समन्वयाधिकरणम्]

तत्तु समन्वयात् १-१-४

‡किं सर्ववेदान्ता उक्तरूपे ब्रह्मणि प्रमाणम्? उत न? इति संशये—वेदस्य सर्वस्य अर्थवादाधिकरणे क्रियार्थत्वसमर्थनात् सिद्धे वस्तुनि पदानां सङ्गतिग्रहणायोगाच्च न वेदान्ताः ब्रह्मणि प्रमाणमिति पूर्वपक्षे—

---

* योनिः—ज्ञापकहेतुरित्यर्थः

† जन्मादिसूत्रोदाहृतमिति स्याद्वा। जन्मादिसूत्रे उदाहरणं यस्य वाक्यस्येति वा विग्रहः॥

‡ पूर्वसूत्रस्य द्वितीयवर्णके ब्रह्मणः शास्त्रप्रमाणकत्वमुक्तम्। तन्न संभवति शास्त्रस्य—शब्दरूपस्य वेदस्य सिद्धपरत्वासंभवादित्याक्षेपपरिहारार्थमिदमधिकरणम्॥

राद्धान्तः— तत्— ब्रह्म पूर्वोक्तरीत्या सर्वज्ञं सर्वशक्ति जगदुत्पत्तिस्थितिलयकारणं परमार्थतो विज्ञानानन्दाद्वैतैकरूपं संसारसाक्षिरूपं प्रत्यगात्मस्वरूपं वेदान्तवाक्यैरवगम्यते । कुतः ? समन्वयात् । सम्यक् अन्वयः— समन्वयः, तस्मात् । तत्त्वमस्यादिवाक्यप्रतिपाद्यजीवब्रह्मैक्ये निपुणतरमुपक्रमोपसंहारादिषड्विधतात्पर्यलिङ्गैरवगमादित्यर्थः ॥

'अथातो धर्मजिज्ञासा' (ब्र. सू. १-१-१) इति धर्मविचारस्य प्रस्तुतत्वात् क्रियार्थताऽपि कर्मकाण्डविषयैव । 'पुत्रस्ते जातः' इत्यादिवत् सिद्धेऽपि वस्तुनि मुखहर्षादिलिङ्गेन सङ्गतिग्रहणमप्युपपन्नम् । न चापूर्वत्वस्य प्रामाण्यप्रयोजकस्य हानिः, जीवस्य ब्रह्मात्मकतायाः प्रमाणान्तरेणासिद्धत्वात् । नाप्यप्रयोजनत्वलक्षणाप्रामाण्यम्, जीवस्य ब्रह्मभावावगतिमात्रेण सकलानर्थनिवृत्तिद्वारा परमानन्दब्रह्मावाप्तिलक्षणप्रयोजनसंभवात् । तस्मात् सर्वे वेदान्ता ब्रह्मणि प्रमाणमिति सिद्धम् ॥ १ ॥

[इति समन्वयधिकरणम्]

[५. ईक्षत्यधिकरणम्]

१. ईक्षतेर्नाशब्दम् १-१-५

ननु ! तत्त्वमस्यादिवाक्यानि तच्छब्दवाच्यं ब्रह्म जगत्कारणत्वेन प्रकृत्य त्वंपदवाच्यजीवैकत्वं बोधयितुं न समर्थानि, सांख्याभिमतप्रधानस्यैव जगत्कारणत्वात्—इतीमामाशङ्कां निराकर्तुमिदमधिकरणम्* ॥

* एवञ्च पूर्वाधिकरणोक्तार्थस्याक्षेपादिदमधिकरणं प्रवृत्तमित्यर्थः ॥

छान्दोग्ये षष्ठाध्याये ‘ सदेव सौम्येदमग्र आसीदेकमेवाद्वितीयं ब्रह्म ’ (छा. ६-२-१) इति प्रस्तुत्य ‘ तदैक्षत बहु स्यां प्रजायेयेति तत्तेजोऽसृजत ’ (छा. ६-२-३) इत्यादि श्रूयते ॥

तत्र संशयः— तदैक्षत इति किं प्रधानमुच्यते ? उत ब्रह्म ? इति ॥

तत्र तच्छब्दवाच्यं सर्वजगत्कारणं प्रधानं, न तु ब्रह्म । प्रधानस्य सत्त्वगुणयुक्ततया परिणामितया च *ज्ञानशक्तिक्रियाशक्तिसंभवात् । निर्गुणस्य कूटस्थस्य ब्रह्मणः तदसंभवात् । तस्मात् न ‘ तत्त्वमसि ’ इति प्रकृतस्य ब्रह्मणो जीवैक्यप्रतिपादनं संभवतीति न तत्र वेदान्ताः प्रमाणमिति प्राप्ते—

राद्धान्तः—‘ तदैक्षत ’ इति तच्छब्देन न प्रधानं जगत्कारणमुच्यते, †अशब्दं हि तत् । प्रधानं अत्र केनापि शब्देन न गम्यते । कुतः ? ईक्षतेः—ईक्षितृत्वश्रवणात् , तच्छब्दवाच्यस्य कारणस्येत्यर्थः । न ह्यचेतनं प्रधानमीक्षितृ संभवति । सर्वज्ञत्वक्रियाशक्ती तु ब्रह्मणि मायया संभविष्यतः ॥

२. गौणश्चेन्नात्मशब्दात् १-२-६

प्रधानस्याचेतनस्यापि ‘ कूलं पिपतिषति ’ इत्यादिवत् गौण ईक्षितृत्वप्रयोग इति चेत्—न—कुतः ? आत्मशब्दात् । ‘ सेयं देवतैक्षत हन्ताहमिमास्तिस्रो देवता अनेन जीवेनात्मनाऽनुप्रविश्य नामरूपे व्याकर-

---

* ज्ञानस्य जानातिधात्वर्थत्वेन क्रियारूपत्वात् ॥

† न शब्दः प्रमाणत्वेन यस्य तत् अशब्दम् । प्रधानं हि अनुमानगम्यं तन्मते, अतः अशब्दं तत् ॥

वाणि ' (छा. ६-३-२) इति जीवस्यात्मशब्देन परामर्शात् । ईक्षितुरचेतनत्वे स परामर्श अनुपपन्नः स्यात् ।। २ ।।

'ननु भूतात्मा चेन्द्रियात्मा च' (वि.पु. ५-१८-५०) इति चाचेतनेऽपि आत्मशब्दो दृष्ट इति प्रधानमेवात्मशब्दमिति चेत् नेत्याह—

३. तन्निष्ठस्य मोक्षोपदेशात् १-१-७

'स आत्मा' इति प्रकृतं सदणिमानमादाय 'तत्त्वमसि श्वेतकेतो' (छा. ६-१४-३) इति मुमुक्षोश्चेतनस्य श्वेतकेतोः प्रकृतसदात्मनिष्ठस्य 'आचार्यवान् पुरुषो वेद तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा. ६-१४-२) इति मोक्षोपदेशात् । तत्र यदि चेतनस्याचेतनसदात्मरूपतां शास्त्रमुपदिशेत्, तर्हि विपरीतवादित्वेनाप्रमाणं स्यात् ।। ३ ।।

४. हेयत्वावचनाच्च १-१-८

यद्यचेतनं प्रधानं *आत्मशब्दवाच्यं स्यात्, तर्हि तन्निष्ठस्यानात्मतां व्यावर्तयन् मुख्यमात्मानमुपदिश्य †हेयत्वं ब्रूयात् । न चोक्तम् । ‡चकारेण भोक्तॄणां जीवानां प्रधानविकारत्वाभावात् कारणविज्ञानेन सर्वविज्ञानप्रतिज्ञोपरोधश्च स्यादिति सूचितम् ।। ४ ।।

---

* 'सच्छब्दवाच्यं स्यात्' इति युक्ततरम् ।

† तस्य-सच्छब्दवाच्यप्रधानस्य हेयत्वं ब्रूयादित्यर्थः ।

‡ रामानुजभाष्यरीत्या तु अत्र 'प्रतिज्ञाविरोधात्' इति प्रत्येकं सूत्रम् ।।

इतश्च न प्रधानं सच्छब्दवाच्यमित्याह—

५. स्वाप्ययात् १-१-९

स्वशब्देनेहात्मोच्यते । यः प्रकृतः सच्छब्दवाच्यः, तस्मिन् जीवस्य सुषुप्त्यवस्थायां अप्ययश्रवणात् । जाग्रत्स्वप्ननिमित्तोपाधिद्वयविगमे *लयश्रवणादिति यावत् । 'स्वमपीतो भवति' (छा. ६-८-१) इति विशेषविज्ञानविरहात्लय इव लयः । 'प्राज्ञेनात्मना संपरिष्वक्तः न बाह्यं किञ्चन वेद नान्तरम्' (बृ. ४-३-२१) इत्यन्यत्र श्रवणात् ॥ ५ ॥

६. गतिसामान्यात् १-१-१०

किञ्च सर्वेषु वेदान्तेषु चेतनकारणावगतेः समानायाः यो भावः तत्—गतिसामान्यम् ; तस्मादपि हेतोः ब्रह्मैवेहात्मशब्दवाच्यम् । 'यथाऽग्नेर्ज्वलतः' (कौ. ३-३) इत्यादौ सर्वस्य ब्रह्मकारणताऽवगम्यते, न तार्किकपरिकल्पितसमय इव कारणनानात्वाऽवगतिः ॥ ६ ॥

७. श्रुतत्वाच्च १-१-११

किञ्च 'स कारणं करणाधिपाधिपः' (श्वे. ६-९) इति श्वेताश्वतराणां मन्त्रोपनिषदि सर्वदाऽस्येश्वरस्य स्वशब्देनैव कारणत्वं श्रुतम्-तस्माद्ब्रह्मैव जगत्कारणं, न त्वचेतनं प्रधान †परमाण्वादीति पूर्वोक्तन्यायेन तत्त्वमस्यादिवाक्यानि ब्रह्मात्मैक्ये प्रमाणम् ॥ ७ ॥

[इति ईक्षत्यधिकरणम्]

---

* न हि चेतनस्य जडे प्रधाने लयसंभव इत्याशयः ।

† 'अशब्दं' इति सामान्यशब्दप्रयोगात् अनुमेयस्य परमाणोरपि जगदुपादानत्वाभावः अत्र सूत्रकृत्सम्मत इत्याशयेन भाष्ये प्रयुक्तं 'अन्यद्वा' इति शब्दं विवृणोति—परमाण्वादीति ॥

[६. आनन्दमयाधिकरणम्]

१. आनन्दमयोऽभ्यासात् १-१-१२

एवं ब्रह्मण्येवानाद्यज्ञानवशात् सर्वभेदप्रपञ्चारोपमुपपाद्य, अध्यारोपापवादन्यायेन 'एकमेवाद्वितीयम्' (छा ६-२-१) इति तन्निषेधमुपपाद्य 'फलवत्सन्निधावफलं तदङ्गम्' इतिन्यायात् सृष्टिप्रतिपादनवाक्यानामपि ब्रह्मात्मैकत्वद्वारा मोक्ष एव फलमिति सूचितम् ।।

इदानीमेकमपि ब्रह्मापेक्षितोपाधिसम्बन्धं, निरस्तोपाधिसम्बन्धं *चोपास्यत्वेन ज्ञेयत्वेन च वेदान्तेषु उपदिश्यत इति प्रतिपादयितुमयमारम्भः ।।

सगुणोपास्तिप्रतिपादकानामपि वाक्यानां चित्तशुद्धिद्वारा ब्रह्मात्मैक्ये ज्ञानोपकारत्वात् परम्परया ब्रह्मात्मैक्ये प्रामाण्यं सिद्ध्यति ।।

केषाञ्चित् क्रममुक्तिद्वारा ब्रह्मात्मैक्यरूपे प्रामाण्यमिति न समन्वयसूत्रोक्तब्रह्मात्मैक्यप्रामाण्यहानिः ।।

ब्रह्मणः कारणत्वे च, गतिसामान्यप्रतिपादनेन प्रधानादिकारणनिषेधाय चोत्तरग्रन्थारम्भः ।।

तैत्तिरीयके देहप्राणमनोबुद्ध्यानन्दरूपा अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमयसंज्ञकाः पञ्चपदार्थाः क्रमेणैकैकस्मादान्तराः पठिताः इत्यानन्दमयः परमात्मा, तस्मादन्यस्य आन्तरस्य कस्यचिदपाठात् आनन्दमयब्रह्मपरतयैतानि सूत्राणि 'आनन्दमयोऽभ्यासात्' इत्यादीनि †पूर्वाचार्यैर्व्याख्यातानि । तदनुपपन्नम्—मोदप्रमोदादीनां प्रतिजीवं सातिशयत्वदर्शनेन आनन्दमयस्यापि

---

* उपास्यत्वज्ञेयत्वयोः यथासंख्यमन्वयः ।।

† पूर्वाचार्याः—वृत्तिकाराः । इदं रत्नप्रभाभामत्यानन्दगिर्यादिषु व्यक्तम् ।।

विकारिब्रह्मत्वात् । ततश्च श्रुतिसूत्रयोर्विरोधे 'गुणे त्वन्याय्यकल्पना' इति * सूत्राण्येवान्यथा व्याख्यायन्ते ॥

†'ब्रह्म पुच्छं प्रतिष्ठा' (तै. आ-५) इत्यत्र किमानन्दमयस्यावयवत्वेन ब्रह्म विवक्ष्यते? उत स्वप्रधानत्वेन? इति विशये—पुच्छशब्दादवयवत्वेनेति प्राप्ते—

उच्यते—'आनन्दमयोऽभ्यासात्' इति । आनन्दमयादात्मनोऽन्यत्र 'ब्रह्म पुच्छं प्रतिष्ठा' इति स्वप्रधानमेव ब्रह्मोपदिश्यते । कुतः? 'असन्नेव स भवति' (तै. आ-७) इत्यस्मिन्निगमनश्लोके ब्रह्मण एव केवलस्याभ्यस्यमानत्वात् । मयटो विकारार्थत्वेनानन्दमयशब्दस्य विकृतब्रह्मप्रतिपादकत्वात् । 'सैषाऽऽनन्दस्य मीमांसा भवति' (तै. आ-८) 'एतमानन्दमयमात्मानमुपसंक्रामति' (तै. आ-८) इत्ययमभ्यासो नानन्दमयस्य शुद्धब्रह्मत्वं साधयति ॥

प्राचुर्यार्थविवक्षायामपि प्रतियोग्यल्पत्वेन विना प्राचुर्यासंभवात् ब्रह्मणो दुःखरूपत्वप्रसङ्गात् 'यदेष आकाश आनन्दो न स्यात्' (तै. आ-७) इत्यादावानन्दप्रातिपदिकस्यैवाभ्यासदर्शनात्, आनन्दमयशब्देन विकृतब्रह्मप्रतीतेः, नानन्दमयस्य ब्रह्मत्वं सूत्रकाराभिमतम् । अन्यथा श्रुतिविरोधः प्रसज्येत ॥ २ ॥

२. विकारशब्दान्नेति चेन्न प्राचुर्यात् १-१-१३

विकारशब्दोऽवयववचनः । 'पुच्छं' इत्यवयवशब्दात् । ब्रह्मणो न न स्वप्रधानत्वमिति चेत्—न—कुतः? प्राचुर्यात् ।

---

* 'वेदसूत्रयोर्विरोधे' 'गुणे त्वन्याय्यकल्पना' इति सूत्राण्यन्यथा नेतव्यानि' इति, रत्नप्रभा· भामती ; स्वमते सूत्राणामननुगुणत्वमाशङ्क्याह—सूत्राणी (भाष्ये)इति'ति आनन्दगिरिः ॥

† अयमेव पुच्छब्रह्मवाद इति प्रसिद्धः ॥

* प्राचुर्य–प्रायापत्तिः । शिर आद्यवयवप्राये वचनादित्यर्थः । न त्ववयवविवक्षया, ब्रह्मणः स्वप्रधान- त्वात् । तस्मात् पुच्छवत् पुच्छं प्रतिष्ठा–परायणं एकनीड लौकिकानन्दजातस्येत्यनेन विवक्ष्यतं इति ' सत्यं ज्ञानमनन्तं ब्रह्म ' (तै.आ-१) इति प्रकृतं ब्रह्म पुच्छशब्देनोदितमिति सिद्धम् ॥ २ ॥

३. तद्धेतुव्यपदेशाच्च १-१-१४

किञ्च–यतः ' इदं सर्वमसृजत यदिदं किञ्च ' (तै. आ-७) इति सर्वविकारजातस्य कारणत्वेन ब्रह्मोक्तं, तस्मादपि हेतोः विकारस्यानन्दमयस्य मुख्यया वृत्त्या नावयवभावं ब्रह्म प्रतिपद्यते ॥ ३ ॥

४. मान्त्रवर्णिकमेव च गीयते १-१-१५

' ब्रह्मविदाप्नोति परम् ' (तै. आ-१) इति यस्य ज्ञानात् मुक्तिरुक्ता, यत् सत्यं ज्ञानं — इति मन्त्रोक्तं ब्रह्म, त दत्रैव पुच्छवाक्ये गीयते ब्रह्मपदसंयोगात्, नानन्दमयपदवाक्य इत्यर्थः ॥ ४ ॥

५. नेतरोऽनुपपत्तेः १-१-१६

इतश्च ' ब्रह्म पुच्छं प्रतिष्ठा ' (तै. आ-५) इति प्रतिष्ठाभावमापन्नं ब्रह्म नानन्दमय आत्मा । कुतः? अनुपपत्तेः । 'सोऽकामयत बहु स्यां प्रजायेयेति ' (तै. आ-६) इत्यादौ सर्वविकारसृष्टिश्रवणं न परस्मादात्मनोऽन्यत्रानन्दमये विकारे घटते ॥ ५ ॥

---

* प्राचुर्य—प्रायापत्तिः अवयवप्राये वचनमित्यर्थः । अन्नमयादीनां हि शिर आदिषु पुच्छान्तेषु अवयवेषूक्तेषु आनन्दमयस्यापि शिर आदीन्यवयवान्तराण्युक्त्वा अवयवप्रायापत्त्या ' ब्रह्म पुच्छं प्रतिष्ठा ' इत्याह, नावयवविवक्षया—(भाष्यम्) तथा च प्रायापत्तिः—तौल्यावाप्तिः ॥

६. भेदव्यपदेशाच्च १-१-१७

इतश्च नानन्दमयः परं ब्रह्म भवितुमर्हति । यत् कारणं 'आनन्दो ब्रह्मेति व्यजानात्' (तै. भृ-७) इत्यानन्दमयादानन्दरूपं ब्रह्म भेदेन व्यपदिशति ।। ६ ।।

७. कामाच्च नानुमानापेक्षा १-१-१८

'तस्माद्वा एतस्मादात्मनः' (तै. आ-१) इति प्रकृतस्यात्मनः 'सोऽकामयत । बहु स्यां प्रजायेयेति' (तै. आ-७) इति कामयितृत्वनिर्देशादपि नानुमानिकं प्रधानं सांख्यपरिकल्पितमचेतनं ब्रह्म भवितुमर्हति । प्रकृतस्याविकृतस्यात्मनः कामयितृत्वश्रवणाच्च न विकृतस्यानन्दमयस्य तत् कल्पयितुं शक्यते ।। ७ ।।

८. अस्मिन्नस्य च तद्योगं शास्ति १-१-१९

इतश्च *प्रधानं जगत्कारणं, आनन्दमयो वा न ब्रह्म भवति यस्मात् अस्मिन् प्रकृते सर्वविकारिकारणे ब्रह्मण्यानन्दमस्य शारीरस्य प्रतिबुद्धस्य तद्योगं–तदात्मना योगं शास्ति शास्त्रं 'यदा ह्येवैष एतस्मिन्' (तै. आ-७) इत्यादि ।। ७ ।।

[इत्यानन्दमयाधिकरणम्]

---

* 'प्रधानं, आनन्दमयो वा जगत्कारणं ब्रह्म न भवति' इत्यन्वयः ॥

[७. अन्तरधिकरणम्]

१. 'अन्तस्तद्धर्मोपदेशात् १-१-२०

*'अथ य एषोऽन्तरादित्ये हिरण्मयः पुरुषः' (छा. १-६-७) इत्यादौ आदित्यात्मना यः पुरुष उपदिश्यते, स किमैश्वर्यवान् जीवः कश्चित्? उत परमेश्वरः? इति संशये—यथा प्रियशिरस्त्वादिधर्मरूपवत्त्वात् नानन्दमयः †परमेश्वरः, तथा रूपवत्त्वश्रवणात् नान्तरः पुरुषः परमेश्वर इति प्राप्ते—

राद्धान्तः—'य एषोऽन्तरादित्ये' (छा. १-६-६) 'य एषोऽन्तरक्षिणि' (छा. १-७-५) इति च श्रूयमाणः पुरुषः परमेश्वर एव, कुतः? तद्धर्मोपदेशात्। 'स एष सर्वेभ्यः पाप्मभ्य उदितः' (छा. १-६-७) इति पाप्मापगमः, '‡सैवर्क् तत्साम' (छा. १-६-७) इति अक्षिपुरुषस्य ऋक्सामात्मकत्वं च परमेश्वरपक्ष एव घटते। परमेश्वरस्यापीच्छावशात् §मायामयरूपमुपासनार्थं घटत इति नोक्तदोषः ॥ २ ॥

२. भेदव्यपदेशाच्चान्यः १-१-२१

'य आदित्ये तिष्ठन्' (बृ. ३-७-९) इत्यादिनाऽऽदित्यजीवतदन्तर्यामिणोः भेदव्यपदेशः श्रुत्यन्तरे प्रसिद्ध इति भेदव्यपदेशात् अन्तर्यामि पुरुषः जीवदान्यः परमेश्वर इहोपास्य इति सिद्धम् ॥ २ ॥

---

* पूर्वत्र—ब्रह्मपदं, आनन्दमयपदं. आनन्दाभ्यासश्चेति मुख्यत्रितयात्मकबहुप्रमाणवशात् निर्विशेषब्रह्मनिर्णयो यथा, तथा रूपवत्त्वादिबहुप्रमाणवशात् संसारी हिरण्मयः पुरुषोऽस्त्विति पूर्वसिद्धान्तयुक्त्या पूर्वपक्षोत्थानात् तेनास्य दृष्टान्तसङ्गतिः स. शि. वृ.

† परमेश्वरः—परं ब्रह्मेति यावत् ॥

‡ 'एष एव ऋक्साम' इति मातृकापाठः ॥

§ 'अजोऽपि सन्नव्ययात्मा भूतानामीश्वरोऽपि सन्। प्रकृतिं स्वामधिष्ठाय संभवाम्यात्ममायया' (गी. ४-६) इत्यत्र मायापददर्शनानुरोधेनैवमुक्तम्।

[८. आकाशाधिकरणम्]

१. आकाशस्तल्लिङ्गात् १-१-२२

*'अस्य लोकस्य का गतिरित्याकाश इति होवाच' (छा. १-९-१) इति श्रूयते किमत्राकाशशब्देन परं ब्रह्म विर्दिष्टम्? उत भूताकाशमिति संशये—रूढिबलात् भूताकाशमिति प्राप्ते—

सिद्धान्तः—आकाश इत्यनेन शब्देन ब्रह्मणो ग्रहणं युक्तम्। कुतः? तल्लिङ्गात्— 'सर्वाणि ह वा इमानि भूतानि अकाशादेव समुत्पद्यन्ते' (छा. १-९-१) इत्यादिवाक्यशेषे ब्रह्मलिङ्गदर्शनादित्यर्थः। 'आकाशो ह वै नामरूपयोर्निर्वहिता (छा. ८-१-४१) इत्यादौ ब्रह्मण्यप्याकाशशब्दो दृष्टः ॥ २ ॥

[इत्याकाशाधिकरणम्]

[९. प्राणाधिकरणम्]

१. अत एव प्राणः १-१-२३

छान्दोग्ये प्रस्तावदेवता कतमेऽति पृष्टे 'प्राण इति होवाच' इति पठ्यते मुख्यप्राणपरमेश्वरपरिग्रहसंशये—प्रसिद्धेः मुख्यप्राण इति प्रसक्ते—

---

* ननु पूर्वत्राव्यभिचरितापहतपाप्मत्वादिब्रह्मलिङ्गेन रूपवत्त्वादिकमन्यथानीतं यथा, न तथेह लिङ्गात् आकाशशब्दश्रुतिः अन्यथानेतुं शक्या; तस्या बलवत्त्वादित्यत आह—आकाशस्तल्लिङ्गात्। पूर्वेणास्य प्रत्युदाहरणसंगतिः - स·शि·वृ.

सिद्धान्तः—अत एव—तल्लिङ्गादेव—ब्रह्मलिङ्गादेव प्राणः परमेश्वरो भवितुमर्हति। मुख्येऽपि प्राणे भूतानां संवेशनादिदर्शनं अधिकाशङ्काकारणम्। लिङ्गं, तु, सर्वभूतानां 'सर्वाणि ह वा' (छा. १-११-४) इति संवेशनादि न दृश्यते मुख्यप्राणे, किन्तु केवलमिन्द्रियाणामिति सिद्धान्तनिर्णयः॥

[इति प्राणाधिकरणम्]

[१०. ज्योतिश्चरणाधिकरणम्]

१. ज्योतिश्चरणाभिधानात् १-१-२४

* 'अथ यदतः परो दिवो ज्योतिः' (छा. ३-१३-७) इत्यादौ किमादित्यादिकं ज्योतिः? अत ब्रह्म? इति संशये—प्रसिद्धेः प्राकृतं ज्योतिरिति प्राप्ते—

सिद्धान्तः—ज्योतिरिति ब्रह्मणो ग्रहणम्। कुतः? चरणाभिधानात्—पादाभिधानादित्यर्थः। 'तावानस्य' (छा. ६-१२-७) इति पूर्वप्रकृते मन्त्रे चतुष्पदो ब्रह्मणः त्रिपादमृतं द्युसम्बन्धिरूपं निर्दिष्टमिति प्रत्यभिज्ञायते। तस्मात् प्रकृतहानाप्रकृतप्रसङ्गात् दोषपरिहारार्थं ब्रह्मैवेह ज्योतिश्शब्दं सिद्धं, नादित्यादिकं ज्योतिः॥ १॥

* पूर्वं प्राणवाक्ये ब्रह्मलिङ्गसद्भावात् ब्रह्मपरता यथा, न तथेह स्ववाक्ये ब्रह्मपरता, तदभावादिति प्रत्युदाहरणसंगतिः—स'शि.वृ'

२. छन्दोऽभिधानान्नेति चेन्न तथा चेतोर्पणनिगदात्तथा हि दर्शनम्—१-१-२५

पूर्वस्मिन् वाक्ये 'गायत्री वा इदं सर्वं' (छा. ३-१२-१) इति गायत्र्याख्यछन्दोऽभिधानान्न ब्रह्मणः प्रकृतत्वमिति चेत्—न तद्युक्तम्। कुतः? चेतोऽर्पणनिगदात्—गायत्र्याख्यछन्दोद्वारेण तदनुगते ब्रह्मणि चेतोऽर्पणं—चित्तसमर्पणं अस्मिन् वाक्ये निगद्यते। अक्षरमात्राया गायत्र्याः सर्वात्मकत्वानुपपत्तेः 'गायत्री वा इदं सर्वं' इति ब्रह्म निर्दिष्टम्। 'तथा हि दर्शनम्' इत्यनेनात्रापि विकारद्वारेण चेतोऽर्पणमस्तीत्युक्तम्। एवमेव 'बह्वृचा महत्युक्थे के मीमांसन्ते' (ऐ. आ. २-२-३) इत्यादौ॥ २॥

३. भूतादिपादव्यपदेशोपपत्तेश्चैवम् १-१-२६

किञ्च भूतपृथिवीशरीरहृदयानि निर्दिश्य 'सैषा चतुष्पदा षड्विधा गायत्री' इति निर्देशः ब्रह्मणोऽनाश्रयणे न घटते। अतः पूर्वस्मिन् वाक्य एव ब्रह्म प्रकृतमभ्युपगन्तव्यम्॥ ३॥

४. उपदेशभेदान्नेति चेन्नोभयस्मिन्नप्यविरोधात् १-१-२७

'त्रिपादस्यामृतं दिवि' (छा. ३-१२-५) इति सप्तम्या पूर्वं निर्दिष्टम्। इह पुनः 'अथ यदतः परो दिवो ज्योतिः' (छा. ३-१३-७) इति पञ्चम्या—इत्युपदेशभेदान्न ब्रह्मप्रत्यभिज्ञानमिति चेत्—न। कुतः? उभयस्मिन्नप्यविरोधात्। यथा लोके वृक्षाग्रासम्बद्धेऽपि श्येने 'वृक्षाग्रे श्येनः' 'वृक्षाग्रात्परतः श्येनः' इत्युभयथाऽपि निर्दिश्यते*, एवमिहापीति॥ ४॥

[इति ज्योतिश्चरणाधिकरणम्]

---

* केवलं विभक्तिभेदः नार्थभेदे प्रमाणमित्याशयः॥

[११. प्रतर्दनाधिकरणम्]

१. प्राणस्तथाऽनुगमात्. १-१-२८

*कौषीतकीब्राह्मणे प्रतर्दनाख्यायिकायां श्रूयते 'प्राणोऽस्मि प्रज्ञात्मा' (कौ. ३-२) इति। तत्र मुख्यप्राणपरमात्मपरिग्रहसंशये—अनेकलिङ्ग-दर्शनात्, पूर्ववद्ब्रह्मनिर्णयाभावात्, प्रसिद्धेर्मुख्यप्राणपरिग्रहे प्राप्ते—

राद्धान्तः—प्राणः परमात्मा भवितुमर्हति कुतः? तथाऽनुगमात्—पौर्वापर्येण पर्यालोच्यमाने ब्रह्मण्येव समन्वयावगमादित्यर्थः ॥ २ ॥

२. न वक्तुरात्मोपदेशादिति चेदध्यात्मसम्बन्धभूमा ह्यस्मिन् १-१-२९

वक्तुः—इन्द्रस्य विग्रहवतो देवस्य प्राणशब्देन ग्रहणात् न तेन ब्रह्मावगतिः प्राणत्वं चेन्द्रस्य बलवत्त्वादुक्तमिति चेत्—उच्यते—यतोऽध्यात्मसम्बन्धभूमा ह्यस्मिन्। अध्यात्मसंबन्धः— प्रत्यगात्मसंबन्धः भूमा-बाहुल्यम्, अस्मिन्नध्याये उपलभ्यते 'प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्य' (कौ. ३-३) इत्यादिवाक्येषु प्राणाख्येन्द्रियाद्याश्रयत्वं श्रूयमाणं न पराचीनदेवतापरिग्रहे घटते ॥ २ ॥

---

* पूर्वस्मिन्नधिकरणे प्रकृतत्रिपाद्ब्रह्मपरामर्शियच्छब्दसमानाधिकृता ज्योतिःश्रुतिः तदर्थेत्युक्तं यथा, न तथेहासाधारणं किञ्चिल्लिङ्गमस्ति, प्राणस्य ब्रह्मत्वे मानम्; येन तथा स्यादिति प्रत्युदाहरणसंगत्येदमाह—स-शि-वृ यद्यपि 'अत एव प्राणः' इत्यत्रैव प्राणशब्दस्य ब्रह्मपरत्वं स्थापितम्, अथापि 'मामेवोपास्व' इत्यादि-स्पष्टेन्द्रलिङ्गदर्शनादिना संशयात् प्रकरणविशेषविचारः युक्तः ॥

कथं तर्हीन्द्रस्य वक्तुरात्मोपदेशः इति चोदयोत्तरम्—

३. शास्त्रदृष्ट्या तूपदेशो वामदेववत् १-१-३०

इन्द्रस्तावदात्मानं 'अहमेव परं ब्रह्म' इत्यार्षदर्शनेन यत शशास्त्रं पश्यन्नुपदिशति स्म 'मामेव विजानीहि' इति। यथा 'तद्धैतत्पश्यन्' (बृ. १-४-१०) इत्यदौ शास्त्रदृष्ट्या वामदेवस्य सर्वात्मत्वोपदेशः' तद्वदिति ॥ ३ ॥

४. जीवमुख्यप्राणलिङ्गान्नेति चेन्नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात् १-१-३१

अत्र 'न वाचं विजिज्ञासीत वक्तारं विद्यात्' (कौ. ३-८) इति जीवलिङ्गदर्शनात्, अथ 'खलु प्राण एव प्रज्ञात्मेदं शरीरं परिगृह्य' (कौ. ३-३) इति मुख्यप्राणलिङ्गदर्शनाच्च अस्मिन् वाक्यसन्दर्भे न ब्रह्म प्रतीयत इति चेत्—न—कुतः ? उपासात्रैविध्यात्—एवं सति त्रिविधमुपासनं प्रसज्येत—जीवोपासनं, मुख्यप्राणोपासनं, ब्रह्मोपासनं चेति। न चैतद्युक्तं, वाक्यभेदप्रसङ्गात्। न च ब्रह्मलिङ्गमन्यपरं वक्तुं युक्तं, दशानां भूतमात्राणां, प्रज्ञामात्राणामन्यत्रार्पणानुपपत्तेः। अन्यत्रापि ब्रह्मलिङ्गवशात् प्राणशब्दस्य ब्रह्मणि वृत्तेराश्रितत्वात्। इहापि हिततमोपन्यासादिब्रह्मलिङ्गयोगात्, 'शरीरं परिगृह्य' इत्यादिप्राणलिङ्गमपि तद्व्यापारस्य परमात्मायत्तत्वात् तस्मिन्नेवोपचर्यते।

जीवस्योपाधिकृतविशेषपरित्यागेन ब्रह्मभावोपदेशाय प्रत्यगात्माभिमुखीकरणाय 'वक्तारं विद्यात्' इत्यादिः, न तु जीवोपासनाय । तस्मात् ब्रह्मवाक्यमेतदिति सिद्धम् * ॥ ४ ॥

[इति प्रतर्दनाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढ देवरायमहाराजकृतौ

परपायां

ब्रह्मसूत्रवृत्तौ प्रथमस्याध्यायस्य प्रथमः पादः

---

* अथवा 'उपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' इत्यस्यायमन्योऽर्थः । न ब्रह्मवाक्येऽपि जीवमुख्यप्राणलिङ्गं विरुध्यते । कथं ? उपासात्रैविध्यात्—त्रिविधमिह ब्रह्मोपासनं विवक्षितं, प्राणधर्मेण, प्रज्ञाधर्मेण, स्वधर्मेण च + + + ब्रह्मण एवैतदुपाधिद्वयधर्मेण स्वधर्मेण चैकमुपासनं त्रिविधं विवक्षितम्—शं. भा- इदं च व्याख्यानं वृत्तिकृतामिति भामत्यादौ स्पष्टम् ॥

प्रथमाध्यायस्य

द्वितीयः पादः

[सर्वत्रप्रसिद्ध्यधिकरणम्]

प्रथमे पादे नित्यानन्दैकाद्वितीयप्रत्यग्ब्रह्मणि स्पष्टलिङ्गानां समन्वय उक्तः। अथास्मिन् पादेऽनभिव्यक्तब्रह्मलिङ्गानां तत्र समन्वयो निरुच्यते* ॥

१. सर्वत्र प्रसिद्धोपदेशात् १-२-१

† 'सर्वं खल्विदं ब्रह्म तज्जलानिति शान्त उपासीत' (छा. ३-१४-१)इत्यादिश्रुतौ किं जीव उपास्यत्वेनोक्तः? उत परं ब्रह्म? इति संशये मनोमयत्वादियोगात् जीवप्रसङ्गे—

सिद्धान्तः—परमेव ब्रह्म मनोमयत्वादियुक्तं उपास्यम्। कुतः सर्वत्र प्रसिद्धोपदेशात्—यत् सर्वेषु वेदान्तेषु प्रसिद्धं, तस्येह वाक्योपक्रमे उपदेशात्। सर्वस्य तज्जत्वतल्लत्वतदनत्वलिङ्गमपि ब्रह्मण एवोपपन्नम्। मनोमयत्वादिकमपि सर्वात्मत्वात् ब्रह्मण एवोपपद्यते ॥ १ ॥

---

* तथाच लिङ्गानामस्पष्टत्वात् न पूर्वन्यायेन निर्णयसंभव इति उत्तर विचारस्यावश्यकतेत्यर्थः ॥

† तस्मात् जायत इति तज्जं, तस्मिन् लीयत इति तल्लं, तस्मिन् अनिति चेष्टत इति तदनम्। तज्जं च तल्लं च तदनं चेति तज्जलान्। कर्मधारयेऽस्मिन् शाकपार्थिवन्यायेन मध्यमपदस्य तच्छब्दस्य लोपः। तज्जलानमितिवाच्ये छान्दसोऽवयवलोपः—र. प्र., आ. गि.

यथा पूर्वं जीवादिलिङ्गबाधया ब्रह्मपरत्वमुक्तं, न तथेह मनोमयादिवाक्ये ब्रह्मलिङ्गमस्तीति प्रत्युदाहरणसंगत्येदमारभ्यते—स. शि. वृ.

२. विवक्षितगुणोपपत्तेश्च १-२-२

किञ्च, श्रुतौ 'सत्यकामः सत्यसङ्कल्पः' (छा. ८-७-१) इत्येवमादयो ये तात्पर्येण वक्तुरिष्टाः तेषां ब्रह्मपरिग्रह एवोपपत्तिः ॥ २ ॥

३. अनुपपत्तेस्तु न शारीरः १-२-३

सत्यकामत्वादीनां जीवस्यापिहितब्रह्मभावत्वान्नोपपत्तिः तस्मिन् संभवति । तस्मान्न शारीरो मनोमयत्वादिगुणकः ॥ ३ ॥

४. कर्मकर्तृव्यपदेशाच्च १-२-४

किञ्च, 'एतमितः प्रेत्याभिसंभविताऽस्मि' (छा. ३-१४-४) इत्यत्र एतमिति प्रकृतं मनोमयमुपास्यं कर्मत्वेन, अभिसंभविताऽस्मीति शारीरमुपासकं कर्तृत्वेन व्यपदिशति । तस्मान्न मनोमयः शारीरः ॥ ४ ॥

५. शब्दविशेषात् १-२-५

किञ्च, 'एवमयमन्तरात्मन् पुरुषो हिरण्मयः' (श.ब्रा. १०-६-३-२) इति सप्तम्यन्तान्तरात्मपदोक्तात् जीवात् प्रथमान्तपुरुषपदोक्तो मनोमयोऽन्यो भवितुमर्हति ॥ ५ ॥

६. स्मृतेश्च १-२-६

'ईश्वरः सर्वभूतानां' (गी. १८-६१) इत्यादिस्मृतिरपि तयोर्भेदं दर्शयति । इह चाविद्याकृतोपाधिभेदात् जीवेश्वरभेदमाश्रित्येदमुक्तम् ।

अन्यथा 'नान्योऽतोऽस्ति द्रष्टा' (बृ. ३-७-२३) इत्यादिश्रुतिरुपरुध्येत ॥ ६ ॥

७. अर्भकौकस्त्वात्तद्व्यपदेशाच्च नेति चेन्न निचाय्यत्वादेवं व्योमवच्च १-२-७

अर्भकं-अल्पं ओकः-नीडं, परिच्छिन्नायतनत्वादिति यावत् । 'एष म आत्माऽन्तर्हृदये' (छा. ३-१४-३) इति अणीयस्त्वव्यपदेशाच्च, 'व्रीहेर्वा' (छा. ३-१४-३) इत्यादिभिः जीव इह ध्येय इति चेत् न । कुतः ? ईश्वरस्य निचाय्यत्वात्-उपास्यत्वात् । एवं-सालग्रामे हरिरिवोपदेशसंभवात् । यथा सर्वगतमपि व्योम सूचीपाशाद्यपेक्षयाऽर्भकौकः—अणीयश्च व्यपदिश्यते, तथेहापि न विरोधः ॥ ७ ॥

८. संभोगप्राप्तिरिति चेन्न वैशेष्यात् १-२-८

सर्वगतस्यापि ब्रह्मणः हृदयसम्बन्धाच्चिद्रूपत्वाच्च जीववत्सुखदुःखसंभोगप्राप्तिरिति चेत्-न-कुतः ? 'वैशेष्यात्'—* अविद्यावशात् कर्तृत्वादिमान् जीवः, अपहतपाप्मत्वादिमान् ईश्वरः ; कारणाविद्योपाधिक इति तयोर्विशेषः ; तस्य भावो वैशेष्यं, तस्मात् ॥ ८ ॥

[इति सर्वत्रप्रसिद्ध्यधिकरणम्]

---

* 'कार्योपाधिरयं जीवः करणोपाधिरीश्वरः' इत्येतदत्र स्मर्तव्यम् ॥

[अत्त्रधिकरणम्]

१. अत्ता चराचरग्रहणात् १-२-९

* 'यस्य ब्रह्म च क्षत्रं चोभे भवत ओदनः' (क० १-२-२४) इत्यादिश्रुतौ किं चराचरौदनभोक्तृत्वं जीवस्य? परमात्मनो वा? इति संशये—जीवस्येति प्राप्ते—

सिद्धान्तः—अत्ता परमात्मा भवितुमर्हति। कुतः? चराचरग्रहणात् मृत्यूपसेचनसहितचराचरभोक्तृत्वं ईश्वरादन्यस्य न संभवति ॥ २ ॥

२. प्रकरणाच्च १-२-१०

इतश्च नाग्निजीवयोरत्तृत्वम्, यत्कारणं 'न जायते म्रियते वा विपश्चित्' (कठ १-२-१८) इत्यादिप्रकरणमपि ब्रह्मविषयं, न जीवाग्निविषयमिति ॥ २ ॥

[इति अत्त्रधिकरणम्]

---

* ईश्वरस्याभोक्तृत्वे नात्तृत्वमपि तस्येत्याशंक्याह—आ॰ गि॰ पूर्वं यथा ब्रह्मणो भोक्तृत्वाभाव उक्तः, तथा कर्तृत्वाभाव इह ब्रह्मण इति दृष्टान्तसंगत्याऽऽह—स॰ शि॰ वृ॰

[गुहाप्रविष्टाधिकरणम्]

१. गुहां प्रविष्टावात्मानौ हि तद्दर्शनात् १-२-११

* 'ऋतं पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्ध्ये । छायाऽऽतपौ ब्रह्मविदो वदन्ति' (कठ. १-३-१) इति श्रूयते । तत्र संशयः—किं बुद्धिजीवौ गुहां प्रविष्टौ ? उत जीवपरमात्मानौ ? इति । बुद्धिजीवावेव गुहां प्रविष्टौ, तयोरेव तत्प्रवेशोपपत्तेरिति प्राप्ते—

आह—जीवपरमात्मानावेव गुहां प्रविष्टौ । कुतः ? आत्मानौ हि तौ—उभावपि हि चेतनस्वभावावित्यर्थः । सङ्ख्याश्रवणे च समानेष्वेव, लोकप्रतीतिदर्शनात् । छायाऽऽतपवत् वैलक्षण्यमप्यविद्याकृतत्वात् संसारित्वस्य, पारमार्थिकत्वाच्चासंसारित्वस्य तयोरपि घटते ॥ २ ॥

२. विशेषणाच्च १-२-१२

'आत्मानं रथिनं विद्धि' (कठ. १-३-३) इति नियन्तारमन्तःकरणं, जीवं गन्तारमुक्त्वा, 'सोऽध्वनः पारमाप्नोति तद्विष्णोः परमं पदम्' (कठ. १-३-९) इति परमात्मानं गन्तव्यं कल्पयतीति तयोरेव विशेषणादपि जीवपरमात्मानाविहोक्तौ । परमात्मैवाविद्यावशादन्तःकरणोपाधितादात्म्याध्यासाज्जीवभावमापन्नो भोक्तेति जीवगतं कल्पितं भोक्तृत्वं आत्मन्युपचर्यत

---

* पूर्वं ब्रह्मक्षत्रपदस्य मृत्युपदसान्निध्यादनित्यवस्तुपरत्ववत् इहापि पिबच्छब्दस्य सन्निहितगुहाप्रवेशादिना बुद्धिक्षेत्रज्ञपरत्वमस्त्विति दृष्टान्तसंगत्याऽऽह—स.शि. वृ.

इति । 'अनश्नन्नन्यो अभिचाकशीति' (मु. ३-१-१) (श्वे. ४-६) इत्यभोक्तुरपि छत्रिन्यायेन द्विवचनं 'ऋतं पिबन्तौ' इति घटते ॥ २ ॥

[इति गुहाप्रविष्टाधिकरणम्]

[अन्तरधिकरणम्]

१. अन्तर उपपत्तेः १-२-१३

* 'य एषोऽक्षिणि पुरुषो दृश्यते एष आत्मेति होवाच' (छा.४-१५-१) इति श्रुतौ किं जीवात्माऽक्षिपुरुषः? उत परमात्मा? इति संशये—रूपज्ञानार्थं जीवस्य चक्षुषि सन्निधानात्, आत्मशब्दाच्च जीवपरिग्रहं प्राप्ते—

सिद्धान्तः—परमेश्वर एवायमक्षण्यन्तःपुरुषः इहोपदिष्टः कुतः? उपपत्तेः—आत्मत्वं तावन्मुख्यया वृत्त्या तस्यैवोपपद्यते । अमृतत्वाभयत्वं च सर्वदोषाणामलेपोऽपि तस्याक्षिस्थानत्वे सुतरामुपपद्यते ॥ २ ॥

कथमीश्वरस्याक्षिस्थानत्वं अल्पत्वं घटते? नेत्याह—

२. स्थानादिव्यपदेशाच्च १-२-१४

'यः पृथिव्यां' (बृ. ३-७-३) इत्यादिवत् तस्यान्तर्यामिणः, 'यश्चक्षुषि तिष्ठन्' (बृ. ३-७-१८) इति स्थानव्यपदेशसंभवात् । आदिशब्देन

---

* पूर्वं प्राथमिकपिन्ताविति द्वित्वश्रुत्या चेतनत्वेन तुल्यजीवपरदृष्ट्यनुसाराच्चरमश्रुता गुहाप्रवेशादयो नीताः । तर्हि तद्वदेव 'दृश्यते' इति प्राथमिकप्रत्यक्षत्वोक्त्या अक्षिबिम्बात्मावगत्यनुसाराच्चरमश्रुता अमृतत्वादयः स्तुत्यर्थत्वेन कथंचिन्नेया इति दृष्टान्तसंगत्याऽऽह—स·शि.वृ.

'तस्योदिति नाम (छा. १-६-७) 'हिरण्यश्मश्रुः' (छा. १-६-६) इत्यादौ निर्गुणस्याप्युपासनार्थं न केवलमक्षिस्थानत्वमेव, नामरूपत्वमप्युपदिश्यमानं दृश्यत इत्युक्तम् ॥ २ ॥

३. सुखविशिष्टाभिधानादेव च १-२-१५

किञ्च, 'प्राणो ब्रह्म कं ब्रह्म खं ब्रह्म' (छा. ४-१०-५) इति सुखविशिष्टं यद्ब्रह्म प्रकृतं, तस्यैवेहाभिधानात् ब्रह्मैवात्र प्रतिपत्तव्यं, प्रकृतपरिग्रहस्य न्याय्यत्वात् ॥ ३ ॥

४. श्रुतोपनिषत्कगत्यभिधानाच्च १-२-१६

किञ्च, श्रुतोपनिषत्कस्य—श्रुतरहस्यविज्ञानस्य ब्रह्मविदो या गतिः *'अथोत्तरेण पथा' (प्रश्न. १-१०) इत्यादिश्रुतौ, 'अग्निर्ज्योतिरहः शुक्लः षण्मासा उत्तरायणम्' (गी. ८-२४) इत्यादिस्मृतौ च दृश्यते, अक्षिपुरुषविदोऽपि †तदेवेति तस्य ब्रह्मत्वं सिद्धम् ॥ ४ ॥

५. अनवस्थितेरसंभवाच्च नेतरः १-१-१७

अनेनाक्षिगतछायापुरुषविज्ञानात्मदेवतात्मनामुपास्यत्वं नेत्युच्यते। न छायात्मादिरिह ग्रहणमर्हति। कुतः? अनवस्थितेरसंभवाच्च पुरुषान्तरसन्निधिमात्रलभ्यत्वेन छायारूपस्य सर्वदोपास्यत्वासंभवात्। अमृतत्वादिगुणानां तस्मिन्नसंभवाच्च। जीवात्मनस्तु सर्वशरीरवर्तिनो विशेषेण नाक्षिस्थानत्वं युक्तम्। अविद्या (न) वच्छिन्नस्य तस्य ब्रह्मरूपत्वेऽपि नामृतत्व-

---

* 'अथोत्तरेण तपसा' इति युक्तम् ॥

† सैवेति – इति युक्तम् ॥

संभवः । देवतात्मनस्त्वक्षिस्थानसंभवेऽपि नामृतत्वादिसंभवः । परमेश्वरस्य तु सालग्रामे विष्णुदर्शनन्यायेनाक्षिस्थानत्वमुपासनार्थमुपपद्यते ॥ ५ ॥

[इत्यन्तरधिकरणम्]

[अन्तर्याम्यधिकरणम्]

१ अन्तर्याम्यधिदैवादिषु तद्धर्मव्यपदेशात् १-२-१८

* 'यः पृथिव्यां तिष्ठन् पृथिव्या अन्तरः यं पृथिवी न वेद यस्य पृथिवी शरीरं यः पृथिवीमन्तरो यमयति' (बृ. ३-७-३) इति श्रुतौ किं देवताऽन्तर्यामी? उत सिद्धः कश्चित्? किं वा परमात्मा? इति संशये— †अकार्यकारणत्वान्नेश्वरः । तद्योगात् जीवः योगी वा कश्चित्— इति प्राप्ते—

राद्धान्तः—अधिदैवाधिलोकाधिवेदादिषु योऽन्तर्यामी, स परमेश्वरः । कुतः? 'तद्धर्मव्यपदेशात्'—सर्वविकारकारणत्वेन तस्य 'यमयति' इति नियन्तृत्वधर्मस्य व्यपदेशात् । न हि देवतात्मयोगिनोः सर्वकारणत्वमस्ति । ‡नियम्य करणादिबलात्तस्यापि नियन्तृत्वान्नोक्तदोषः ॥ ६ ॥

---

* पूर्वाधिकरणे 'स्थानादिव्यपदेशाच्च' इत्युक्तमाक्षिप्य समाधातुमिदमधिकरणम् ॥

† कार्यं—देहः, करणं—इन्द्रियादि ॥

‡ नियम्यः यो जीवः, तदीयकरणैरेवायं तत्तत् नियमयति न तु अन्यापेक्षेति भावः ॥

२. न च स्मार्तमतद्धर्माभिलापात् १-२-१९

गतिसामान्यनिश्चयाय प्रधानस्यान्तर्यामित्वं निरस्यते । न च स्मार्तं—प्रधानं अन्तर्यामि भवितुमर्हति । कुतः ? अतद्धर्माभिलापात्—'अदृष्टो द्रष्टाऽश्रुतः श्रोता ' (बृ. ३-७-२३) इत्याद्यचेतनायोग्यचेतन-धर्माभिलापात् ।। ७ ।।

नापि जीवोऽन्तर्यामीत्याह—

३. शारीरश्चोभयेऽपि हि भेदेनैनमधीयते १-२-२०

पूर्वसूत्रान्नेत्यनुवर्तते । शारीरश्च नान्तर्यामी स्यात् । कुतः ? उभयेऽपि हि भेदेनैनमधीयते । उभये—काण्वा माध्यन्दिनाश्च अन्तर्यामिणो भेदेन—अधिष्ठानत्वेन एनं— जीवात्मानं पठन्ति । 'यो विज्ञाने तिष्ठन्' (बृ. ३-७-२२) इति काण्वाः, 'य आत्मनि तिष्ठन्' (बृ. माध्यन्दिन) इति माध्यन्दिनाः । 'च'कारेण शारीरस्य पृथिव्यादिषु कार्त्स्न्येन अवस्थानमेव संभवतीति सूचितम् । तस्मादन्तर्यामी परमेश्वर एव ।। ३ ।।

[इत्यन्तर्याम्यधिकरणम्]

[अदृश्यत्वाधिकरणम्]

१. अदृश्यत्वादिगुणको धर्मोक्तेः १–२–२३

* 'अथ परा यया तदक्षरमधिगम्यते' (मु. १-१-५) इत्यादिश्रुतौ श्रूयमाणोऽदृश्यत्वादिगुणकः भूतयोनिः किं प्रधानम्? किं वा शारीरः? उत परमेश्वरः? इति संशये—अचेतनोर्णनाभिशरीरदृष्टान्तात् प्रधानप्राप्तिः। निमित्तार्थत्वेन योनिशब्दस्य धर्माधर्मद्वारा जीवो वा भूतयोनिरिति प्राप्ते—

सिद्धान्तः—अदृश्यत्वादिगुणको भूतयोनिः परमेश्वरो भवितुमर्हति। कुतः? 'धर्मोक्तेः'—'यः सर्वज्ञः सर्ववित्' (मु. १-१-९) इत्यादिपरमेश्वरधर्मकथनादित्यर्थः। न हि प्रधानस्याचेतनस्य, शारीरस्य वा परिच्छिन्नस्य सर्वज्ञत्वं संभवति। न च दृष्टान्तदार्ष्टान्तिकयोः अत्यन्तसाम्यं, नियमाभावात्। भूतयोनेरप्यचेतनत्वं स्थूलपृथिव्यादिदृष्टान्तवत्॥ १॥

२. विशेषणभेदव्यपदेशाभ्यां च नेतरौ १–२–२२

किञ्च, 'दिव्यो ह्यमूर्तः पुरुषः' (मु. २-१-२) इत्यादिविशेषणव्यपदेशस्येश्वरादन्यत्रानुपपत्तेर्न शरीरः भूतयोनिः। तथा 'अक्षरात्परतः परः' (मु. २-१-२ इति अक्षरात् प्रधानात् परतः पर इति भेदव्यपदेशाच्च न प्रधानं भूतयोनिः। अनिर्वाच्यनामरूपबीजशक्तिरूपमीश्वराश्रयमिहाक्षरशब्दवाच्यं, नात्र प्रधानं नाम किञ्चित् स्वतन्त्रमभ्युपगम्यम्।

---

* अन्तर्यामिब्राह्मणे द्रष्टृत्वादिश्रवणात् प्रधानादिव्यतिरेकः स्वावगमः। यत्र तु न तादृशधर्मः तत्र प्रधानपरत्वे का हानिरिति शंकयास्याधिकरणस्य प्रत्युदाहरणतया प्रवृत्तिः॥

तस्माद्भेद उच्यते । तस्मात् विशेषणभेदव्यपदेशाभ्यां हेतुभ्यां न जीवः प्रधानं वा भूतयोनिः ।। २ ।।

३. रूपोपन्यासाच्च १-२-२३

'अग्निर्मूर्धा चक्षुषी चन्द्रसूर्यौ' (मु. २.१.४) इत्यादिसर्वात्मकत्वलक्षणरूपोन्यसात् इह न शारीरः प्रधानं वा भूतयोनिः । न तावत्तनुमहिम्नो जीवस्य सर्वात्मकत्वं संभवति । प्रधानस्यापि सर्वभूतात्मकत्वासंभवात् न सर्वात्मत्वम् । तस्मात् परमेश्वरो भूतयोनिरिति सिद्धम् ।। ३ ।।

[इत्यदृश्यत्वाधिकरणम्]

——o——

[वैश्वानराधिकरणम्]

१. वैश्वानरः साधारणशब्दविशेषात् १-२-२४

*'यस्त्वेतमेवं प्रादेशमात्रमभिविमानं वैश्वानरमुपास्ते' (छा. ५-१८-२) इत्यादौ वैश्वानरः किं जाठराग्निः ? उत भूताग्निः ? आहोस्विद्देवतात्मा ? अथवा किं जीवः ? उत परमेश्वरः ? इति संशये—

जाठराग्निभूताग्निदेवतानामात्मत्वायोगात् जीवस्य परिछिन्नस्य प्रादेशमात्रत्वसंभवाच्च वैश्वानरो जीव इति प्राप्ते—

---

* पूर्वं अदृश्यत्वादिसामान्यधर्माणां वाक्यशेषगतसर्वज्ञत्वादिलिङ्गात् विशेषनिष्ठत्वमुक्तम् । तर्हि तादृशविशेषलिङ्गाभावेन वैश्वानरः न परमात्मा—इत्यपवादादस्य प्रवृत्तिः ॥

सिद्धान्तः—वैश्वनरः परमात्मा भवितुमर्हति। कुतः? साधारण-शब्दविशेषात्—साधारणशब्दयोर्विशेषः—साधारणशब्दविशेषः, तस्मात्। 'तस्य ह वा एतस्यात्मनो वैश्वानरस्य' (छा. ५.१८.२) इत्यादिवशादुपासनार्थं तेजोमूर्धत्वादिकल्पनं सर्वगतस्यापि घटते। जीवस्य तु परिच्छिन्नस्य 'मूर्धैव सुतेजाः' (छा. ५.१८.२) इत्यादितेजोमूर्धत्वादिकल्पनं न घटते ॥ २ ॥

२. स्मर्यमाणमनुमानं स्यादिति १–२–२५

किञ्च 'यस्याग्निरास्यं द्यौर्मूर्धा' (म-भा-शां ४६-५७) इति तस्यैव स्मर्यमाणं रूपं मूलां श्रुतिमनुमापयत् वैश्वानरस्य परमेश्वरत्वे अनुमानं—लिङ्गं स्यादित्यर्थः। इतिशब्दो हेत्वर्थः। यस्मादिदं गमकं, तस्माद्वैश्वानरः परमात्मेत्यर्थः ॥ २ ॥

३. शब्दादिभ्योऽन्तःप्रतिष्ठानान्नेति चेन्न तथा दृष्ट्युपदेशादसंभवात्पुरुषमपि चैनमधीयते १–२–२६

'स एषोऽग्निर्वैश्वानरः' (शा. ब्रा. १०-६-१-११) इति अग्निशब्दश्रवणात्, 'हृदयं गार्हपत्यः' (छा. ५-१८-२) इत्यादित्रेताग्निकल्पनाच्च 'पुरुषेऽन्तःप्रतिष्ठितं वेद (शा.ब्रा. १०-६-१-११) इति चान्तःप्रतिष्ठानश्रवणाच्च जाठराग्निर्वैश्वानरः, न परमेश्वर इति चेत्—न—कुतः? तथा दृष्ट्युपदेशात्—तथा—जाठरवैश्वानरोपाधिरूपेणेह परमेश्वरोपासनविधानात्, जाठराग्नेर्मूर्धत्वाद्यसंभवाच्च 'य एषोऽग्निर्वैश्वानरो यत्पुरुषः' (शा. ब्रा. १०-६-१-११) इति वाजसनेयिनः पुरुषमपि चैनमधीयते। वैश्वानरस्यजाठरत्वे पुरुषेऽन्तःप्रतिष्ठितत्वमेवोच्येत, न तु पुरुषत्वमिति तात्पर्यार्थः ॥ ३ ॥

४. अत एव न देवता भूतं च १-२-२७

अत एव उक्तेभ्यो हेतुभ्यस्तावत् अग्न्यभिमानिन्या देवताया भूताग्नेश्च न वैश्वानरत्वम्। द्युमूर्धत्वाद्यसंभवः, आत्मत्वाद्यसंभवादयश्च उक्ता हेतवः ॥ ४ ॥

५. साक्षादप्यविरोधं जैमिनिः १-२-२८

साक्षादपि पूर्वं जाठराग्निप्रतीकः, जाठराग्न्युपाधिको वा परमेश्वर उपास्य इत्युक्तः प्रतिष्ठितत्वाद्यनुरोधेन। इदानीं तु विनैव प्रतीकोपाधि-कल्पनाभ्यां साक्षादपि परमेश्वरोपासनपरिग्रहे न कश्चिद्विरोध इति जैवैमिनि-राचार्यो मन्यते ॥

ननु जाठराग्न्यपरिग्रहेऽन्तःप्रतिष्ठितत्ववचनं शब्दादीनि कारणानि विरुद्ध्येरन्निति— अत्रोच्यते— अन्तःप्रतिष्ठितत्ववचनं न तावद्विरुध्यते। न हीह 'पुरुषविधं पुरुषेऽन्तःप्रतिष्ठितं च' (श. ब्रा. १०-६-१-११) इति जाठराभिप्रायेणेदमुच्यते, तस्याप्रकृतत्वात्, असंशब्दितत्वाच्च। कथं तर्हि यत्प्रकृतं मूर्धादिचुबुकान्तेषु पुरुषावयवेषु पुरुषविधत्वम्? यथा 'वृक्षे शाखां प्रतिष्ठितां पश्यति' इति, तद्वत् ॥

अथवा यः प्रकृतः परमात्मा अध्यात्ममधिदैवतं च पुरुषविधोपाधि-कल्पितः, तस्य यत् केवलं साक्षिरूपं तदभिप्रायेणेदमुच्यते 'पुरुषेऽन्तः प्रतिष्ठितं वेद' इति। निश्चिते च पूर्वापरालोचनावशेन परमात्मपरिग्रहे तद्विषय एव वैश्वानरशब्दः केनचिद्योगेन वर्तिष्यते। विश्वश्चायं नरश्च— नेता— विश्वेषां वाऽयं नरः— विश्वे वा नरा अस्येति विश्वानरः— परमात्मा, सर्वात्मत्वात्। विश्वानर एव वैश्वानरः, तद्धितोऽनन्यार्थः, राक्षसवायसादिवत् ॥

अग्निशब्दोऽप्यग्रणीत्वादियोगाश्रयणेन परमात्मविषय एव भविष्यति। गार्हपत्यादिकल्पनं प्राणाहुत्यधिकरणत्वं च परमात्मनोऽपि सर्वात्मकत्वादुपपद्यते ॥ ५ ॥

कथं पुनः परमेश्वरपरिग्रहे प्रादेशमात्रश्रुतिरुपपद्यते? इति तां व्याख्यातुमारभते—

६. अभिव्यक्तेरित्याश्मरथ्यः १-२-२९

अमात्रस्यापि परमेश्वरस्य प्रादेशमात्रत्वमभिव्यक्तिनिमित्तं स्यात्। अभिव्यज्यते किल प्रादेशमात्रपरिणामः परमेश्वर उपासकानां कृते प्रदेशेषु वा हृदयादिपूपलब्धिस्थानेषु विशेषेणाभिव्यज्यते। अतः परमेश्वरेऽपि प्रादेशमात्रश्रुतिः अभिव्यक्तेरुपपद्यत इत्याश्मरथ्य आचार्यो मन्यते ॥ ६ ॥

७. अनुस्मृतेर्बादरिः १-२-३०

प्रादेशमात्रहृदयप्रतिष्ठितत्वेन वाऽयं मनस्यनुस्मर्यते—प्रादेशमात्र इत्युच्यते। यथा प्रस्थमिताः यवाः प्रस्था इत्युच्यन्ते, तद्वत्। यद्यपि यवेषु स्वगतमेव परिमाणं प्रस्थसम्बन्धात् व्यज्यते। न चेह परमेश्वरगतं किञ्चित्परिमाणमस्ति, यत् हृदयसम्बन्धात् व्यज्यते—तथापि प्रयुक्तायाः प्रादेशमात्रश्रुतेः संभवति यथाकथञ्चि*द......णमालम्बनमित्युच्यते। प्रादेशमात्रत्वेन वाऽयं अप्रादेशमात्रेऽपि परमेश्वरः अनुस्मरणीयः। प्रादेशमात्रस्तुत्यर्थवत्त्वाय। †एवमनुस्मृति........परमेश्वरे प्रादशमात्रश्रुतिरिति बादरिराचार्यो मन्यते ॥ ७ ॥

---

* 'दनुस्मरण' इति स्यात् ॥

† 'एवमनुस्मृतिनिमित्ता परमेश्वरे' इति स्यात् ॥

८. संपत्तेरिति जैमिनिस्तथा हि दर्शयति १-२-३२

संपत्तिनिमित्ता वा प्रादेशमात्रश्रुतिः। कुतः? तथाहि समानप्रकरणं वाजसनेयिब्राह्मण द्युप्रभृतीन् पृथिवीपर्यन्तान् त्रैलोक्यात्मनो वैश्वानरस्यावयवान्—अध्यात्ममूर्धप्रभृति चुबुकपर्यन्तेषु देहावयवेषु संपादयत् प्रादेशमात्रसंपत्तिं परमेश्वरस्य दर्शयति—'प्रादेशमात्रमिह वै देवाः सुविदिता अभिसंपन्नास्तथा तु व एनान् वक्ष्यामि अथ प्रादेशमात्रमेवाभिसंपादयिष्यामीति। स होवाच मूर्धानमुपदिशन्नुवाच एष वा अतिष्ठा वैश्वानर इति। चक्षुषी उपदिशन्नुवाच एष वै सुतेजा वैश्वानर इति। नासिके उपदिशन्नुवाच एष वै पृथग्वर्त्मात्मा वैश्वानर इति। मुख्यमाकाशमुपदिशन्नुवाच एष वै बहुलो वैश्वानर इति। मुख्या आप उपदिशन्नुवाच एष वै रयिर्वैश्वानर इति। चुबुके उपदिशन्नुवाच एष वै प्रतिष्ठा वैश्वानरः' इति। चुबुकमित्यधरं मुखफलकमुच्यते॥

यद्यपि वाजसनेयके द्यौरतिष्ठात्वगुणा समाम्नायते, आदित्यश्च सुतेजस्त्वगुणः। छान्दोग्ये तु द्यौः सुतेजस्त्वगुणा समाम्नायते, आदित्यश्च विश्वरूपत्वगुणः—तथापि नैतावता विशेषेण विच्छिद्यते, प्रादेशमात्रश्रुतेरविशेषात्, सर्वशाखाप्रत्ययत्वाच्च। संपत्तिनिमित्तां प्रादेशमात्रश्रुतिं युक्ततरां जैमिनिराचार्यो मन्यते॥ ८॥

९. आमनन्ति चैनमस्मिन् १-२-३२

आमनन्ति चैनं परमेश्वरं अक्षिमूर्धचुबुकान्तराले जाबाला 'य एषोऽनन्तोऽव्यक्त आत्मा सोऽविमुक्ते प्रतिष्ठित इति सो विमुक्तः कस्मिन् प्रतिष्ठित इति वरणायां नास्यां च मध्ये प्रतिष्ठित इति। का वै वरणा का च नासी (जा. २) इति। तत्राचेमामेव नासिकां वरणा नासीति निरुच्य पुनरप्यामनन्ति—' कतमाच्चस्य स्थानं भवति भ्रुवोः घ्राणस्य च यः सन्धिः

स एष द्यौर्लोकस्य परस्य च सन्धिर्भवति ' (जाबा-२) इति ॥ तस्मादुपपन्ना परमेश्वरे प्रादेशमात्रश्रुतिः ॥

अभिविमानश्रुतिः प्रत्यगात्मत्वाभिप्राया । प्रत्यगात्मतया स सर्वैः प्राणिभिः अभिविमीयत इति, अभिगतो वाऽयं प्रत्यगात्मा — विमानश्च मानवियोगादि अभिविमिनोति, मीयते वा सर्वं जगत्कारणत्वादित्यभिविमानः । तस्मात् परमेश्वर एव वैश्वानर इति सिद्धम् ॥ ९ ॥

॥ सर्वत्रादृश्यत्वादित्रयोदश ॥

[इति वैश्वानराधिकरणम्]

इति श्री राजाधीराजराजपरमेश्वर गजमृगयाधिराजश्री

वीर प्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्र ह्म सू त्र वृ त्तौ

—प्रथमाध्यायस्य द्वितीयः पादः—

———

प्रथमाध्यायस्य

तृतीयः पादः

[१-द्युभ्वाद्यधिकरणम्]

१ द्युभ्वाद्यायतनं स्वशब्दात् १-३-१

* इदं श्रूयते—'यस्मिन् द्यौः पृथिवी चान्तरिक्षमोतं मनः सह प्राणैश्च सर्वैः । तमेवैकं जानथात्मानमन्या वाचो विमुञ्चथ अमृतस्यैष सेतुः' (मु. २-२-५) इति । अत्र यदेतत् द्युप्रभृतीनां ओतत्ववचनादायतनं किञ्चिदवगम्यते । तत् किं परब्रह्म स्यात् ? आहोस्विदर्थान्तरम् ? इति सन्दिह्यते अर्थान्तरं किमप्यायतनं स्यादिति प्राप्तम् । कस्मात् ? 'अमृतस्यैष सेतुः' (मु. २-२-५) इति श्रवणात् । पारवान् लोके सेतुर्विख्यातः । न च परस्य ब्रह्मणः पारवत्त्वं शक्यमभ्युपगन्तुम्, 'अनन्तमपारम्' (बृ-२-४-१२) इति श्रवणात् । अर्थान्तरे चायतने परिगृह्यमाणे स्मृतिप्रसिद्धं प्रधानं परिगृहीतव्यम्, तस्य कारणत्वादायतनत्वोपपत्तेः ॥

श्रुतिप्रसिद्धो वा वायुः स्यात्, 'वायुर्वै गौतम सूत्रं, वायुना वै गौतम सूत्रेण चायं लोकः परश्च लोकः सर्वाणि च भूतानि सन्दृब्धानि भवन्ति' (बृ. ३-७-२) इति वायोरपि विधरणत्वश्रवणात् ॥

---

* इत्थं द्वितीयपादे अस्पष्टब्रह्मलिङ्गवाक्यानां प्रायश उपास्यत्वेन ब्रह्मणि समन्वयः प्ररूपादि । अधुना तादृशानां वाक्यानां प्रायशो ज्ञेयत्वेन ब्रह्मणि समन्वयं प्रतिपादयितुं तृतीयपादोऽयमारभ्यते । वैश्वानराधिकरणे त्रैलोक्यात्मा वैश्वानरः । परमात्मेत्यभिहितम् । तर्हि त्रैलोक्यायतनमन्यदित्याक्षिप्य समाधानादाक्षेपसंगत्या—इमधिकरणमारभ्यते—स·शि.वृ.

शारीरो वा स्यात्, तस्यापि भोक्तृत्वात् भोग्यं प्रत्यायतनत्वोपपत्तेः—इत्येवं प्राप्ते—

इदमाह—द्युभ्वाद्यायतनमिति। द्यौश्च भूश्च द्युभुवौ। द्युभुवौ आदिः यस्य, तदिदं द्युभ्वादि। यदेतस्मिन् वाक्ये द्यौः पृथिव्यन्तरिक्षं मनः प्राण इत्याद्यात्मकं जगदोतत्वेन निर्दिष्टं परं ब्रह्म भवितुर्हति। कुतः? स्वशब्दात्—आत्मशब्दादित्यर्थः। आत्मशब्दो हीह भवति, 'तमेवैकं जानथ आत्मानम्' (मु. २-२-५) इति। आत्मशब्दश्च परमेश्वरपरिग्रहे सम्यगित्यवकल्प्यते, नार्थान्तरपरिग्रहे। क्वचिच्च स्वशब्देनैव ब्रह्मण आयतनत्वं श्रूयते—'सन्मूलाः सौम्येमाः प्रजाः सदायतनाः सत्प्रतिष्ठाः' (छा. ६-८-४) इति। स्वशब्देनैव चेह पुरस्तादुपरिष्टाच्च ब्रह्म संकीर्त्यते। 'पुरुष एवेदं विश्वं कर्म तपो ब्रह्म परामृतम्' (मु. २-२-११) इति, 'ब्रह्मैवेदं पुरस्ताद्ब्रह्म पश्चात् ब्रह्म दक्षिणतश्चोत्तरेण। अधश्चोर्ध्वं च' (मु. २-२-११) इति च। तत्र त्वायतनायतनवद्भावश्रवणात् 'सर्वं ब्रह्म' इति च सामानाधिकरण्यात्। यथा ह्यनेकात्मको हि वृक्षः, शाखा, स्कन्धः, मूलं चेत्येवं नानारसो विचित्र आत्मेत्याशङ्का भवति, तां निवर्तयितुं सावधारणमाह—'तमेवैकं जानथ आत्मानम्' इति॥

एतदुक्तं भवति—न कार्यप्रपञ्चविशिष्टो विचित्र आत्मा विज्ञेयः। किं तर्हि? अविद्याकृतं कार्यप्रपञ्चं विद्यया प्रविलापयन्तः तमेवैकमायतनभूतमात्मानं विजानीतैकरसमिति। यथा 'यस्मिन्नास्ते देवदत्तः तदानय' इत्युक्ते आसनमेवानयति, न देवदत्तम्, तद्वत् आयतनभूतस्यैवैकरसस्यात्मनो विज्ञेयत्वमुपदिश्यते। विकारानृताभिसन्धस्य चापवादः श्रूयते, मृत्योः स मृत्युमाप्नोति य इह नानेव पश्यति' (क. २-४-११—बृ. ४-४-१९) इति॥

'सर्वं ब्रह्म' इति तु सामानाधिकरण्यं प्रपञ्चविलापनार्थं, नानेकरसताप्रतिपादनार्थम् 'स यथा सैन्धवघनोऽनन्तरोऽबाह्यः कृत्स्नो रसघन एवैवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ. ४-५-१३) इत्येकरसताश्रवणात् । तस्मात् द्युभ्वाद्यायतनं परं ब्रह्म ॥

यत्तूक्तं — सेतुश्रुतेः सेतोश्च पारवत्त्वोपपत्तेः ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमिति — अत्रोच्यते — विधरणत्वमात्रमत्र सेतुश्रुत्या विवक्ष्यते, न पारवत्त्वादि । न हि मृद्दारुमयो लोके सेतुर्दृष्ट इति अत्रापि मृद्दारुमय एव सेतुरभ्युपगम्यते । सेतुशब्दार्थोऽपि विधरणत्वमात्रमेव, न पारवत्त्वादि, षिञो बन्धनकर्मणः सेतुशब्दव्युत्पत्तेः ॥

अपर आह — 'तमेवैकं जानथ आत्मानम्' (मु. २-२-५) इति यदेतत्संकीर्तितं आत्मज्ञानं, यच्चैतत् 'अन्या वाचो विमुञ्चथ' (मु. २-२-५) इति वाग्विमोचनं, तदत्रामृतत्वसाधनत्वात् 'अमृतस्यैष सेतुः (मु. २-२-५) इति सेतुश्रुत्या संकीर्त्यते, न तु द्युभ्वाद्यायतनम् । तत्र यदुक्त — सेतुश्रुतेर्ब्रह्मणोऽर्थान्तरेण द्युभ्वाद्यायतनेन भवितव्यमिति — तदयुक्तम् ॥

२. मुक्तोपसृप्यव्यपदेशाच्च १–३–२

इतश्च परमेव ब्रह्म द्युभ्वाद्यायतनम्, यस्मान्मुक्तोपसृप्यताऽस्य व्यपदिश्यमाना दृश्यते । मुक्तौ उपसृप्यं — मुक्तोपसृप्यम् । देहादिष्वनात्मसु 'अहमस्मि' इत्यात्मबुद्धिः अविद्या । ततस्तत्पूजनादौ रागः । ततस्तत्परिभवादौ द्वेषः । तदुच्छेददर्शनात्तुभयं मोहश्चेत्येवमयमनन्तभेदोऽनर्थव्रातः सन्ततः सर्वेषां नः प्रत्यक्षः । तद्विपर्ययेणाविद्यारागद्वेषादिदोषमुक्तैः उपसृप्यं — उपगम्यं तदिति द्युभ्वाद्यायतनं प्रकृत्य

व्यपदेशो भवति । कथम् ? 'भिद्यते हृदयग्रन्थिः छिद्यन्ते सर्वसंशयाः । क्षीयन्ते चास्य कर्माणि तस्मिन् दृष्टे परावरे' (मु. २-२-८) इत्युक्त्वा-ब्रवीति 'तथा विद्वान्नामरूपाद्विमुक्तः परात्परं पुरुषमुपैति दिव्यम्' (मु. ३-२-८) इति । ब्रह्मणश्च मुक्तोपसृप्यत्वं प्रसिद्धं शास्त्रे । 'यदा सर्वे प्रमुच्यन्ते कामा येऽस्य हृदि श्रिताः । अथ मर्त्योऽमृतो भवत्यत्र ब्रह्म समश्नुते' (बृ. ४-४-७) इत्येवमादौ । प्रधानादीनां न क्वचित् मुक्तोपसृप्यत्वं प्रसिद्धमस्ति ।।

अपि च 'तमेवैकं जानथ आत्मानमन्या वाचो विमुञ्चथ' (मु. २-२-५) इति वाग्विमोचनपूर्वकं विज्ञेयत्वमिह द्युभ्वाद्यायतनस्योच्यते । तच्च श्रुत्यन्तरे ब्रह्मणो दृष्टम् —'तमेव धीरो विज्ञाय प्रज्ञां कुर्वीत ब्राह्मणः । नानुध्यायाद्बहून् शब्दान् वाचो विग्लापनं हि तत्' (बृ. ४-४-२१) इति च । तस्मादपि द्युभ्वाद्यायतनं ब्रह्म ।। २ ।।

३. नानुमतच्छब्दात् १-३-३

यथा ब्रह्मणः प्रतिपादको वैशेषिको हेतुरुक्तः, नैवमर्थान्तरे वैशेषिको हेतुः प्रतिपादकोऽस्तीत्याह । न आनुमानिकं सांख्यादिस्मृतिपरिकल्पितं प्रधानमिह द्युभ्वाद्यायतनत्वेन प्रतिपत्तव्यम् । कस्मात् ? अतच्छब्दात्— तस्याचेतनस्य प्रधानस्य प्रतिपादकः शब्दः—तच्छब्दः । न तच्छब्दः— अतच्छब्दः । न ह्यत्राचेतनस्य प्रधानस्य प्रतिपादकः कश्चिच्छब्दोऽस्ति, येनाचेतनं प्रधानं कारणत्वेनायतनत्वेन वाऽवगम्यत । तद्विपरीतस्य चेतनस्य प्रतिपादकः शब्दोऽत्रास्ति 'यःसर्वज्ञः सर्ववित्' (मु. १-१-९) इत्यादिः ।।

अत एव न वायुरपीह द्युभ्वाद्यायतनत्वेनाश्रीयते ।। ३ ॥

४. प्राणभृच्च १–३–४

यद्यपि प्राणभृतो विज्ञानात्मनः आत्मत्वं चेतनत्वं च संभवति— तथापि उपाधिपरिछिन्नज्ञानस्य सर्वज्ञत्वाद्यसंभवे सति अस्मादेवातच्छब्दात् प्राणभृदपि न द्युभ्वाद्यायतनत्वेनाश्रयितव्यः । न चोपाधिपरिछिन्नस्य अविभोः प्राणभृतो द्युभ्वाद्यायतनत्वमपि सम्यग्भवति । पृथग्योगकरण-मुत्तरार्थम् ।। ४ ।।

कुतश्च न प्राणभृत् द्युभ्वाद्यायतनत्वेनाश्रयितव्यः—

५. भेदव्यपदेशात् १–३–५

'तमेवैकं जानथ आत्मानम्' (मु. २-२-५) इति द्युभ्वाद्याय-तनस्य, मुमुक्षोर्जीवस्य ज्ञातृज्ञेयत्वेन भेदव्यपदेशाच्च न जीवो द्युभ्वाद्याय-तनम् । भेदेन व्यपदेशः—भेदव्यपदेशः ।। ५ ।।

६. प्रकरणात् १–३–६

प्रकरणप्रमाणादपि ब्रह्म द्युभ्वाद्यायतनम् । 'कस्मिन्नु भगवो विज्ञाते' (मु. १-१-३) इति ब्रह्मणः प्रकृतत्वात् ।। ६ ।।

७. स्थित्यदनाभ्यां च १–३–७

किञ्च स्थित्यदनाभ्याञ्च हेतुभ्यां ब्रह्म द्युभ्वाद्यायतनम् । 'द्वासुपर्णौ' (मु. ३-१-१) इत्यत्र ब्रह्मणः 'अनश्नन्नन्यो अभिचाकशीति' इति साक्षित्वेन स्थितात् प्रकृतात् द्युभ्वाद्यायतनात् 'पिप्पलं स्वाद्वत्ति' इति जीवस्य कर्मफलादनश्रवणात् न द्युभ्वाद्यायतनाद्भिन्नस्य जीवस्य तदायतन-त्वमिति तात्पर्यार्थः ।। ७ ।।

सर्वत्र सूत्रकारेणाविद्यासिद्धजीवब्रह्मभेदमाश्रित्य भेदव्यपदेशादिनिरूपणं क्रियते, अन्यथा श्रुतिविरोधप्रसङ्गात् ॥ ७ ॥

[इति द्युभ्वाद्यधिकरणम्]

———

[२· भूमाधिकरणम्]

१. भूमा संप्रसादादध्युपदेशात् १–३–८

* 'यत्र नान्यत्पश्यति नान्यच्छृणोति नान्यद्विजानाति स भूमा' (छा. ७-२४-१) इत्यादौ किं भूमा प्राणः ? उत परमात्मा ? इति संशये—प्राणस्य भूमतामुपदिश्य भूयः प्रश्नप्रतिवचनादर्शनात् प्राणे प्राप्ते—

सिद्धान्तः— परमात्मैव भूमा भवितुमर्हति, न प्राणः । कुतः ? संप्रसादादध्युपदेशात् संप्रसाद इति सुप्तिस्थानमुच्यते । तस्मिन् प्राणो जागर्तीति प्राणः—संप्रसादः । तस्मादूर्ध्वं भूम्न उपदिश्यमानत्वादित्यर्थः ॥

'एष तु वा अतिवदति यः सत्येनातिवदति' (छा. ७-१६-१) इत्यस्यां श्रुतौ सत्यवदनेनातिवादित्वं प्रतीयते । प्रकरणात् प्राणविज्ञानसंबन्धे कल्प्यमानेऽतिवादित्वश्रुतिर्बाधिता स्यात् । तुशब्देन च प्रकृतव्यावृत्तिः प्रतीयते । ततश्च ब्रह्मैव परमार्थरूपत्वात्, 'सत्यं ज्ञानम्' (तै. आ. १) इति श्रुतिप्रसिद्धत्वाच्च सत्यशब्देनोच्यते ॥

यत्तु 'अस्ति भगवो नाम्नो भूयः' (छा. ७-१-५) इत्यादिप्रश्नप्रतिवचनप्रवाहं 'अस्ति भगवः प्राणाद्भूयः' इति भूयः प्रश्नप्रतिवचनादर्शनात्

---

* पूर्वमात्मशब्दात् द्युभ्वाद्यायतनं ब्रह्मेत्युक्तम् । तन्न; 'तरति शोकमात्मवित्' इत्यत्राब्रह्मणि प्राणेऽपि आत्मशब्दप्रयोगादित्याक्षेपसंगत्येदमाह—स-शि.वृ.

प्राण एव भूमेति—तदयुक्तम्—प्रकृतसंबन्धासंभवकारित्वात् अर्थान्तर-विवक्षायाः ॥ २ ॥

२. धर्मोपपत्तेश्च १–३–९

किञ्च 'यत्र नान्यत्पश्यति' (छा. ७-२४-१) इत्यादिधर्माणां ब्रह्मण्येवोपपत्तेः ब्रह्मैव भूमा। ब्रह्मण्येव 'यत्र त्वस्य' (बृ. ४-५-१५) इत्यादिश्रुतौ दर्शनादिव्यापारस्य वारितत्वात्। तथा सत्यत्वं स्व महिमप्रतिष्ठितत्वमित्येवमादयो धर्मा ब्रह्मण एव भूम्नोऽवकल्प्यन्ते ॥ २ ॥

[इति भूमाधिकरणम्]

[३. अक्षराधिकरणम्]

१. अक्षरमम्बरान्तधृतेः १–३–१०

* 'कस्मिन्नु खल्वाकाश ओतश्च प्रोतश्चेति। स होवाचैतद्वै तदक्षरं गार्गि ब्राह्मणा अभिवदन्ति' (बृ. ३-८-७) इत्यादिश्रुतौ किं अक्षरपदेन वर्णस्य ग्रहणम्? किं वा परमात्मनः? इति संशये—रूढेर्वर्णग्रहणप्राप्तौ—

सिद्धान्तः—परमेव ब्रह्माक्षरशब्दमिति। कस्मात्? अम्बरान्त-धृतेः पृथिव्यादेराकाशान्तस्य विकारजातस्य धारणादित्यर्थः। न क्षरति, अश्नुते वा स्वकार्याणीति ब्रह्मैवाक्षरशब्दमिति ॥ १ ॥

---

* पूर्वं सत्यशब्दस्य ब्रह्मणि रूढत्वात् भूमा ब्रह्मेत्युक्तम्। तद्वदिहाप्यक्षर-शब्दस्य वर्णे रूढत्वात् वर्ण एवाक्षरमस्त्विति दृष्टान्तसंगत्येदमाह—स-शि.वृ.

ननु मा स्तु वर्णोऽक्षरशब्दः । प्रधानं तुभवत्येवेति । नेत्याह—

२. सा च प्रशासनात् १–३–११

सा चाम्बरान्तधृतिः परमेश्वरस्यैव कर्म, न प्रधानस्य । कुतः ? प्रशासनात्—'एतस्यैवाक्षरस्य प्रशासने गार्गी सूर्याचन्द्रमसौ विधृतौ तिष्ठतः' (बृ. ३-८-९) इत्यादिप्रशासनं ब्रह्मण एव युज्यते, नाचेतनस्य प्रधानस्य ।। २ ।।

३. अन्यभावव्यावृत्तेश्च १–३–१२

अन्यस्य भावः—अन्यभावः, तस्माद्व्यावृत्तिः । अन्यभावव्यावृत्तिः । अन्यभावव्यावृत्तेरपि हेतोरक्षरं ब्रह्मैव भवितुमर्हति । ब्रह्मणो यदन्यत् प्रधानादि, अक्षरं चोच्यते, तद्भावादिदं अम्बरान्तविधरणं अक्षरं व्यावर्तयति । 'एतद्वै तदक्षरं गार्ग्यदृष्टं द्रष्टृश्रुतं' (बृ. ३-८-९) इत्यादिवाक्यम् ।। ३ ।।

[इति अक्षराधिकरणम्]

[४. ईक्षतिकर्माधिकरणम्]

१. ईक्षतिकर्मव्यपदेशात्सः—१–३–१३

* 'यः पुनरेतं त्रिमात्रेणोमित्येतेनैवाक्षरेण परं पुरुषमभिध्यायीत' (प्र. ५-२) इति श्रुतौ किं अपरं ब्रह्म ध्येयम् ? उत परं ब्रह्म ? इति

---

* पूर्वं वर्णे रूढस्याक्षरस्य जगद्धृतिलक्षणलिङ्गेन ब्रह्मणि 'न क्षरति' इति योगवृत्तिराश्रिता । तद्वदिहापि देशपरिच्छिन्नफलश्रुतिलिङ्गेन परशब्दस्य आपेक्षिकपरत्वविशिष्टे हिरण्यगर्भे वृत्तिरस्त्विति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

संशये—'स तेजसि सूर्ये संपन्नः' इति दिग्देशविशेषसंबन्धश्रवणात् अपरं ब्रह्मेति प्राप्ते—

सिद्धान्तः—परमेव ब्रह्मेहाभिध्यातव्यमुपदिश्यते। कुतः? ईक्षतिकर्मव्यपदेशात्—'स एतस्माज्जीवघनात्परात्परं पुरिशयं पुरुषमीक्षते' (प्र. ५-५) इति ईक्षतेः-दर्शनस्य कर्मत्वेन—व्याप्तत्वेन व्यपदेशादित्यर्थः। ततश्च स एवेह परपुरुषशब्दाभ्याममभिध्यातव्यः प्रत्यभिज्ञायते॥

क्रममुक्त्यभिप्रायत्वाच्चोङ्कारोपासनस्य देशविशेषसंबन्धपरिच्छिन्नफलत्वादिकं न दोषाय॥ १॥

[इति ईक्षतिकर्माधिकरणम्]

[५. दहराधिकरणम्]

१. दहर उत्तरेभ्यः—१-३-१४

'अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तर आकाशः' (छा. ८-१-१) इति श्रुतौ दहराकाशपदेन किं भूताकाशमुच्यते? उत परं ब्रह्म? इति संशये—'यावान्वा अयमाकाशः' (छा. ८-१-३) इत्यादिभूताकाशसाम्यश्रुतेः दहरपदेनाल्पत्वप्रतीतेश्च भूताकाशप्राप्तौ—

सिद्धान्तः—परमेश्वर एवायं दहराकाशो भवितुमर्हति। कुतः? उत्तरेभ्यः-वाक्यशेषगतेभ्यो हेतुभ्यः। ह्यदाकाशस्य द्यावापृथिव्याश्रयत्वं अपहतपाप्मत्वादिकं वाक्यशेषे श्रूयमाणं दहराकाशस्य ब्रह्मत्वे घटते। आकाशशब्दस्य भूताकाशे रूढत्वेऽपि तेनैव तस्योपमानोपमेयभावायोगात् भूताकाशशङ्का निवर्तिता भवति॥ १॥

उत्तरेभ्यो हेतुभ्य इति यदुक्तं, तत् विवृणोति—

२. गतिशब्दाभ्यां तथा हि दृष्टं लिङ्गं च १-३-१५

दहरवाक्यशेषे परमेश्वरस्यैव प्रतिपादकौ गतिशब्दौ भवतः— 'इमाः सर्वाः प्रजाः अहरहर्ब्रह्मलोकं गच्छन्त्य एतं ब्रह्मलोकं न विन्दन्ति' (छा. ८-३-२) इति प्रजाशब्दवाच्यानां जीवानां प्रकृतदहरे ब्रह्मशब्दवाच्ये या गतिः सा तस्य दहरस्य ब्रह्मतां गमयति। ब्रह्मलोकशब्दोऽपि तस्य ब्रह्मत्वे घटते, न दहरस्य भूताकाशत्वे, संसारित्वे वा ॥

तथाहि श्रुत्यन्तरे 'सता सोम्य तदा संपन्नो भवति' (छा. ६-७-१) इत्यादौ जीवस्य ब्रह्मगमनं दृष्टम्। प्रजानामहरहर्ब्रह्मलोकगमनमपि ब्रह्मशब्दस्य परब्रह्मत्वे लिङ्गम्, कार्यब्रह्मणि प्रजानां नित्यं गमनादर्शनात् ॥ २ ॥

३. धृतेश्च महिम्नोऽस्यास्मिन्नुपलब्धेः १-३-१६

किञ्च, 'अथ य आत्मा स सेतुर्विधृतिरेषांलोकानामसंभेदाय' (छा. ८-४-१) इतिश्रुतौ विधृतिलक्षणस्य महिम्नः दर्शनात् दहरः परमेश्वरः। अयं च महिमा श्रुत्यन्तरात् परमेश्वर एवोपलभ्यते— एष भूतपाल एष सेतुर्विधरण एषां लोकानामसंभेदाय' (बृ. ४-४-२२) इत्यादेः ॥ ३ ॥

४. प्रसिद्धेश्च १-३-१७

किञ्च 'आकाशो ह वै नामरूपयोर्निर्वहिता' (छा. ८-१-४) इत्यादौ आकाशशब्दस्य परब्रह्मणि प्रसिद्धेरपि हेतोः दहरः परमेश्वरः ॥ ॥

५. इतरपरामर्शात्सदिति चेन्नासंभवात् १-३-१८

'अथ य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय' (छा. ८-३-४) इत्यादौ शरीरव्यपाश्रयस्य संसारिणः समुत्थानसंभवात् वाक्यशेषे जीवपरामर्श इति चेत्—न—न ह्यपहतपाप्मत्वादयो जीवे संभवन्ति ।। ५ ।।

६. उत्तराच्चेदाविर्भूतस्वरूपस्तु १-३-१९

'य एषोऽक्षिणि पुरुषो दृश्यते' (छा. ८-७-४) इत्युत्तरात् प्रजापतिवाक्यादपहतपाप्मत्वादिगुणकस्याक्षिस्थानत्वनिर्देशात् दहरो जीव इति चेत् कश्चित् ब्रूयात्— तं प्रति ब्रूयात्—अविर्भूतस्वरूपस्त्विति । तुशब्दः प्राप्तां शङ्कां निराकरोति । प्रजापतिवाक्येऽप्याविभूतस्वरूपो जीवो विवक्ष्यते । अविर्भूतं स्वरूपमस्येत्यविर्भूतस्वरूपः भूतपूर्वगत्या जीववचनः अक्षिपुरुषस्य स्वप्नसुषुप्तोपन्यासक्रमेण 'परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छा. ८-३-४) इति पारमार्थिकब्रह्मरूपतया व्यख्यातत्वात् । अत एवापहतपाप्मत्वादिकं तस्य घटते ।। ६ ।।

तर्हि जीवपरामर्शो निरर्थक इति—तत्राह—

७. अन्यार्थश्च परामर्शः १-३-२०

अन्यार्थोऽयं जीवपरामर्शः न जीवमात्रपर्यवसायी । किं तर्हि ? परमेश्वरस्वरूपपर्यवसायीत्यपहतपाप्मात्वादिगुणकः दहरः परमेश्वर एवोपास्यः, न जीवः ।। ७ ।।

८. अल्पश्रुतेरिति चेत्तदुक्तम् १-३-२१

'दहरोऽस्मिन्नन्तर आकाशः' (छा. ८-१-१) इति दहरत्वं अल्पत्वं श्रूयमाणमाराग्रमात्रे जीव एव कल्पते, न परमेश्वर इति चेत् कश्चिद्ब्रूयात्—तस्योत्तरं—तदुक्तमिति। उपासनायाल्पत्वमिति 'अर्भकौकस्त्वात्' (ब्र. सू. १-२-७) इत्यादिसूत्रे प्रतिपादितम्॥

अथवा 'यावान्वायमाकाशः (छा. ८-७-२) इति श्रुत्यैवैतदल्पत्वं प्रत्युक्तं, महाकाशसमत्वासंभवप्रसङ्गात् ॥ ८॥

[इति दहराधिकरणम्]

[६. अनुकृत्यधिकरणम्]

९ अनुकृतेस्तस्य च १-३-२२

*'तमेव भान्तमनुभाति सर्वं तस्य भासा सर्वमिदं विभाति' (क. २-२-१०) इति श्रूयते। अत्र यं भान्तं अनुभाति सर्वं, यस्य च भासा सर्वमिदं विभातीति यस्तेजोधातुरुक्तः, स किं सूर्यादिसमः कश्चित्तेजोधातुः? उत परमात्मा? इति संशये समानस्वभावेषु अनुकारदर्शनात् तेजोधातुः कश्चित् सूर्यादिसम इति प्राप्ते—

राद्धान्तः—प्राज्ञ एवायमात्मा भवितुमर्हति। कुतः अनुकृतेः। अनुकृतिः—अनुकरणम्। यदेतत् 'तमेव भान्तमनुभाति सर्वं' इत्यनुभानं, तत् प्राज्ञपरिग्रहेऽवकल्पते, 'भारूपः सत्यसंकल्पः' (छा. ३-१४-२)

---

* पूर्वं 'परं ज्योतिरुपसंपद्य' इति वाक्यार्थविचारप्रसङ्गात्—प्रसङ्गसंगत्येदमाह—स·शि वृ.

इत्यादिभारूपत्वश्रुतेः । 'तस्य च' इतिपदेन तस्य भासा सर्वमिदं विभाति' इति प्रज्ञाऽवभासहेतुकं सूर्यादिसर्वतेजःप्रतिभानमिति सूचितम् ॥

यच्च समानस्वभावेष्वेवानुकरणमिति, तदप्यनियतम् 'सुतप्तोऽयः-पिण्डः अग्निं दहन्तमनुदहति' इत्यादौ भिन्नस्वभावस्याप्यनुकार-दर्शनात् ॥ १ ॥

२. अपि स्मर्यते १–३–२३

ब्रह्मणः स्वयंज्योतिस्स्वरूपत्वात् तद्भानाधीनं सर्वप्रतिभानमित्येतत् गीतायामपि स्मर्यते 'न तद्भासयते सूर्यः' (गी. १५-६) इत्यादि-श्लोकैः ॥ २ ॥

[इति अनुकृत्यधिकरणम्]

[७. प्रमिताधिकरणम्]

१. शब्दादेव प्रमितः १–३–२४

* 'अङ्गुष्ठमात्रः पुरुषः मध्य आत्मनि तिष्ठति' (क. २-१-१२) इति श्रूयते । तथा 'अङ्गुष्ठमात्रः पुरुषो ज्योतिरिवाधूमकः । ईशानो भूतभव्यस्य स एवाद्य स उ श्वः' (क. २-१-१३) इति च । अत्र

---

* पूर्वं अनुमानादिना लिङ्गेन तत्रेति विषयसप्तमीं कृत्वा 'न भाति' इत्यादौ णिजध्याहारेण 'न भासयति' इत्यर्थो वर्णितप्रायः । तथेहापि 'अङ्गुष्ठ-मात्रः' इति परिमाणलिङ्गाज्जीवमादाय 'ईशानोऽस्मीति भावयेत्' इति विध्य-ध्याहारेण पास्तिपरमंगुष्ठवाक्यमस्त्विति दृष्टान्तसंगत्येदमाह स.शि.वृ.

अङ्गुष्ठमात्रः पुरुषः किं जीवात्मा ? उत परमात्मा ? इति संशये—परिमाणश्रुतेः जीवप्राप्तौ—

सिद्धान्तः—परमात्मैवाङ्गुष्ठमात्रः पुरुषो भवितुमर्हति । कुतः ? शब्दादेव प्रमितः—शब्दात्तस्यैव प्रमितत्वात् । न हि जीवस्य भूतभव्यं प्रति निरङ्कुशमीशितृत्वं घटते ।। १ ।।

कथं तर्हि परमात्मनः परिमाणोपदेशः ? इति तत्राह—

२. हृद्यपेक्षया तु मनुष्याधिकारत्वात् १-३-२५

सर्वगतस्यापि परमात्मनो हृदयेऽवस्थानमपेक्ष्य अङ्गुष्ठमात्रत्वमिदमुच्यते, आकाशस्येवांशपर्वापेक्षया ।।

ननु प्राणिभेदादङ्गुष्ठमात्रत्वमनियतमिति । नेत्याह—मनुष्याधिकारत्वात् । शास्त्रं ह्यविशेषप्रवृत्तमपि मनुष्यानेवाधिकरोति. तच्छास्त्रविहितकर्मानुष्ठाने तेषामेव शक्तत्वात् , अर्थित्वादिसंभवाच्च, उपनयनादिशास्त्राच्च ।।

ननु मनुष्यहृदयापेक्षयाऽङ्गुष्ठमात्रत्वेऽपि परिमाणोपदेशात् कथं परमात्माऽवगतिरिति—उच्यते—'स आत्मा तत्त्वमसि' (छा. ६-८-७) इत्यादिवत् संसारिण एव सतोऽङ्गुष्ठमात्रस्य ब्रह्मत्वमिदमुपदिश्यते, 'ईशानो भूतभव्यस्य' इति विशेषणात् , न त्वङ्गुष्ठमात्रत्वमुपदिश्यते ।। २ ।।

[इति प्रमिताधिकरणम्]

———

[८. देवताधिकरणम्]

१. तदुपर्यपि बादरायणः संभवात् १-३-२६

* यदि मनुष्याधिकारं शास्त्रं, तर्हि देवानां तत्राधिकाराभावात् 'तद्यो यो देवानां प्रत्यबुध्यत' (बृ. १-४-१०) इत्यादिक्रममुक्तिवाक्यानामप्रामाण्यं स्यादिति चोद्यमनेनाधिकरणेन निरस्यते ।।

तच्छब्दे मनुष्यस्य ग्रहणम् । तेषां— मनुष्याणामुपरि ये देवादयः, तानप्यधिकरोति शास्त्रमिति बादरायण आचार्यो मन्यते । कस्मात् ? संभवात् । संभवति हि तेषामपि अर्थित्वादि अधिकार कारणं मोक्षविषयम्, मन्त्रार्थवादादिभिः तेषां विग्रहवत्त्वप्रतीतेः सामर्थ्यमपि संभवति । उपनयनाभावेऽपि स्वप्रतिभातत्वात्, तदभावोऽपि नाधिकारबाधकः ॥ १ ॥

२. विरोधः कर्मणीति चेन्नानेकप्रतिपत्तेर्दर्शनात् १-३-२७

सामर्थ्यसिद्ध्यर्थं देवानामृषीणां च विग्रहवत्त्वेऽभ्युपगम्यमाने तेषामृत्विगादिवत् सन्निधानेन यागाङ्गभावः स्यात् । न चैकस्येन्द्रस्य युगपदनेककर्माङ्गभावः संभवतीति कर्मणि विरोधप्रसङ्ग इति चेत्— नायमस्ति विरोधः—कस्मात् ? अनेकप्रतिपत्तेः— एकस्यापि देवस्य युगपदनेक रूपप्रतिपत्तेः संभवात् ।।

कथं संभव इति—तत्राह— 'दर्शनात्' इति । श्रुतौ स्मृतौ च दर्शनादित्यर्थः । 'कति देवाः' (बृ. ३-९-१) इत्युपक्रम्य 'त्रयश्च

---

* अंगुष्ठमात्रश्रुतिः मनुष्यहृदयापेक्षया, मनुष्याधिकारत्वाच्छास्त्रस्येत्युक्तं, तत्प्रसङ्गेनेदमुच्यते—शं.भा.

त्री च शता त्रयश्च त्री च सहस्रा:' (बृ. ३.०.१) इति निरुच्य, 'कतमे ते' इत्यस्यां पृच्छायां 'महिमान एवैषामेते त्रयस्त्रिंशत्त्वेव देवा:' (बृ. ३-९-२) इत्यादिश्रुतौ एकदेवस्यानेकरूपवत्त्वं दृश्यते। 'आत्मनो वै शरीराणि' इत्यादिस्मृतौ च ॥

यथा चैको ब्राह्मणो बहुभिर्निमन्त्र्यमाणो युगपदनेककर्माङ्गभावमुपगतो दृश्यते तथा विग्रहवतीमप्येकां देवतामुद्दिश्य बहवः स्वं स्वं द्रव्यं युगपत्परित्यजन्तीति युज्यते ॥ २ ॥

३. शब्द इति चेन्नातःप्रभवात्प्रत्यक्षानुमानाभ्याम् १-३-२७

देवादीनां विग्रहवत्त्वेऽप्यैश्वर्ययोगात्कर्मण्यविरोधेऽपि जन्ममरणसंभवात् शब्दार्थयोर्नित्यसम्बन्धे प्रलीयमाने ह्यौत्पत्तिकं शब्दस्यार्थेन सम्बन्धमाश्रित्यानपेक्षत्वलक्षणं प्रमाण्यं भज्येतेति शब्दे विरोध इति चेत् — न — कुतः? अतः प्रभवात् — अत एव वैदिकाच्छब्दात् देवादिकं तज्जगत् प्रभवति ॥

एतदुक्तं भवति — द्रव्यगुणकर्मणां व्यक्तय उत्पद्यन्ते, नाकृतयः। आकृतिभिश्च शब्दानां सम्बन्धः, न व्यक्तिभिः। व्यक्तीनामानन्त्याक्ताभिः सह शब्दानां संबन्धानुपपत्तेः। तत्रैवं सति व्यक्तिषूत्पद्यमानासु आकृतीनां नित्यत्वात् यथा गवादिशब्देषु न कश्चिद्विरोधः तथा देवादिव्यक्तिप्रभवाभ्युपगमेऽपि आकृतिनित्यत्वान्न कश्चिद्विरोधः वस्वादिशब्देष्वपीति ॥

न चेदं शब्दप्रभवत्वं ब्रह्मप्रभवत्ववत् उपादानकारणाभिप्रायेणोच्यते। कथं तर्हि? स्थिते वाचकात्मना नित्यशब्दे नित्यार्थसम्बन्धिनि शब्दव्यवहारयोग्यार्थव्यक्तिनिष्पत्तिरित्यतः प्रभव इत्युच्यते। ततश्च न जन्मादिसूत्रविरोधः ॥

शब्दप्रभवं जगदित्यत्र प्रमाणमाह—प्रत्यक्षानुमानाभ्याम् । प्रत्यक्षं हि श्रुतिः, प्रामाण्यं प्रत्यनपेक्षत्वात् । अनुमानं हि स्मृतिः, प्रामाण्यं प्रति सापेक्षत्वात् । ते शब्दपूर्वां सृष्टिं दर्शयतः । 'एत इति वै प्रजापतिर्देवानसृजतासृग्रमिति मनुष्यान्' इत्याद्या श्रुतिः । 'सर्वेषां च स नामानि कर्माणि च पृथक्पृथक् । वेदशब्देभ्य एवादौ पृथक्संस्थाश्च निर्ममे' इत्यादिः स्मृतिः । ततश्च नित्येभ्यः शब्देभ्यः देवादिव्यक्तीनां प्रभव इति सिद्धम् ।। ३ ।।

४. अत एव च नित्यत्वम् १-३-२९

अत एव च—नित्याकृतेर्देवादेर्जगतः वेदशब्दप्रभवत्वात् वेदशब्दनित्यत्वमपि वेदितव्यम् । न ह्यनित्याद्वेदात् जगत् उत्पत्तुमर्हति, तस्याप्युत्पत्तिमत्त्वेन सापेक्षत्वात् । तस्माद्वेदः जगदुत्पत्तिहेतुत्वात् ईश्वरवन्नित्य इति सिद्धम् । 'यज्ञेन वाचःपदवीयमायन्तामन्वविन्दन्नृषिषु प्रविष्टाम्' (ऋ. सं. १०-७९-३) इत्यादिवेदवाक्यान्यपि स्थितामेव वाचमनुविन्नां दर्शयन्ति ।।

कर्तृस्मरणादिभिः प्राच्यां मीमांसायां साधितस्य वेदनित्यत्वस्य प्रपञ्चोऽयम् ।। ४ ।।

५. समाननामरूपत्वाचावृत्तावप्यविरोधो दर्शनात् स्मृतेश्च १-३-३

ननु कथं प्रलये निरन्वयविनाशाङ्गीकारे पुनःसृष्टावपूर्वोत्पादनादभिधानाभिधेयावत्यन्तमुच्छिन्नाविति शब्दार्थसम्बन्धोऽनित्यः प्रसक्तः । अध्यापकाध्येतृसन्तानविच्छेदे च किमाश्रयो वेदश्च स्यादिति सोऽपि लुप्तः पुनरन्यथा सृष्ट्यन्तरे कल्प्येतेति सर्वमर्यादाभङ्ग इति चोद्यस्योत्तरमिदं सूत्रम् ।

समाननामरूपवत्त्वाच्च आवृत्तावपि महासर्गप्रलयलक्षणायां जगतोऽभ्युपगम्य-मानायां न कश्चिच्छब्दप्रामाण्यविरोधः । कुतः ? दर्शनात्—समाननाम-रूपवत्तायाः श्रुतौ दर्शनात्, 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत् । दिवं च पृथिवीं चान्तरिक्षमथो सुवः' (ऋ. सं. १०-१९०'३ तै. महा ५७) इति ।।

स्मृतेश्चायमर्थोऽवगम्यते—'ऋषीणां नामधेयानि याश्च वेदेषु दृष्टयः । शर्वर्यन्ते प्रसूतानां तान्येवेभ्यो ददात्यजः' इत्यादेः ।।

न महाप्रलये निरन्वयविनाशः, अनादिभावरूपानिर्वाच्याविद्यायां सूक्ष्मेण शक्तिरूपेण कर्मविक्षेपाविद्यावासनाभिः सद्भावावस्थानस्य समस्त-जगतोऽङ्गीकारात् । तथाच स्मृतिः—'आसीदिदं तमोभूतमप्रज्ञातम-लक्षणम् । अप्रतर्क्यमविज्ञेयं प्रसुप्तमिव सर्वतः' (म-स्मृ-१) इति ।

ततश्चेश्वरात्सकलवेदादिप्रपञ्चमण्डलस्य सर्गप्रलयाङ्गीकारेऽपि तत्प्र-वाहस्यानादित्वमन्तरेणानुपपत्तेः संसारस्यानादिता सिद्धेति शब्दार्थयोरभिधा-नाभिधेयसम्बन्धसिद्धिः । परमेश्वरानुगृहीतानां हिरण्यगर्भादीनामीश्वराणां सुप्तप्रबुद्धवत् कल्पान्तरव्यवहारानुसंधानोपपत्तेः । उपाध्यायात् माणवक इव परब्रह्मणो मायाविनः सकाशात् तस्य श्वासप्रायान् वेदान् पठन्ति न अध्यापकाध्येतृसन्तानविच्छेदात् वेदो यथापूर्वं सिद्ध्यतीति सर्वमनाकुलम् । तथा च श्रुतिः—'यो ब्रह्माणं विदधाति पूर्वं यो वै वेदांश्च प्रहिणोति तस्मै । तं ह देवमात्मबुद्धिप्रकाशं मुमुक्षुर्वै शरणमहं प्रपद्ये (श्वे. ६-१८) इति ।

तदेवं प्रत्यग्ब्रह्मव्यतिरिक्तवेदादिसर्वप्रपञ्चस्य नित्यानित्यभूतयोर्जा-तिव्यक्त्योश्च नित्यस्य शब्दार्थसंबन्धस्यात्मनिश्चयात्प्रागविद्यावदनादेर्वेदान्त-वाक्यश्रवणाविर्भूतप्रत्यग्ब्रह्मापरोक्षज्ञानादविद्यानिवृत्तौ निवृत्तिः सिद्ध्यति ।

तथा च श्रुतिः—'एकमेवाद्वितीयं ब्रह्म' (छा. ६-२-१) 'नेह नानास्ति किञ्चन' (बृ. ४-४-१९) इति ॥५॥

६. मध्वादिष्वसंभवादनधिकारं जैमिनिः १-३-३१

देवानां ब्रह्मविद्यायामनधिकारं जैमिनिराचार्यो मन्यते। कुतः? मध्वादिष्वसंभवात्। 'असौ व आदित्यो देवमधु' (छा. ३-१-१) इत्यादिमधुविद्यायां यथा मनुष्याणामधिकारः, न तथाऽऽदित्यस्य, स्वव्यतिरिक्तादित्यासंभवात् न मधुविद्यायामधिकारः ॥

किञ्च मधुविद्यायां वस्वाद्युपजीव्यामृतफलवसुत्वप्राप्तिः वसूनां न घटते। एवं रुद्रादीनामपि द्रष्टव्यम् ॥ ६ ॥

७. ज्योतिषि भावाच्च १-३-३२

पूर्वसूत्रे यथासंभवमधिकार उक्तः। अस्मिन् सूत्रे न विद्यामात्रेऽपि तेषामधिकार उच्यते ॥

लौकिक्यौ ह्यादित्यादिशब्दप्रयोगप्रत्ययौ ज्योतिर्मण्डलादिषु दृष्टौ। अतो नैषां चैतन्याभावात् ब्रह्मविद्याधिकारः। अर्थवादादीनां विधिशेषत्वान्न देवानां विग्रहादिप्रतिपादनपरत्वम् ॥ ६ ॥

अत्राह सिद्धान्ती—

८. भावं तु बादरायणोऽस्ति हि १-३-३३

तुशब्दः पक्षं व्यावर्तयति। बादरायणस्त्वाचार्यो भावं अधिकारस्य देवादीनामपि मन्यते। कुतः? अस्ति हि—मध्वादिविद्यायामधिकाराभावेऽपि देवानां ब्रह्मविद्यायामधिकारः संभवत्वेव, अर्थित्वादीनां संभवात्।

न ह्येकत्रासंभवोऽन्यत्रासंभवमाक्षिपति, अतिप्रसङ्गात् । न हि ब्राह्मणस्य राजसूयाधिकारो नास्तीति ज्योतिष्टोमादावप्यनधिकारः 'तद्यो यो देवानां प्रत्यबुध्यत स एव तदभवत्' (बृ. १-४-१०) इति देवानां अधिकारश्रवणाच्च ।।

न चाचेतनत्वात् विग्रहवत्त्वाद्यभावाच्च तेषामनधिकारः, अर्थवादादिषु चेतनत्वविग्रहवत्त्वादिप्रतीतेः 'तुविग्रीवो वपोदरः । सुबाहुरन्धसो मदः' इत्यादिषु । अत्र च 'आदित्यो यूपो भवति' इति वाक्यं प्रमाणान्तरविरोधात् गुणवादेन नीयेत । यत्र तु विधिशेषभूतेऽपि वाक्ये देवता, विग्रहवत्त्वादिः प्रतीयते, तत्र प्रमाणान्तरविरोधाभवात् न गुणवादः, मुख्यार्थे संभवति गुणवादकल्पनायामतिप्रसङ्गात् ।।

अथाभिन्नमेतद्वाक्यं, तथा सति तात्पर्यभेदोऽपीति चेत्—न—द्वारतोऽपि तदवगतौ तात्पर्यान्तरकल्पनाया अयोगात् । यत्र यस्य न तात्पर्यं तत्र तस्याप्रामाण्यमिति चेत्—तथाच सति विशिष्टपरमपि न स्यात् विशेषणाविषयत्वात् । विशिष्टविषयत्वेन तदाक्षेपे परस्पराश्रयत्वं, आक्षेपाद्विशेषणप्रतिपत्तौ तस्माद्विशिष्टविषयत्वं, विशिष्टविषयत्वाच्च तदाक्षेप इति । तस्मात् विशिष्टप्रत्ययपरेभ्यो विशेषणानि प्रतीयमानानि तस्यैव वाक्यस्य विषयत्वेनानिच्छताऽप्यभ्युपेयानि यथा, तथाऽन्यपरेभ्योऽर्थवादवाक्येभ्यो देवताविग्रहादयः प्रतीयमानाः मानान्तराविरोधेन....देवानां ब्रह्मविद्याधिकारः सिद्धः ।। ७ ।।

[इति देवताधिकरणम्]

———

[अपशूद्राधिकरणम्]

१. शुगस्य तदनादरश्रवणात् तदाद्रवणात् सूच्यते हि १-३-२४

* यदि देवानां स्वयं प्रतिभातत्वात् उपनयनाद्यभावेऽपि वेदविहित-ब्रह्मविद्यायामधिकारः, तर्हि शूद्रस्यापि पुस्तकपाठादिना प्राप्तवेदस्य सामर्थ्य-संभवात्, निर्मृष्टनिखिलदुःखपरमानन्दरूपे मोक्षेऽर्थित्वसंभवाच्च, 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' (तै. सं. ७-१-१-७) इतिवत् 'ब्रह्मविद्यायामनवक्लृप्तः' इत्यश्रवणात् शास्त्रापर्युदस्तत्वाच्चास्ति ब्रह्मविद्यायामधिकार इति शङ्कां निराकर्तुमिदमधिकरणम् ॥

'अह हारे त्वा शूद्र तवैव सह गोभिरस्तु' (छा. ४-२-३) इति श्रूयते। अस्याः श्रुतेरयमर्थः—अहेति निपातः साटोपं सामन्त्रणे हारे त्वा गन्त्री–रथः हारिः सह इत्वा गोभिश्च सह तवैवास्त्विति ॥

अस्यां श्रुतौ शूद्रशब्दः किं प्रसिद्धं शूद्रमभिदध्यात्? किं वा क्षत्रियाद्यशूद्रम्? इति संशये—अवयवप्रसिद्धितो रूढेर्बलवत्त्वात्, सामर्थ्यादिसंभवाच्च ब्रह्मविद्याऽधिकारिणं प्रसिद्धं शूद्रमभिदध्यात्—इति प्राप्ते—

सिद्धान्तः—न ह्यत्र शूद्रशब्दः प्रसिद्धशूद्रपरः, यतो जानश्रुतिर्ह पौत्रायणः श्रद्धादेयो बहुदायी बहुपाक्यः प्रियातिथिः बहुपक्ता—इत्यादिवाक्येषु क्षत्रियत्वलिङ्गात्, प्रकरणाच्च जानश्रुतेः पौत्रायणस्य न शूद्रत्वम्। अवयववृत्त्या तत्र शूद्रशब्दः प्रयुक्तः। अवयववृत्तिं वक्तुं निमित्तमाह—शुगस्येति। 'कम्वर एनमेतत्सन्तं सयुग्वानं रैक्वमिवात्थ' (छा. ४-१-३)

---

* पूर्वं यथा 'तद्यो यो देवानां' इति देवशब्दश्रुत्या मनुष्याधिकारमियमापवादेन देवानामधिकार उक्तः, तथेह शूद्रशब्दश्रुत्या द्विजजात्यधिकारनियममपोद्य शूद्रस्याप्यधिकारोऽस्त्विति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

इत्येतस्माद्धंसवाक्यात् आत्मनोऽनादरं श्रुतवतो जानश्रुतेः पौत्रायणस्य शुगुत्पेदे । वराकोऽयं जानश्रुतिः किमित्याक्षेपे, यस्मादयं वराकः तस्मात्कमेतं किमेतं—किंभूतमेतं सन्तं-प्राणिमात्रं रैक्वमिव सयुग्वानमात्थ । युग्वा—गन्त्री—शकटी, तया सह वर्तत इति । सयुग्वानमिव—रैक्वमिव किमेनं जानश्रुतिमात्थ ? रैक्वस्य तु ब्रह्मविदो भगवतो ज्योतिरशक्यं लङ्घितुमिति हंसवाक्यस्यार्थः ॥

स तु राजा विषण्णमानसो हंसवाक्यात् ब्रह्मज्ञानाय रैक्वमुपससाद । स चाह राजानं 'अह हारे त्वा शूद्र' (छा. ४-२-३) इति शोकानादरश्रवणात् या शुगुत्पेदे तस्य राजर्षेः, सा शुक् शूद्रशब्देन शुगुत्पन्नेति सूच्यते । तत्राह—तदाद्रवणादिति । शुचमभिदुद्राव शुचा वाभि उद्रुवे दुद्रुवे रैक्वम् । अतः क्षत्रिय एवात्र शुचान्वितः शूद्रशब्देनोक्तः ॥

प्राच्यामेव मीमांसायां अध्यापनसंस्कृतेन स्वाध्यायेन फलवत्कर्मब्रह्मावबोधो भाव्यमानोऽभ्युदयनिःश्रेयसप्रयोजन इति स्थापितम् । ततश्च शूद्रस्योपनयनाभावात्, गुरुमुखाध्ययनादिसंस्कारासंभवात्, पुस्तकपठितस्वाध्यायजन्यार्थावबोधो न फलाय शूद्राणां युज्यत इति न तस्य ब्रह्मविद्यायां सामर्थ्यम् । तदभावादर्थित्वादयोऽप्यकिञ्चित्कराः । तस्मात् 'तस्माच्छूद्रो यज्ञेऽनवक्लृप्तः' (तै. सं. ८-१-१-७) इत्येतदुपलक्षणं 'ब्रह्मविद्यायामनवक्लृप्तः' इत्यस्यापीति बोध्यम् । सिद्धवदभिधानस्य न्यायपूर्वकत्वात्, न्यायस्य चोभयत्र समत्वात् ॥

किञ्च, निषादस्थपतीष्ट्यादिविधानात् यज्ञलेशे शूद्रस्यानुज्ञाऽस्ति, तदीययाजमानपाठे च ॥

ननु शूद्रशब्दस्य रूढ्यङ्गीकारे संवर्गविद्यायां शूद्रस्याधिकारसंभवात् ब्रह्मविद्यालेशेऽपि तस्याधिकार इति—उच्यते–अर्थवादगतोऽयं शूद्रशब्दः ।

स चान्यतः सिद्धमनुवदतीति अध्वरमीमांसकाः। अस्माकमन्यपरादपि वाक्यादसति बाधके प्रमाणान्तरेऽप्यन्योऽर्थोऽवगम्यमानो विधिना चापेक्षितः स्वीक्रियत एव। न्यायश्चास्मिन्नर्थ उक्तबाधकः। न च विध्यपेक्षाऽस्ति। द्विजात्यधिकारिप्रतिलंभेन विधेः पर्यवसानात्। न चात्र शूद्रशब्दस्य रूढ्यङ्गीकार इत्युक्तम् ॥ २ ॥

२. क्षत्रियत्वगतेश्चोत्तरत्र चैत्ररथेन लिङ्गात् १-३-३५

इतश्च जानश्रुतिर्न शूद्रः, यत्कारणं प्रकरणनिरूपणे क्रियमाणे क्षत्रियत्वमस्य जानश्रुतेरवगम्यते। उत्तरत्र—शिष्टसंवर्गविद्यावाक्यशेषे 'अथ ह शौनकं च कापेयमभिप्रतारिणं च काक्षसेनिं सूदेन परिविष्यमाणौ ब्रह्मचारी बिभिक्षे' (छा. ४-३-५) इत्यत्र चेतनचैत्ररथं कापेययोगादभिप्रतारिणः चैत्ररथित्वावगमात्, तस्य च 'तस्माच्चैत्ररथी नामैकः क्षत्रियःपतिरजायत' इति विस्पष्टं क्षत्रियत्वावगमात्, तेन चैत्ररथेन क्षत्रियेणाभिप्रतारिणा सह संकीर्तनलिङ्गात् जान..तेरपि क्षत्रियत्वावगतेश्च हेतोः जानश्रुतिर्न शूद्रः ॥ २ ॥

३. संस्कारपरामर्शात् तदभावाभिलापाच्च १-३-३६

इतश्च न शूद्रस्य ब्रह्मविद्यायामधिकारः, ब्रह्मविद्याप्रदेशेषु उपनयनादिसंस्कारपरामर्शात्, शूद्रस्य च संस्काराभावात्. तदभावाभिलापाच्च। 'तं होपनिन्ये' (श. ब्रा. ११-५-३-१३) 'अधीहि भगव इति होपससाद' (छा. ७-१-१) इत्यादिनोपनयनादिसंस्कारनिर्देशः। 'न शूद्रे पातकं किञ्चिन्न च संस्कारमर्हति' (म. स्मृ. १०-१२) इति तदभावाभिलापः ॥ ३ ॥

४. तदभावनिर्धारणे च प्रवृत्तेः १-३-३७

किञ्च, सत्यवचनेन तदभावनिर्धारणे—शूद्रत्वाभावनिश्चये जाबाल उपनयनाय गौतमप्रवृत्तेरपि न शूद्रस्य ब्रह्मविद्याधिकारः ।। ४ ।।

५. श्रवणाध्ययनार्थप्रतिषेधात्स्मृतेश्च १-३-३८

किञ्च, शूद्रस्य वेदश्रवणवेदाध्ययनवेदार्थज्ञानप्रतिषेधात् , स्मृतेश्च न शूद्रस्य ब्रह्मविद्याधिकारः । 'अथास्य वेदमुपशृण्वतः त्रपुजतुभ्यां श्रोत्रप्रपूरणम् ' इत्यध्ययनप्रतिषेधः । यस्य च समीपे नाध्येतव्यं स कथमधीयीत ? श्रवणेन विनाध्ययनासंभवात् । अत एव चार्थादर्थज्ञानतदनुष्ठानप्रतिषेधोऽपि भवति । ' न शूद्राय मतिं दद्यात् ' इति, ' नाद्विजातेरनध्ययनं विद्यादानम् ' इति च स्मृतेरपि न शूद्रस्य ब्रह्मविद्याधिकारः ।।

विदुरधर्मव्याधप्रभृतीनां तु जन्मान्तराभ्यासवशात् ब्रह्मज्ञानोत्पत्तिर्न निवारयितुं शक्यते । 'श्रावयेच्चतुरो वर्णान् ' (महा भारत) इति चेतिहासपुराणाधिगमेन चतुर्णामपि वर्णानां ब्रह्मविद्याधिकारश्रवणात् स्ववर्णोक्ताचारानुष्ठानेन शूद्रस्यापि शुद्धान्तःकरणस्य ब्रह्मविद्यायामधिकारः संभवत्येव । वेदपूर्वकस्तु नास्त्येवाधिकारः शूद्राणामिति स्थितम् ।। ५ ।।

[इति अपशूद्राधिकरणम्]

———

[१०· कम्पनाधिकरणम्]

१. कम्पनात् १-३-३९

एवं प्रसङ्गागतं विचारं परिसमाप्य इदानीं प्रकृतमेव विचारं कर्तु-मुपक्रमते—

'य इदं किञ्च जगत्सर्वं प्राण एजति निस्सृतम्। महद्भयं वज्रमु-द्यतं य एतद्विदुरमृतास्ते भवन्ति' (क. २-३-२) इति श्रूयते। अत्र 'एजृ कंपने' (धा. पा. भ्वादि) इत्यर्थानुगमात् अस्मिन् वाक्ये सर्वस्य जगतः प्राणाश्रयं कंपनं श्रूयते। तथा प्राणशब्दवाच्यवस्तुनो वज्रमिव महाभयहेतुत्वमपि श्रूयते। तत्कोऽसौ प्राणः? किञ्च तद्भयानकं वज्रम्? इत्यप्रतिपाद्याविशेषादर्शनात् प्राप्ते संशये—प्राणवज्रश्रुत्यनुरोधात् वायुरेव प्राण इति प्राप्तम्। पञ्चवृत्तेर्वायोराध्यात्मिकस्य देहचलननिमित्तत्वेन प्रसिद्धेश्च। तथा प्रसिद्ध एवाशनिर्वज्रः स्यात्। वायोश्चेदं माहात्म्यं संकीर्त्यते। सर्वस्य वायुविकारत्वात्, अशनेश्च वायुबाह्यपरिणामरूपत्वात्। एवं प्राप्ते—

सिद्धान्तः—सवायुकस्य जगतः कंपनात् परमेश्वरः प्राणशब्देन परामृश्यते, पूर्वापरपर्यालोचनाभ्याम्। पूर्वत्र तावत् 'तदेव शुक्रं' (क. २-२-८) इत्यादि। उत्तरत्रापि 'भयादस्याग्निस्तपति' (क. २-३-३) इत्यादि। तदेवेहापि सन्निधानात् जगन्निःसरणकारणं प्रतीयते। 'प्राणस्य प्राणम्' (केन. १-२) इति प्राणशब्दस्य ब्रह्मणि प्रसिद्धेश्च। 'अन्यत्र धर्मादन्यत्राधर्मात्' (क. १-२-१४) इत्यादौ परमात्मन एव पृष्टत्वाच्च। 'न प्राणेन नापानेन' (क. २-२-५) इति परमात्मन एवैजयितृत्वमपि प्रसिद्धं, भयहेतुत्वमपि प्रसिद्धम्। 'भयात्तपति सूर्यो

—भयादिन्द्रश्च ' (क. २-३-३) इत्यादौ ब्रह्मण एव भयहेतुत्वमपि घटते ।. १ ॥

[इति कम्पनाधिकरणम्]

———

[११. ज्योतिरधिकरणम्]

१. ज्योतिर्दर्शनात् १–३–४०

* ' एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरुपसंपद्य स्वेन रूपेणाभिनिष्पद्यते ' (छा. ८-३-४) इति श्रूयते । तत्र संशयः—किं ज्योतिश्शब्दं चक्षुर्विषयं तमोऽपहं तेजः ? किं वा परं ब्रह्म ? इति? तत्र रूढेः प्रसिद्धमेव तेज इति प्राप्ते—

ब्रूमः —ज्योतिर्दर्शनादिति —अत्र परमेव ब्रह्म ज्योतिश्शब्दम् । कुतः ? दर्शनात्—इह प्रकरणे तस्यैवानुवृत्तिर्दृश्यते । ' य आत्मा ' (छा. ८-७-१) इति अपहतपाप्मत्वादिगुणकब्रह्मणोऽन्वेष्टव्यत्वेन प्रकृतत्वात् । ' एतं त्वेव ते भूयोऽनुव्याख्यास्यामि ' (छा. ८-११-३) इति तस्यैवानुसन्धानात् परं ज्योतिरेव ज्योतिश्शब्दम् । ' स उत्तमः पुरुषः ' (छा. ८-१२-३) इति विशेषणाच्च ॥ १ ॥

[इति ज्योतिरधिकरणम्]

———

* पूर्वं सर्वशब्दश्रुतिसंकोचानुपपत्त्या प्रकरणात् प्राणशब्दं ब्रह्मेत्युक्तम् । न तथेह संप्रसादवाक्ये प्रकरणानुग्राहकं किञ्चिदस्ति, येन प्रकरणात् ज्योतिश्शब्दितं ब्रह्म स्यादिति प्रत्युदाहरणसंगत्येदमाह—स.शि.वृ.

[१२. अर्थान्तरव्यपदेशाधिकरणम्]

१. आकाशोऽर्थान्तरत्वादिव्यपदेशात् १–३–४१

* 'आकाशो ह वै नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म तदमृतं स आत्मा' (छा. ८-१४-१) इति वाक्ये किमाकाशशब्दं परं ब्रह्म? किं वा भूताकाशम्? इति विशये—स्रष्टृत्वादिब्रह्मलिङ्गाभावात्, प्रसिद्धेः भूताकाशमिति प्राप्ते—

राद्धान्तः—परमेव ब्रह्मेहाकाशशब्दं भवितुमर्हति। कुतः? अर्थान्तरत्वादिव्यपदेशात्। 'ते यदन्तरा तद्ब्रह्म' इति नामरूपाभ्यामर्थान्तरभूतमर्थं व्यपदिशति। सर्वविकारजातस्य नामरूपवत्त्वात् न ब्रह्मणोऽन्यत्ताभ्यामर्थान्तरं भवितुमर्हति। अमृतत्वादिकं ब्रह्मण्येव संभवति, न भूताकाशे ॥ १ ॥

[इति अर्थान्तरव्यपदेशाधिकरणम्]

——o——

[१३. सुषुप्त्युत्क्रान्त्यधिकरणम्]

१. सुषुप्त्युत्क्रान्त्योर्भेदेन १–३–४२

† 'योऽयं विज्ञानमयः प्राणेषु' (बृ. ४-३-७) इत्यादिवाक्ये किं संसारी निरूप्यते? किं वा परब्रह्म? इति संशये—'विज्ञानमयः प्राणेषु' इत्यादिजीवलिङ्गात् संसारित्वप्राप्तौ—

---

* यथा पूर्वं उपक्रमवशादर्थान्तरे प्रसिद्धोऽपि ज्योतिश्शब्दः स्वार्थात् प्रच्यावितः, तथाऽऽकाशोपक्रमवशात् ब्रह्मादिशब्दोऽपि स्वार्थात् प्रच्याव्यतामिति दृष्टान्तसंगत्येदमाह—स·शि·वृ.

† पूर्वं नामरूपाभ्यां भेदोक्तेः आकाशो ब्रह्मेत्युक्तम्, तत्र, 'प्राज्ञेनात्मना संपरिष्वक्तः' इत्यत्राभिन्नेऽपि जीवे भेदोपचारादित्याक्षिप्य समाधानादाक्षेपसंगत्येदमाह स·शि·वृ.

सिद्धान्तः—परमेश्वर एवात्र प्रतिपाद्यः । कुतः ? सुषुप्त्युत्क्रान्त्योर्भेदेन । 'व्यपदेशात्' इति पूर्वसूत्रादिहानुवर्तते । सुषुप्तौ, उत्क्रान्तौ च शारीरात्परमेश्वरस्य भेदेन व्यपदेशादित्यर्थः । 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद' (बृ. ४-३-२१) इति सुषुप्तौ भेदेन व्यपदेशः । 'अयं शारीर आत्मा प्राज्ञेनात्मनाऽन्वारूढ उत्सर्जन्याति' (बृ. ४-३-३५) इत्यु * [त्क्रान्तौ भेदव्यपदेशः] ॥

यत्तु जीवलिङ्गात् संसारिप्रतिपादनमिति—तदयुक्तम्—अनूद्य—संसारित्वरूपं, परब्रह्मैकताया एव विवक्षितत्वात् ।—'ध्यायतीव लेलायतीव' (बृ. ४-३-७) इत्याद्युत्तरग्रन्थे संसारिधर्मनिराकरणपरताऽवगमात् ॥ १ ॥

२. पत्यादिशब्देभ्यः १-३-४३

'सर्वस्य वशी सर्वस्येशानः सर्वस्याधिपतिः' (बृ. ४-४-२२) इत्यादौ पत्यादिशब्देभ्योऽसंसारिधर्मप्रतिपादनात्, 'स न साधुना कर्मणा भूयान् नो एवासाधुना कनीयान्' (बृ. ४-४-२२) इत्यादिभिः संसारिधर्मनिषेधाच्चासंसारी परमेश्वर एवेहोक्तः ॥ २ ॥

[इति सुषुप्त्युत्क्रान्त्यधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीर प्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

—प्रथमाध्यायस्य तृतीयः पादः—

---

* संपादकेन पूरितम् ।

प्रथमाध्यायस्य

चतुर्थः पादः

[१. आनुमानिकाधिकरणम्]

* एवं तावत् ब्रह्मैव जगत्कारणं सर्ववेदान्तवाक्येष्ववगम्यते, न प्रधानमिति स्थापितम् । इदानीं तु प्रधानस्य मा स्तु वाक्यैः प्रतीतिः । प्रधानसमर्पकपदानि कासुचिच्छाखासूपलभ्यन्ते । ततः सर्वज्ञं ब्रह्म कारणमिति व्याकुलीभवेत् —इतीमां शङ्कां तेषां पदानामनन्यपरत्वप्रतिपादनेन निराकर्तुं चतुर्थपाद आरभ्यते ॥

१. आनुमानिकमप्येकेषामिति चेन्न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च १-४-१

कठवल्लीषु पठ्यते—‘ इन्द्रियेभ्यः परा ह्यर्था अर्थेभ्यश्च परं मनः । मनसस्तु परा बुद्धिर्बुद्धेरात्मा महान् परः ॥ महतः परमव्यक्तमव्यक्तात्पुरुषः परः । पुरुषान्न परं किञ्चित् सा काष्ठा सा परा गतिः ’ (क. १-३-१०,११) इति । किमत्र महतः परमव्यक्तं प्रधानम्? उत शरीरम्? इति विशये—तत्र—‘ आनुमानिकमप्येकेषामिति चेत् ’ इति पूर्वपक्षानुवादः । आनुमानिकमपि—अनुमाननिरूपितं प्रधानमपि एकेषां शाखिनां शब्दवत्

---

* पूर्वमीक्षत्यधिकरणे गतिसामान्यं, अशब्दत्वं च प्रतिज्ञाय, तत्र वेदान्तानां ब्रह्मणि गतिसामान्यं पादत्रयेण प्रत्यपादि । अधुना प्रधानस्याशब्दत्वमाक्षिप्य समाधीयत इत्याक्षेपसंगत्या चतुर्थपादोऽयमारभ्यते । ‘ पूर्वं सुषुप्त्युत्क्रान्त्योर्भेदेन ’ इत्यत्र प्रसिद्धजीवोक्तिभङ्गेनाप्रसिद्धब्रह्मोक्तिवत्, अप्रसिद्धप्रधानोक्तिपरमेव काठकवाक्यमस्त्विति दृष्टान्तसंगत्येदमधिकरणमारभ्यते—स.शि.वृ.

उपलभ्यते। यतः उदाहृते वाक्येऽव्यक्तपदं प्रधानवाचकम्। कुतः? शरीरस्य व्यक्तत्वात्। महदव्यक्तपुरुषाणां सांख्यस्मृतिप्रसिद्धानां परापरभावेनास्यां श्रुतौ प्रत्यभिज्ञानाच्च॥

इमं पूर्वपक्षं दूषयति—'न शरीररूपकविन्यस्तगृहीतेर्दर्शयति च' इति। न ह्येतत्काठकवाक्येऽव्यक्तपदं प्रधानप्रतिपादनपरम्। कुतः? शरीररूपकविन्यस्तगृहीतेः—शरीरं ह्यत्र रूपकविन्यस्तं अव्यक्तशब्देन गृह्यते, न प्रधानमित्यर्थः। प्रकरणात् परिशेषाच्चायमर्थोऽवगम्यते॥

दर्शयति च—'अतीतानन्तरग्रन्थे तावत्' आत्मानं रथिनं विद्धि शरीरं रथमेव तु। बुद्धिं तु सारथिं विद्धि मनः प्रग्रहमेव च॥ इन्द्रियाणि हयानाहुः विषयांस्तेषु गोचरान्। आत्मेन्द्रियमनोयुक्तं भोक्तेत्याहुर्मनीषिणः' (क. १-३-३,४) इति च रथक्लृप्तिम्। तत्र ये अश्वादिभावेन प्रकृताः, त एवात्र गृहीतुं युक्ताः, प्रकृतपरिग्रहस्य न्याय्यत्वात्। इन्द्रियार्थमनोबुद्धयः स्वशब्दैरेवेह परत्वेन संकीर्त्यन्ते। आत्माऽत्र पुरुषशब्देन, बुद्धिमहतोस्त्वेकत्वेन रथकल्पनायां बुद्धिशब्देन गृहीतत्वात्। भेदविवक्षायां चेहास्मदादिबुद्धेः परा हिरण्यगर्भबुद्धिः 'आत्मा महान् परः' इत्युक्ता। तत्र शरीरमेकं परिशिष्यमाणमिह परिशिष्टेनाव्यक्तशब्देन संकीर्त्यते। स्मृतिप्रसिद्धितः श्रुतिप्रसिद्धेरेव शब्दवाचां सन्निहितत्वात् न सांख्यस्मृतिप्रसिद्धमहदादिप्रत्यभिज्ञानसंभवः॥ १॥

नन्वेवं प्रकरणपरिशेषाभ्यां भवत्वव्यक्तशब्दं शरीरम्। कथं तर्हि तस्य स्पष्टत्वादव्यक्तत्वम्? इत्यत्राह—

२. सूक्ष्मं तु तदर्हत्वात् १-४-२

तुशब्दः शङ्कां व्यावर्तयति। सूक्ष्मं इह कारणात्मना शरीरं विवक्ष्यते। सूक्ष्मस्याव्यक्तशब्दार्हत्वात्। स्थूलस्य शरीरस्याव्यक्त-

शब्दानर्हत्वेऽपि, तस्यारंभकं भूतसूक्ष्ममव्यक्तशब्दार्हं भवति। प्रकृतिशब्दश्च विकारवचनो दृष्टः। यथा 'गोभिः श्रीणीत मत्सरम्' (ऋ. सं. १-४६-४) इति। 'तद्धेदं तर्ह्यव्याकृतमासीत्' (बृ. १-४-७) इति श्रुतिरपि नामरूपात्मकस्य जगतः सृष्टेः पूर्वं बीजावस्थस्याव्यक्तशब्दयोग्यत्वं दर्शयति ॥ २ ॥

ननु तर्हि जगतः प्रागवस्थायाः प्रधानत्वाभ्युपगमात् तद्वादप्रसङ्ग इति—नेत्याह—

३. तदधीनत्वादर्थवत् १-४-३

यदिदमनभिव्यक्तनामरूपबीजात्मकं प्रागवस्थानं जगतः कारणमभ्युपगम्यते, तन्न सांख्याभिमतप्रधानवत् स्वतन्त्रं जगदाकारेण विवर्तते। कुतः? तदधीनत्वात्। अस्मिन्नुदाहरणे प्रसिद्धः पुरुषः तच्छब्देनोच्यते। तस्याधीनं तदधीनम्। तस्य भावः, तदधीनत्वम्, तस्मात्—इति यावत्॥ अचेतनस्य स्वतः प्रवृत्त्यनुपपत्तेः। ननु स्वतन्त्रमहिमस्य परमेश्वरस्य तदपेक्षाभावात् नाव्यक्त तस्योपकारकमिति न तदधीनमव्यक्तमिति— तत्राह— अर्थवदिति॥

अर्थवदिदमुक्तलक्षणमव्यक्तं भवितुमर्हति। शक्तिरहितस्य तेन विना प्रवृत्त्यनुपपत्तेः। अविद्यात्मका हि सा बीजशक्तिरव्यक्तशब्दनिर्देश्या परमेश्वराश्रया मायामयी सत्त्वासत्त्वाभ्यामनिर्वाच्या। तस्याश्चानादिभूतायाः ब्रह्मतत्त्वविद्यया दाहात् न मुक्तानां पुनरुत्पत्तिः॥ ३॥

४. ज्ञेयत्वावचनाच्च १-४-४

किञ्च, नेह प्रधानमव्यक्तशब्दम्, प्रधानस्य ज्ञेयत्वेनावचनात्। ज्ञेयत्वेन च सांख्यैः प्रधानमभ्युपगम्यते। गुणपुरुषान्तरज्ञानात् कैवल्य-

मिति वदद्भिः । क्वचित् विभूतिविशेषप्राप्तये प्रधानं ज्ञेयमिति वदन्ति ।।४।।

५. वदतीति चेन्न प्राज्ञो हि प्रकरणात् १-४-५

प्रधानमिह ज्ञेयत्वेन वदति 'अशब्दमस्पर्शम्' (क. १-३-१५) इत्यादिश्रुतिवाक्यमिति चेत्-न-कुतः ? प्राज्ञो हि परमात्मा इह ज्ञेयत्वेन निर्दिष्टः, न प्रधानम् । कथमेतदवगम्यते ? प्रकरणात्—'पुरुषान्न परं किञ्चित्' (क. १-३-११) इति प्रकरणं प्राज्ञस्य विततं दृश्यते ।। ५ ।।

६. त्रयाणामेव चैवमुपन्यासः प्रश्नश्च १-४-६

इतश्च न प्रधानस्याव्यक्तशब्दवाच्यत्वम्, ज्ञेयत्वं वा । यस्मात् त्रयाणामेव—अग्निजीवपरमात्मनां कठवल्लीग्रन्थे वरदानसामर्थ्यात् वक्तव्यतयोपन्यासो दृश्यते । तद्विषय एव प्रश्नः, नान्यस्य प्रश्नः, उपन्यासो वाऽस्ति ॥

तत्र 'स त्वमग्निं स्वर्गमध्येषि' (क. १-१-१३) इति अग्निविषय प्रश्नः । 'येयं प्रेते' (क. १-१-२०) इत्यादिः जीवविषयः । 'अन्यत्र धर्मात्' (क. १-२-१४) इत्यादिः परमात्मविषयः । लोकादिमग्निं तमुवाच' (क. १-१-१५) इति प्रतिवचनं अग्निविषयम् । 'हन्त त इदं प्रवक्ष्यामि गुह्यं ब्रह्म सनातनम् (क. २-२-६) इत्यादि जीवविषयम् । 'न जायते म्रियते वा विपश्चित् (क. १-२-१८) इति परमात्मविषयमिति ।। ६ ।।

७. महद्वच्च १-४-६

यथा 'बुद्धेरात्मा महान् परः' (क. १-३-१०) 'वेदाहमेतं पुरुषं महान्तम्' (श्वे ३-८-) इत्यदिवैदिकप्रयोगे आत्मशब्दा

न्महच्छब्दः सत्तामात्रे प्रथमजे प्रयुक्तो न युज्यते तथाऽव्यक्तशब्दोऽपीति ॥ ७ ॥

[इति आनुमानिकाधिकरणम्]

[२· चमसाधिकरणम्]

१. चमसवदविशेषात् १-४-८

* श्वेताश्वतरोपनिषदि श्रूयते—'अजामेकां लोहितशुक्लकृष्णाम्' (श्वे. ४-५) इति। तत्र 'अजा' इति सांख्यस्मृतिप्रसिद्धा प्रकृतिर्विहिता? किं वा छान्दोग्यप्रसिद्धा तेजोऽबन्नात्मिका—प्रकृतिः? इति संशये—'लोहितशुक्लकृष्णाम्' इति रजस्सत्त्वतमसां साम्यावस्थालक्षणप्रधानपरिग्रहे प्राप्ते—

सिद्धान्तः—न ह्यत्र सांख्यप्रसिद्धा प्रकृतिः प्रतीयते। कुतः? चमसवदविशेषात्। न हीदं चमसवाक्यवत्परिप्लवमानं प्रधाननिश्चयाय पर्याप्तम्। 'अर्वाग्बिलश्चमस ऊर्ध्वबुध्नः (बृ. २-२-३) इत्यत्र कथञ्चित् अर्वाग्बिलत्वोपाधौ—'अयं नामासौ चमसः' इति न निश्चयः, एवमजामन्त्रे न निश्चयः ॥ १ ॥

---

* पूर्वं अव्यक्तशब्दमात्रेण प्रधानस्याप्रत्यभिज्ञायामपि अत्र त्रिगुणत्वादिलिङ्गोपेतादजाशब्दात् प्रत्यभिज्ञाऽस्त्विति प्रत्युदाहरणसंगत्येदमाह—स·शि·वृ.

तर्ह्यनिश्चयलक्षणमप्रामाण्यमस्येति— नेत्याह—

२. ज्योतिरुपक्रमा तु तथा ह्यधीयत एके १-४-९

परमेश्वरादुत्पन्ना ज्योतिःप्रमुखा तेजोऽबन्नलक्षणा चतुर्विधभूतग्रामस्य प्रकृतिभूतेयमजा प्रतिपत्तव्या। तुशब्दोऽवधारणे। भूतत्रयलक्षणैवेयमजा प्रतिपत्तव्या, न गुणत्रयलक्षणा। कस्मात्? 'तथा ह्यधीयत एके'— तथा ह्येके शाखिनः छन्दोगाः तेजोऽबन्नानां परमेश्वरादुत्पत्तिमाम्नाय, तेषामेव च लोहितादिरूपतामामनन्ति—'यदग्ने रोहितं रूपं तेजसस्तद्रूपं यच्छुक्लं तदपां यत्कृष्णं तदन्नस्य' (छा. ६-४-१) इति। स्मृतिप्रसिद्धितोऽपि श्रुतिप्रसिद्धेरेव सन्निधानात् छन्दोगवाक्यान्निर्णयो युक्तः॥ २॥

अजाशब्दस्य तेजोऽबन्नात्मकस्य अजाकार्यत्वेनाजात्वानुपपत्तेः नाजाशब्दस्तेजोऽबन्नलक्षणप्रकृतौ यौगिकः। नापि छागायामेव रूढः—इति चेत्—तत्राह—

३. कल्पनोपदेशाच्च मध्वादिवदविरोधः १-३-१०

तेजोऽबन्नलक्षणायामुक्तप्रकृतौ सुखावबोधाय कल्पनोपदेशोऽयम्। 'मध्वादिवत्' इति निदर्शनोपन्यासः। यथा 'असौ वा आदित्यो देवमधु' (छा-३-१-१) इत्यादिवाक्येनादित्यस्य मधुत्वं परिकल्पितम्' 'वाचं धेनुमुपासीत' (बृ-५-८-१) इति वाचो धेनुत्वं, तद्वदिहापि न कश्चिद्विरोधः॥ ३॥

[इति चमसाधिकरणम्]

[३. संख्योपासंग्रहाधिकरणम्]

१. न संख्योपसङ्ग्रहादपि नानाभावादतिरेकाच्च १-३-११

*'यस्मिन् पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः। तमेव मन्य आत्मानं विद्वान् ब्रह्मामृतोऽमृतम्' (बृ. ४-४-१७) इति बृहदारण्यके श्रूयते। किमत्र 'पञ्च पञ्चजनाः' इति प्रोक्ताः पदार्थाः सांख्यशास्त्रोक्ततत्त्वानि? आहो स्वित् श्रुतिप्रोक्ताः प्राणादयः? इति संशयः। पञ्चशब्दद्वयदर्शनात् पञ्चसंख्याविषयाऽपरा पञ्चसंख्या सिद्धा भवति—इति पञ्चपञ्चकाः पञ्चविंशतिः संपद्यन्ते। तया च संख्यया वक्ष्यमाण 'मूलप्रकृतिरविकृतिः' इत्यादिस्मृतिसिद्धतत्त्वसमर्पणात् पञ्चपञ्चजना इति प्रोक्ताः पदार्थाः सांख्यतत्त्वानीति प्राप्ते—

ब्रूमः—न संख्योपसंग्रहादपि प्रधानादीनां श्रुतिमत्त्वम्। कुतः? नानाभावात्—तत्त्वानां नानारूपत्वादित्यर्थः॥

एतदुक्तं भवति—तेषां पञ्चशः पञ्चशः साधारणधर्मस्य पञ्चविंशतिसंख्यान्तरालनिवेशहेतोरभावादिति॥

अतिरेकाच्च न पञ्चविंशतिसंख्याप्रतीतिः। अतिरेको हि भवत्यात्माकाशाभ्याम्। पञ्चविंशतिसंख्याया आधारत्वेन सप्तमीसूचितस्यात्मनः 'तमेवमन्य' इत्यनुकर्षणात्। तस्य पुरुषान्तरभावे चाधाराधेयत्वमेकस्य विरुद्धमापद्येत। अतिरेके चापसिद्धान्तः। तस्मात् 'दिक्संख्ये संख्यायाम्' (पा-सू-२-१-५०) इति विशेषस्मरणात् पञ्चजनसंज्ञकाः पञ्चेति सिद्धम्॥ १॥

---

* पूर्वं आध्यात्मिकाधिकारे प्रसिद्धच्छागग्रहणायोगात् अजा तेज आदिकेत्युक्तम्। तथा 'यस्मिन् पञ्च पञ्चजनाः' इति मन्त्रे पञ्चजनशब्देन प्रसिद्धमनुष्यग्रहणायोगात् सांख्याभिमतपञ्चविंशतितत्त्वग्रहणमस्त्विति दृष्टान्तसंगत्येदमाह—स.शि.वृः

के ते संज्ञिनः ? इत्यत्राह—

प्राणादयो वाक्यशेषात् १-४-१२

प्राणाः चक्षुः श्रोत्रं मनोऽन्नमित्येते पञ्चजनाः प्रतिपत्तव्याः । कुतः ? वाक्यशेषात् । 'यस्मिन् पञ्च पञ्चजनाः' इत्यस्य वाक्यस्यानन्तरं 'प्राणस्य प्राणमुत चक्षुषश्च चक्षु उत श्रोत्रस्य श्रोत्रं उतान्नस्यान्नमुत मनसो मनो विदुः' (बृ. ४-४-१८) इति वाक्यशेषः । जनसम्बन्धाच्च तेषां जनत्वम् ।। २ ।।

३. ज्योतिषैकेषामसत्यन्ने १-४-१३

एकेषां—काण्वानां असत्यन्ने ज्योतिषा पञ्चसंख्या पूर्यते । तेऽपि पञ्च पञ्चजना आकाशश्च प्रतिष्ठितः (बृ. ४-४-१७) इत्यस्यानन्तरं पठन्ति —'तं देवा ज्योतिषां ज्योतिः' (बृ. ४-४-१६) इति ।। ३ ।।

[इति संख्योपसंग्रहाधिकरणम्]

[४. कारणत्वाधिकरणम्]

१. कारणत्वेन चाकाशादिषु यथाव्यपदिष्टोक्तेः १-४-१४

*एवं प्रधानस्याशब्दत्वे स्थितेऽपि न वेदान्तानां ब्रह्मविषयं गतिसामान्यं निश्चेतु शक्यम्; सृष्टिवादिनीनां श्रुतीनां विरोधदर्शनात् ।

* न जन्मादिकारणत्वं ब्रह्मणः, ब्रह्मविषयं वा गतिसामान्यं वेदान्तवाक्यानां प्रतिपत्तुं शक्यम् । कस्मात् ? विगानदर्शवात् । प्रतिवेदान्तं ह्यन्याऽन्या सृष्टिरुपलभ्यते—एवमनेकधाविप्रतिपत्तेः वस्तुनि विकल्पस्यानुपपत्तेः न वेदान्तवाक्यानां जगत्कारणावधारणपरता न्याय्या । स्मृतिन्यायप्रसिद्धाभ्यां तु कारणान्तरपरिग्रहो न्याय्य इति (संगतिः)—शं.भा.

'आत्मन आकाशः संभूतः' (तै-आ-१) इत्याकाशादिका क्वचित् सृष्टिः। क्वचित् 'तत्तेजोऽसृजत' (छा- ६-२-३) इति तेजःप्रभृतिका। क्वचित् 'स इमान् लोकानसृजत' (ऐ- १-२) इत्यक्रमेणैव। तस्मात् प्रधानमेव जगत्कारणमिति प्राप्ते—

ब्रूमः—सत्यपि हि प्रतिवेदान्तं सृज्यमानेष्वाकाशादिषु क्रमादिद्वारकेऽपि विगाने स्रष्टरि न विरोधः। कुतः? यथाभूतो ह्येकस्मिन् वाक्ये सर्वज्ञः सर्वेश्वरः परमात्मैकोऽद्वितीयः कारणत्वेन निर्दिष्टः, तथाभूतस्यैव वाक्यान्तरेऽपि कारणत्वेनोक्तेः। सूत्रकारः स्वयमेव सृष्टिश्रुतीनां विरोधं परिहरिष्यति 'न वियदश्रुतेः' (ब्र-सू- २-३-१) इत्यादिना ॥ १ ॥

ननु कारणविषयेऽपि अस्ति विगानं 'असद्वा इदमग्र आसीत्। ततो वै सदजायत' (तै-आ-७) इत्यादावसतः कारणत्वश्रवणात्—इत्यत आह—

२. समाकर्षात् १-४-१५

'असद्वा इदमग्र आसीत्' इत्यत्र पूर्वप्रकृतस्य सत एव समाकर्षणात् नासतः कारणत्वशङ्का। 'असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्। अस्ति ब्रह्मेति चेद्वेद। सन्तमेनं ततो विदुरिति' (तै-आ-६) इति सतः ब्रह्मण एव प्रकृतत्वात्। 'असदेवेदमग्र आसीत्' (छा-६-२-१) इत्यत्राप्येषैव योजना; तत्सदासीदिति समाकर्षणात्। तस्मादव्याकृतत्वाभिप्रायोऽसच्छब्दः। तस्माद्ब्रह्मकारणत्वं गतिसामान्यसिद्धम् ॥ २ ॥

[इति कारणत्वाधिकरणम्]

———

[५. बालाक्यधिकरणम्]

१. जगद्वाचित्वात् १-४-१६

*'यो वै बालाक एतेषां पुरुषाणा कर्ता यस्य वै तत्कर्म' (कौ-४-१९) इत्यादिकौपीतकीब्राह्मणे जीवमुख्यप्राणपरमात्मनां वेदितव्यत्वसंशये—परिस्पन्दलक्षणव्यापारस्य प्राणे संभवात् स वेदितव्यः ॥ 'यस्य वै तत्कर्म' इति धर्मलक्षणव्यापारस्य जीवे संभवात् जीवो वा वेदितव्यः—इति प्राप्ते—

सिद्धान्तः—परमेश्वर एवायं पुरुषाणां कर्ता वेदितव्यः । कुतः ? जगद्वाचित्वात् । 'यस्य वै तत्कर्म' इति कर्मशब्दो जगद्वाची, क्रियत इति कर्म इति व्युत्पत्तेः । यतो जगद्वाचित्वं, तस्मादेव कारणात् कर्मशब्दो न चलनपरः । नाप्यपूर्ववाची । पुरुषमात्रकर्तृत्वनिवृत्त्यर्थं प्रत्यक्षसन्निधापितजगतोऽपि कर्तृत्वमुच्यते ॥ १ ॥

१. जीवमुख्यप्राणलिङ्गान्नेति चेत्तद्व्याख्यातम् १-४-१७

वाक्यशेषे 'एष प्रज्ञात्मैतैरात्मभिर्भुङ्क्ते' (कौ-४-२०) इत्यादिजीवलिङ्गात्, 'प्राण एवैकधा भवति' (कौ-४-१९) इति प्राणलिङ्गाच्च तयोरेव वेदितव्यत्वमिति चेत्—न—कुतः ? 'तद्व्याख्यातम्'—'नोपासात्रैविध्यादाश्रितत्वादिह तद्योगात्' (ब्र-सू-१-१) इत्यत्र जीवप्राणयोर्वेदितव्यत्वं नेत्युक्तम् । उपक्रमोपसंहारादिभिः ब्रह्मपरत्वेऽवगम्यमाने जीवादिपरत्वायोगात् ॥ २ ॥

---

* पूर्वं एकवाक्यस्थसच्छब्दबलात् असच्छब्दो नीतः, इह तु वाक्यभेदात् 'ब्रह्म ते ब्रवाणि' इति बालाकिवाक्यस्थब्रह्मशब्देन प्राणादिशब्दः ब्रह्मपरत्वेन नेतुमशक्य इति प्रत्युदाहरणसंगत्येदमाह—स.शि.वृ.

३. अन्यार्थं तु जैमिनिः प्रश्नव्याख्यानाभ्यामपि चैवमेके १-४-१७

एके शाखिनः—वाजसनेयिनः बालाक्यजातशत्रुसंवादे 'क्वैष तदाऽभूत् कुत एतदागात्' (बृ-२-१-१६) इति प्रश्नप्रतिवचने जीवव्यतिरिक्तं परमात्मानमामनन्ति—'यएषोऽन्तर्हृदय आकाशस्तस्मिन् शेते' (बृ-४-४-२२) इति। आकाशशब्दस्य ब्रह्मत्वं दहराधिकरणे निरूपितम्॥ ३॥

[इति बालाक्यधिकरणम्]

[७. वाक्यान्वयाधिकरणम्]

१. वाक्यान्वयात् १-४-१९

*बृहदारण्यके पठ्यते 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-४-५ बृ ४-५-६) इति। तत्र किं जीवात्मा द्रष्टव्यः? उत परमात्मा? इति संशये—'न वा अरे पत्युः कामाय' (बृ-२-४-५ & बृ ४-५-६) इत्यादिषु प्रियसंसूचितस्य संसारिणः प्रतीतेः जीवप्राप्तौ—

सिद्धान्तः—परमात्मोपदेश एवायमिति। कुतः? वाक्यान्वयात्—वाक्यं हीदं पौर्वापर्येण वक्ष्यमाणं परमात्मानं प्रत्यन्वितावयवं लक्ष्यते। तथाहि—'अमृतत्वस्य तु नाशास्ति वित्तेन' (बृ-२-४-२ & बृ-४-५-३) इति याज्ञवल्क्यः उपक्रमे मैत्रेयीं प्रत्युक्तवान्। 'एतावदरे खल्वमृतत्वम्' (बृ-४-५-१५) इत्युपसंहारे च। न च जीवात्मतत्त्वज्ञानात् अमृतत्वम्॥ १॥

---

* पूर्वं ब्रह्मोपक्रमसामर्थ्यात् ब्रह्मपरत्वमुक्तम्। तर्हि तद्वदेव मैत्रेयीब्राह्मणस्य 'न वा अरे पत्युः कामाय' इत्यादिजीवोपक्रमसामर्थ्यात् जीवपरत्वमास्त्विति दृष्टान्तसंगत्येदमाह—स·शि·वृ·

प्रियसंसूचनोपक्रमात् विज्ञानात्मोपदेश इति यदुक्तं— तत्राह—

२. प्रतिज्ञासिद्धेर्लिङ्गमाश्मरथ्यः १-४-२०

'यस्मिन् विज्ञाते सर्वमिदं विज्ञातं भवति' इति प्रतिज्ञायाः सिद्धिं सूचयत्येतल्लिङ्गं, यत् प्रियसंसूचितस्यात्मनो द्रष्टव्यत्वादिसंकीर्तनम्—इत्याश्मरथ्य आचार्यो मन्यते । विज्ञानात्मपरमात्मनोर्भेदेऽपि अभेदांशमुपादाय परमात्मनि....र्शतव्ये विज्ञानात्मनोपक्रमसंभवात् ।। २ ।।

३. उत्क्रमिष्यत एवंभावादित्यौडुलोमिः १-४-२१

ज्ञानध्यानादिसाधनानुष्ठानात् संप्रसन्नस्य देहादिसंघातादुत्क्रमिष्यतो जीवस्य एवंभावात्—परमात्मभावोपपत्तेः भविष्यन्तमभेदमुपादाय भेदकालेऽप्यभेदोक्तिरित्यौडुलोमिराचार्यो मन्यते ।। ३ ।।

४. अवस्थितेरिति काशकृत्सनः १-४-२२

अस्यैव परमात्मनोऽनेनापि विज्ञानात्मभावेनावस्थानादुपपन्नमभेदेनोपक्रमणमिति काशकृत्स्न आचार्यो मन्यते ।।

'अनेन जीवेनात्मना' (छा-६-३-३) इत्येषा श्रुतिरपीममर्थमाहेति काशकृत्सनीयं मतं श्रुत्यनुसारीति मन्यते ।।

किञ्च, कार्यकारणन्यायेन भेदाभेदेऽङ्गीक्रियमाणे विकारस्य प्रकृतिसम्बन्धे प्रलयप्रसङ्गात् ज्ञानादमृतत्वं दुर्घटं स्यात् । काशकृत्स्नमते तु अविद्यासिद्धभोगप्रतीतिसंसूचितं जीवभावमनूद्य, तस्य ब्रह्मत्वं प्रतिपाद्यत इति अमृतत्वं सिद्ध्यति ।। ४ ।।

[इति वाक्यान्वयाधिकरणम्]

———

[७. प्रकृत्यधिकरणम्]

१. प्रकृतिश्च प्रतिज्ञादृष्टान्तानुपरोधात् १-४-२३

*जगत्कारणप्रतिपादकानि सर्ववेदान्तवाक्यानि विषयः। किं ब्रह्म निमित्तकारणमेव? उतोपादानकारणं निमित्तं च? इति संशयः॥

'स ईक्षत' (ऐ-१-१) इत्यादौ इक्षितृत्वश्रवणात् निमित्तकारणमेव ब्रह्मेति प्राप्ते—

राद्धान्तः—प्रकृतिश्च—उपादानकारणं च ब्रह्माभ्युपगन्तव्यम्, न केवलं निमित्तकारणमेव। कस्मात्? प्रतिज्ञादृष्टान्तानुपरोधः प्रतिज्ञादृष्टान्योरनुपरोधः तस्मात्—, प्रतिज्ञादृष्टान्तानुपरोधात्। निमित्तकारणत्वमात्रे तूपरुध्येत॥

'उत तमादेशमप्राक्ष्यः। येनाश्रुतं श्रुतं भवत्यमतं मतं भवत्यविज्ञातं विज्ञातं भवति' (छा-६-१-२) इत्यादिप्रतिज्ञा, 'यथा सौम्यैकेन' (छा-६-१-४) इत्यादिदृष्टान्तः। उपादानकरणात्मकत्वाच्चोपादेयस्य कार्यजातस्य उपादानज्ञाने तज्ज्ञानोपपत्तेः ब्रह्मण एवोपादानत्वे प्रतिज्ञा समर्थिता स्यात्, अन्यथोपरुध्येत। 'यथा सौम्येकेन मृत्पिण्डेन' इत्यादिदृष्टान्तोऽप्युपरुध्येत॥

न ज ब्रह्मणोऽन्यन्निमित्तकारणमित्यपि युक्तम्, प्रतिज्ञादृष्टान्तोपरोधादेव। न हि तदानीं ब्रह्मणि ज्ञाते सर्वमिदं विज्ञातं भवति, जगतो निमित्तकारणस्य सर्वमध्यपातिनः तद्विज्ञानेनविज्ञानात्॥

---

* पूर्वं 'जन्माद्यस्य यतः' इति सूत्रे ब्रह्मणो जगत्कारणत्वमभिहितम्। तदधुनात्र विचार्यते। एवञ्च सामान्यज्ञानस्य विशेषविचारहेतुत्वात् तेन हेतुहेतुमद्भावसंगत्येदमाह—स.शि.वृ.

यदुक्तं ईक्षितृत्वं कुलालादिषु निमित्तकारणेषु दृष्टमिति—तन्न—आगमागम्यत्वादस्यार्थस्य। आगमश्चेक्षितुरपि प्रकृतित्वं प्रतिपादयतीत्यवोचाम ॥ १ ॥

२. अभिध्योपदेशाच्च १–४–२४

किञ्च, अभिध्योपदेशात् उपादानं, निमित्तं च ब्रह्म। 'स ईक्षत' 'बहु स्यां प्रजायेय' (तै-आ) इतीक्षणलक्षणाभिध्यानकर्तृत्वावगमात्' 'बहु स्याम्' इति प्रत्यगात्मविषयबहुभवनाभिध्यानस्य....प्रकृतित्वमपि गम्यते ॥ २ ॥

३. साक्षाच्चोभयाम्नानात् १–४–२५

प्रकृतित्वस्यायमभ्युच्चयः। साक्षात् ब्रह्मैव कारणमुपादाय उभयोः–प्रभवप्रलययोराम्नानात्। 'सर्वाणि ह वा इमानि भूतानि आकाशादेव समुत्पद्यन्ते आकाशं प्रत्यस्तं यन्ति' (छा-१-९-१) इति। 'जनिकर्तुः प्रकृतिः' (पा.सू-१-४-३०) इति विहिना आकाशादिति पञ्चमी तावदाकाशस्योपादानत्वे घटते। मुसलादौ निमित्तकारणे घटादिप्रलयादर्शनात्। सर्वभूतप्रत्यस्तमयोऽपि आकाशस्योपादानत्वे घटते ॥ ३ ॥

४. आत्मकृतेः परिणामात् १–४–२६

'तदात्मानं स्वयमकुरुत' (तै-आ. ७) इति आत्मनः कर्मकर्तृत्वव्यपदेशादात्मैव जगत्प्रकृतिः ॥

ननु कर्तृत्वेन पूर्वसिद्धस्य कथं क्रियमाणत्वम्? परिणामादिति ब्रूमः। कूटस्थनित्यस्य सिद्धस्य अविद्यावशात्परिणामोपपत्तेरिति भावः ॥

'परिणामात्' इति पृथग्वा सूत्रम् । इतश्च ब्रह्मैव प्रकृतिः, 'सच्च त्यच्चाभवत्' (तै आ-६) इत्यादौ ब्रह्मणोऽपि परिणामः श्रूयते ॥ ४ ॥

५. योनिश्च हि गीयते १-४-२७

इतश्च ब्रह्मैव प्रकृतिः, यत्कारणं योनिरित्यपि पठ्यते वेदान्तेषु 'यद्भूतयोनिं परिपश्यन्ति धीराः' (मु-१-१-६) इति । 'पृथिवी योनिरोषधिवनस्पतीनाम्' इति योनिशब्दः उपादानकारणवाची दृष्टः ॥ ५ ॥

[इति प्रकृत्यधिकरणम्]

[८. सर्वव्याख्यानाधिकरणम्]

१. एतेन सर्वे व्याख्याता व्याख्याताः १-४-२५

*एवं प्रधानवादो न वेदसिद्ध इत्युक्तम् । इदानीमण्वादिकारणतावादो निराक्रियते ।

---

* इत्थमभिहितेन न्यायेन 'ईक्षतेर्नाशब्दम्' इत्यादिनाऽशब्दत्वादिहेतुभिः प्रधानकारणवादो यथा निराकृतः न तथेहाणुस्वभावासत्कारणवादः । तेषामपि कारणत्वबोधकशब्दानां श्रुतत्वादिति प्रत्युदाहरणसंगत्येदमाह--स.शि वृ.

वेदान्ता एव विषयः । किं ब्रह्मण इव परमाणुशून्यादीनामपि क्वचित् जगत्कारणत्वं श्रौतमस्ति ? अथवा सर्वत्र ब्रह्मण एव कारणत्वं प्रसिद्धम् ? इति संशयः ॥

छान्दोग्यस्य षष्ठाध्याये सूक्ष्मतत्त्वे स्थूलस्य जगतोऽन्तर्भावं प्रतिपादयितुं महावृक्षगर्भितानां वटबीजानामुदाहृतत्वात्, तत्सदृशाः परमाणवो दार्ष्टान्तिके श्रुता भवन्ति ॥

शून्यस्य तु साक्षादेव 'असद्वा इदमग्र आसीत्' (तै-आ-७) इति कारणत्वं श्रुतम् ॥

'स्वभावमेके कवयो वदन्ति कालं तथाऽन्ये' (श्वे-६-१) इति क्वचित् कालस्वभावपक्षौ श्रुतौ ॥

तस्मात् परमाण्वादीनामपि श्रौतं कारणत्वमिति प्राप्ते—

राद्धान्तः—एतेनेति । एतेन—प्रधानकारणवादनिराकरणन्यायकलापेन सर्वे—अण्वादिकारणवादाः प्रतिषिद्धतया व्याख्याताः ॥

एकविज्ञानेन सर्वविज्ञानप्रतिज्ञानं शून्यादिमतेषु नोपपद्यते । शून्यादिभिरजन्यस्य ब्रह्मणः शून्यादिविज्ञानेनाविज्ञातत्वात् । वटबीजदृष्टान्तस्तु ब्रह्मणोऽपीन्द्रियागम्यतया सूक्ष्मत्वादुपपद्यते ॥ असच्छब्दस्तु नामरूपानभिव्यक्त्यभिप्राय इति 'समाकर्षात्' (ब्र-सू-१-४-१५) इति सूत्रे निरूपितम् ॥

स्वभावकालपक्षौ तु पूर्वपक्षत्वेनैव श्रुत्यैवोऽन्यग्तौ ॥

तस्मात् ब्रह्मैव जगत्कारणं, न परमाण्वादि । व्याख्याता इति पदाभ्यासोऽध्यायपरिसमाप्तिं प्रदर्शयति ॥

[इति सर्वव्याख्यानाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीर प्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्र ह्म सू त्र वृ त्तौ

—प्रथमाध्यायस्य तृतीयः पादः—

॥ समाप्तश्चाध्यायः ॥

———

द्वितीयाध्यायस्य

प्रथमः पादः

[१. स्मृत्यधिकरणम्]

१. स्मृत्यनवकाशदोषप्रसङ्ग इति चेन्नान्यस्मृत्यनवकाश-
दोषप्रसङ्गात् २-१-१

प्रथमेऽध्याये प्रत्यगद्वयब्रह्मात्मैकत्वप्रतिपादनाय सर्वजगत्कारणवादिवाक्यानि अनादिमायाबलात् ब्रह्मण एव जगत्कारणत्वं वदन्तीत्युक्तम्, प्रधानादीनामशब्दत्वं चोक्तम् ॥

इदानीं स्मृतिन्यायश्रुतिविरोधपरिहाराय द्वितीयोऽध्याय आरभ्यते* ॥

तत्रापि प्रथमे पादे स्मृतिविरोधपरिहारः क्रियते ॥

पूर्वाध्यायप्रतिपादितः समन्वयोऽत्र विषयः । किमस्य साङ्ख्यस्मृत्या संकोचोऽस्ति? न वा? इति संशये—संकोच एव युक्तः । कुतः? 'स्मृत्यनवकाशदोषप्रसङ्गात्' । स्मृतिः—तन्त्राख्या परमर्षिप्रणीता शिष्टपरिगृहीता च । तस्या अनवकाशाख्यो दोषः एवंसति प्रसज्येतेति चेत्—न—कुतः?

---

* पूर्वमतिदेशाधिकरणे प्रधानवदशब्दत्वमण्वादीनामभिहितम् । अधुना प्रधानस्य वैदिकशब्दवत्त्वाभावेऽपि स्मृतिरूपशब्दवत्त्वमाक्षिप्य परिह्रियत इत्याक्षेपसंगत्येदमाह—स·शि.वृ.

अन्यस्मृत्यनवकाशदोषप्रसङ्गात् । यदि स्मृत्यनवकाशदोषप्रसङ्गेन ईश्वरकारणवाद आक्षिप्यते—तर्हि एवमप्यन्या मन्वादयः ईश्वरकारणवादिन्योऽनवकाशाः प्रसज्येरन् ॥

'स ह्यन्तरात्मा भूतानां क्षेत्रज्ञ इति कथ्यते ।
तस्मादव्यक्तमुत्पन्नं त्रिगुणं द्विजसत्तम'

इत्यादिभिः प्रत्यक्षवेदमूलत्वेन प्रबलाभिः ब्रह्मकारणत्ववादिनीभिः मन्वादिस्मृतिभिः साङ्ख्यस्मृतीनां बाधितत्वात्, प्रत्यक्षश्रुतिविरोधे च मूलभूतश्रुत्यनुमानानुपपत्तेः अप्रमाणत्वेनानवकाशत्वमप्रयोजकमिति न ब्रह्मणि ब्रह्मसमन्वयसङ्कोचः ॥ १ ॥

२. इतरेषां चानुपलब्धेः २-१-२

किञ्च, प्रधानादितराणि महदादीनि कल्पितानि । तेषां लोके वेदे चानुपलब्धेरपि तत्प्रतिपादकस्मृतीनां दुर्बलत्वम् ॥ २ ॥

[इति स्मृत्यधिकरणम्]

[२. योगप्रत्युक्त्यधिकरणम्]

१. एतेन योगः प्रत्युक्तः २-१-३

किं योगस्मृत्या ब्रह्मणि वेदसमन्वयस्य संकोचोऽस्ति? न वा? इति संशये—पातञ्जलाख्ये योगशास्त्रे—'त्रिरुन्नतं स्थाप्य समं शरीरं' (श्वे-२-८) इत्यादिश्वेताश्वतरोपनिषत्प्रतिपाद्ययोगस्य प्रतिपाद्यत्वात् वेदमूलत्वेन प्रामाण्ये सिद्धे, तत्प्रतिपादितप्रधानकारणवादोऽङ्गीकर्तव्य इति प्राप्ते—

राद्धान्तः—एतेनेति। एतेन—सांख्यस्मृतिप्रत्याख्यानेन योगस्मृतिरपि प्रत्याख्याता द्रष्टव्या। प्रमाणभूताऽपि योगस्मृतिः अवैदिके प्रधानादौ न प्रमाणम्, प्रत्यक्षाद्यसिद्धेः, तत्र तस्यास्तात्पर्याभावात्। 'अथ योगानुशासनम्' (यो. सू. १-१) 'योगश्चित्तवृत्तिनिरोधः' (यो. सू. १-२) इति योगशास्त्रस्य योगैकपरत्वप्रतीतेः ॥ १ ॥

[इति योगप्रत्युक्त्यधिकरणम्]

[३. विलक्षणत्वाधिकरणम्]

१. न विलक्षणत्वादस्य तथात्वं च शब्दात् २-१-४

*स्मृतिविरोधं परिहृत्येदानीं तर्कविरोधः परिह्रियते ॥

किं ब्रह्मणि वेदसमन्वयः कार्यकारणसालक्षण्यनियमादितर्कविरोधेन बाध्यते? न वा? इति संशये—पूर्ववाद्याह—'न विलक्षणत्वात्' इति। चेतनं ब्रह्म जगतो न कारणम्; कुतः? 'विलक्षणत्वात्' अस्य विकारजातस्य प्रकृतेः सकाशात् विलक्षणत्वात्—वैषम्यात्। नित्यशुद्धब्रह्मणः उपादानत्वेनाभिप्रेतात् जडमशुद्धं जगत् उत्पत्तिं नार्हति, विलक्षणत्वात्। रुचकादिकार्याणां मृद्विकारत्वादर्शनादित्यर्थः ॥

---

* पूर्वं वेदविरुद्धस्मृतेः मूलाभावात् अप्रामाण्यमुक्तम्। तर्हि तर्कस्य व्याप्तिपक्षधर्मतयोर्मूलत्वेन लोकसिद्धत्वात् तेन विरोध इति प्रत्युदाहरणसंगत्येदमाह—स.शि.वृ.

ननु चेतनप्रकृतिकत्वात् जगदपि चेतनात्मकं भविष्यतीति ; नेत्याह—'तथात्वं च शब्दात्' इति । शब्दादेव तथात्वं—प्रकृतमचेतनत्वं प्रपञ्चस्यावगम्यते । तथा च तैत्तिरीयकाः पठन्ति—'विज्ञानं चाविज्ञानं च' (तै. आ. ६) इति । इह च कस्यचित्प्रपञ्चांशस्याचेतनत्वं गम्यत इति ब्रह्मणो विलक्षणं जगत् ।। १ ।।

ननु 'मृदब्रवीत्' 'आपोऽब्रुवन्' (श. ब्र. ६-१-३-२-४) इत्यादौ अचेतनत्वेनाभिमतानां चेतनत्वं श्रूयते—नेत्याह—

२. अभिमानिव्यपदेशस्तु विशेषानुगतिभ्याम् २-१-५

तुना शङ्काऽपोद्यते । कुतः ? यतो मृदाद्यभिमानिन्यो देवताः चेतनव्यवहारेण व्यपदिश्यन्ते । अत्र हेतुः—'विशेषानुगतिभ्याम्' इति । 'विज्ञानं चाविज्ञानं च' इति विशेषः । अनुगतिरपि—मृदादिषु देवतानामभिमानिनां मन्त्रार्थवादादिषु श्रूयते । तस्मात् ब्रह्मजगतोर्वैलक्षण्यात् न ब्रह्म जगत्कारणमिति प्राप्ते—

सिद्धान्त्याह—

३. दृश्यते तु २-१-६

तुशब्दः पक्षं व्यावर्तयति । यदुक्तं विलक्षणत्वान्नेदं जगत् ब्रह्मप्रकृतिकमिति, नायमेकान्तः । दृश्यते हि लोके चेतनत्वेन प्रसिद्धेभ्यः पुरुषादिभ्यो विलक्षणानां केशनखानामुत्पत्तिः । अचेतनाद्गोमयात् वृश्चिकादिचेतनोत्पत्तिश्च । 'ये ये कार्यकारणे, ते ते सलक्षणे' इत्यस्या व्याप्तेः वृश्चिकादौ व्यभिचारात् विलक्षणत्वहेतुः न वेदसमन्वयस्य बाधकः ।।

किञ्च चेतनकारणत्वेऽपि जगतः, विभावनाविभावनाभ्यां चेतनाचेतनविभागोपपत्तेः 'विज्ञानं चाविज्ञानं च' इति श्रुतिरुपपन्नतरा। परमकारणस्यात्मनः समस्तजगदात्मनाऽवस्थानं श्रूयमाणं तस्य कारणत्वानङ्गीकारे परस्य विरुद्ध्येत ।। ३ ।।

४. असदिति चेन्न प्रतिषेधमात्रत्वात् २–१–७

नित्यशुद्धचैतन्यरूप ब्रह्म तद्विपरीतजगत्कारणं चेत् असत्तर्हि कार्यं प्रागुत्पत्तेः प्रसज्येत । अनिष्टं चैतत् सत्कार्यवादिनस्तव इति चेत्–न–कुतः ? 'प्रतिषेधमात्रत्वात्'। प्रतिषेधमात्रं ह्येतत्, न प्रतिषेध्यमस्तीत्यर्थः। न ह्ययं प्रतिषेधः प्रागुत्पत्तेः सत्त्वं कार्यस्य प्रतिषेद्धुं शक्नोति । इदानीमिव कारणब्रह्मव्यतिरेकेणासत्त्वात् प्रागुत्पत्तेरपि कारणात्मना सज्जगदिति नासत्कार्यवादप्रसङ्गः ।। ४ ।।

५. अपीतौ तद्वत्प्रसङ्गादसमञ्जसम् २–१–८

अत्राह—अशुद्ध्यादिमत् कार्यं अपीतौ—प्रलये ब्रह्मणाऽविभागमापाद्यमानं स्वीयधर्मेण कारणं दूषयेदिति—सर्वज्ञं ब्रह्म जगतः कारणमित्यसमञ्जसमेवौपनिषदं दर्शनमिति ।। ५ ।।

अत्रोत्तरम्—

६. न तु दृष्टान्तभावात् २–१–९

नैवास्मदीये दर्शने किञ्चिदसामञ्जस्यमस्ति—कार्यमपि जगत् आत्मधर्मेण कारणं न दूषयेदित्यत्र दृष्टान्तभावात् ।

विपर्यये तु रुचकादिकार्यमपीतौ हेमादिकारणं स्वधर्मेण न दूषयतीति दृष्टान्तोऽस्तीति ।। ६ ।।

७ स्वपक्षदोषाच्च २-१-१०

स्वपक्षे चैते प्रतिवादिनः साधारणा दोषाः प्रादुष्युः । शब्दादिहीनात् प्रधानात् शब्दादिमत्कार्यं प्रभवतीति वदतो विलक्षणत्वादकारणत्वदोषः स्पष्टः । विलक्षणत्वादेव कारणावस्थायां अविद्यमानत्वेन कार्यस्यासत्कार्यवादप्रसङ्गोऽपि समानः । तथाऽपीतौ कार्यकारणाविभागाभ्युपगमात् कारणे कार्यदोषप्रसङ्गः ।। ७ ।।

८. तर्काप्रतिष्ठानादप्यन्यथानुमेयमिति चेदनिर्मोक्षप्रसङ्गः २-१-११

अपि च केवलागमगम्येऽर्थे न स्वतन्त्रतर्कावकाशः, येन प्रधानसिद्धिः स्यात् । अनवकाशश्च तर्काणामप्रतिष्ठानात् । पुरुषोत्प्रेक्षामात्रनिबन्धनास्तर्का अप्रतिष्ठिता भवन्तीत्यर्थः ।।

तदुक्तम्—

' यत्नेनानुमितोऽप्यर्थः कुशलैरनुमातृभिः ।
अभियुक्ततरैरन्यैरन्यथैवोपनीयते ' (तं. वा.) इति ।।

' अन्यथाऽनुमेयं '—यथा तर्काणामप्रतिष्ठितत्वं न भवेत्, तथाऽनुमेयम् । यथा प्रत्यक्षादिषु तदाभासपरित्यागेन प्रतिष्ठितं प्रत्यक्षादि गृह्यते, तथैवानुमानाभासपरित्यागेन स्वाभाविकप्रसिद्धिमल्लिङ्गानुसारेण निपुणेन प्रमात्रा प्रधानादिकारणमनुमेयमिति चेन्—' एवमप्यनिर्मोक्षप्रसङ्गः ' ।।

यद्यपि क्वचिद्विषये तर्कस्य प्रतिष्ठितत्वमुपलभ्यते ; तथाऽपि प्रकृते तावद्विषये प्रसज्यत एवाप्रतिष्ठितत्वदोषादनिर्मोक्षप्रसङ्गः तर्कस्य । प्रधानादि-

जगत्कारणसद्भावे न स्वाभाविकप्रतिबन्धवल्लिङ्गमस्ति। यत्तु साधर्म्यवैधर्म्यमात्रं, तदुक्तप्रकारेणोक्तदोषबलात् न प्रतिष्ठितम् ॥ ८ ॥

[इति विलक्षणत्वाधिकरणम्]

—o—

[शिष्टापरिग्रहाधिकरणम्]

१. एतेन शिष्टापरिग्रहा अपि व्याख्याताः—१-२-१२

एवं सांख्ययोगस्मृतिन्यायान् दुर्बलत्वेन दूषयित्वा काणादबौद्धस्मृतिन्यायजातमनेनाधिकरणेन दूष्यते ॥

कणादबुद्धादिस्मृतितदीयतर्केण च समन्वयो बाध्यते? न वा? इति तावत्प्राप्तम्। कणादेन परमर्षिणा परमाणूनां जगत्कारणत्वस्मरणात्, विमतं द्व्यणुकादिकं तस्मान्न्यूनपरिणारब्धं, कार्यद्रव्यत्वात्, यथा तन्तुभिः पट इति न्यायसंभवाच्च ॥

विष्णोरवतारो भगवान् बुद्धः जगत्कारणमभावं सस्मार। विमतं भावरूपं जगत् अभावपुरस्सरं, भावरूपत्वात्, यथा सुषुप्तिपुरस्सरः स्वप्नप्रपञ्च इति न्यायोऽपि तेनोक्तः। तस्मात् काणादादिमतैः समन्वयबाध इति प्राप्ते—

राद्धान्तः—एतेनेति। एतेन—प्रधानकारणवादनिराकरणेन शिष्टापरिग्रहाः—अण्वादिकारणवादाः। परिगृह्यन्त इति परिग्रहाः—न परिग्रहाः अपरिग्रहाः। शिष्टानां—मन्वादीनां अपरिग्रहा इति यावत्। तेऽपि व्याख्याताः—निराकृताः वेदितव्याः ॥

मनुव्यासप्रभृतिभिः वैदिकशिरोमणिभिः प्रकृतिपुरुषप्रतिपादिका साङ्ख्ययोगस्मृतिः दौर्बल्येन यदा परित्यक्ता, तदा निखिलैः शिष्टैः परित्यक्तानां काणादादिमतानां दौर्बल्यमिति किमु वक्तव्यम् । न हि मन्वादिस्मृतिषु ब्राह्मपाद्मादिपुराणेषु द्व्यणुकप्रक्रियोदाहृता । प्रत्युत—

'हैतुकान् बकवृत्तींश्च वाङ्मात्रेणापि नार्चयेत्'

इति निन्दोपलभ्यते । न हि मूलादारभ्यत्वनियमो विवर्तवादेऽस्ति । दूरस्थपर्वताग्रस्थितैः महद्भिर्वृक्षैरत्यल्पदूर्वाभ्रमस्य जन्यमानत्वात् ॥

बौद्धानुमाने च दृष्टान्तः साध्यविकलः, सुषुप्तेरेवावस्थात्वेनावस्थावत आत्मनः सद्रूपस्याङ्गीकरणीयत्वे सति स्वप्नस्य भावपुरस्सरत्वात् ॥

तस्मादेभिर्मतैः नास्ति समन्वयबाधः ॥ १ ॥

[इति शिष्टापरिग्रहधिकरणम्]

[५. भोक्त्रापत्त्यधिकरणम्]

१. भोक्त्रापत्तेरविभागश्चेत् स्याल्लोकवत् २-१-१३

*प्रकारान्तरेण ब्रह्मकारणवाद आक्षिप्य समाधीयते ॥

यदि भोग्यस्य प्रपञ्चस्य परमकारणाद्ब्रह्मणोऽनन्यत्वं, तदा भोक्ता चेतनो भोग्यभावमापद्येतेति तयोरविभागः प्रसज्येत । न च प्रत्यक्षादि-

---

*पूर्वं ब्रह्मणि तर्कस्याप्रतिष्ठितत्वेऽपि, जगद्भेदे प्रत्यक्षस्य प्रतिष्ठितत्वात् विरुध्यत एवेति प्रत्युदाहरणसंगत्येदमाह—स·शि·वृ.

सिद्धस्य भोक्तृभोग्यविभागस्याभेदो न्याय्य इति चेत्— तत्रोत्तरं 'स्याल्लोकवत्' इति । उपपद्यत एवास्मत्पक्षेऽपि विभागः, एवं लोकदृष्टत्वात् ।।

तरङ्गादिरूपेण भेदस्य समुद्रादिरूपेणाभेदस्य च दृष्टत्वेन भेदाभेदयोर्विरोधाभावात् । प्रकृतेऽपि ब्रह्माकारेणाद्वैतं, भोक्तृभोग्यभावेन च द्वैतमिति ।। १ ।।

[इति भोक्त्रापत्त्यधिकरणम्]

[६. आरम्भणाधिकरणम्]

१. तदनन्यत्वमारंभणशब्दादिभ्यः २-१-१४

*पूर्वस्मिन्नधिकरणे भेदाभेदयोरुभयोरपि सत्यत्वात् 'एकमेवाद्वितीयं ब्रह्म' (छा. ६-२-१) इति श्रुतिरुपचरितार्था स्यादिति मुख्यार्थत्वं प्रतिपादयितुमिदमधिकरणम् ।।

प्रत्यक्षादिसिद्धभोक्तृभोग्यभेदः किमद्वैतं बाधते ? न वा ? इति संशये—अद्वैतवस्तुनि आकारभेदस्यैवानुपपत्तेः समुद्रतरङ्गन्यायेन भेदाभेदानाश्रयणात्, अद्वैतब्रह्मणोऽप्याकारभेदाङ्गीकारेऽनित्यत्वप्रसङ्गाच्च भोक्तृभोग्यप्रपञ्चभेदोऽद्वैतं बाधते—इति प्राप्ते—

राद्धान्तः—भोक्तृभोग्यविभागो न पारमार्थिकः । तत्र हेतुः—तदनन्यत्वम् । यस्मात् तयोः—कार्यकारणयोः अनन्यत्वमवगम्यते ।

---

* पूर्वं परिणामवादमवलम्ब्यापाततः 'स्याल्लोकवत्' इति समाधानमभिहितम् । अधुना विवर्तवादमाश्रित्य परमं समाधानमभिधीयत इति एकफलकत्वसंगत्येदमाह—स.शि.वृ.

कार्यमाकाशादिकं बहुप्रपञ्चं जगत् । कारणं परं ब्रह्म । तस्मात्कारणात् परमार्थतोऽनन्यत्वं—व्यतिरेकेणाभावः कार्यस्यावगम्यते । कुतः ? ' आरंभणशब्दादिभ्यः ' ॥

आरंभणशब्दस्तावत्—एकविज्ञानेन सर्वविज्ञानं प्रतिज्ञाय, दृष्टान्तापेक्षायामुच्यते ' यथा सौम्यैकेन मृत्पिण्डेन सर्वं मृण्मयं विज्ञातं स्याद्वाचारंभणं विकारो नामधेयं मृत्तिकेत्येव सत्यम् ' (छा. ७-१-१) इति ॥

एतदुक्तं भवति—एवं हि ब्रह्मविज्ञानेन सर्वं जगत् तत्त्वतो ज्ञातं, यदि ब्रह्मतत्त्वं जगतो भवेत् । यथा रज्जुसर्पभ्रमे, रज्ज्वां ज्ञातायां भुजङ्गतत्त्वं ज्ञातं भवति । सा हि तस्य तत्त्वं, तत्त्वज्ञानं च ज्ञानतोऽन्यन्मिथ्याज्ञानमेव । यथा चैकेन मृत्पिण्डेन परमार्थतो मृदात्मना विज्ञातेन सर्वं मृण्मयं घटशरावोदञ्चनादिकं मृदात्मत्वाविशेषात् विज्ञातं भवेत् ॥

एवं ब्रह्मव्यतिरेकेणाकाशादिकार्यस्य सत्त्वासत्त्वाभ्यामनिर्वाच्यस्य ब्रह्मैव तत्त्वं भवेत् ॥

ननु मृदादिकारणाद्भेदेन प्रतीयमानं घटादिकार्यम् तत् कथमारोपितम् ? येन कारणमेव कार्यस्य तत्त्वं भवेत् । तत्राह श्रुतिः—' वाचारंभणं विकारो नामधेयंमृत्तिकेत्येव सत्यम् ' इति । अस्यास्त्वयमर्थः—वाचास्तीत्यारभ्यते विकारो नाम घटः, शरावः, उदञ्चनश्चेति । न च वस्तुवृत्तेन विकारो नाम कश्चिदस्ति, नामधेयमात्रं ह्येतत् अनृत, मृत्तिकेत्येव सत्यमिति ॥

न च प्रत्यक्षसिद्धभोक्तृभोग्यभेदोऽद्वैतबाधक इति शक्यं वक्तुम् ; सांव्यवहारादिकप्रमाणभावस्य पूर्वप्रवृत्तस्य तत्त्वावेदकप्रमाणेन परप्रवृत्तेनावगमेन बाध्यत्वात्, यथा ' इदं रजतं ' इति ज्ञानं ' नेदं रजतं ' इति ज्ञानेन बाध्यते । तस्मात् श्रुतियुक्तिभ्यां युक्तेर्बाधितत्वात् समञ्जसतरमद्वैतमिति ॥१॥

२. भावे चोपलब्धेः २ १-१५

किञ्च, भाव एव कारणस्य कार्योपलब्धेरपि कारणस्वरूपमेव कार्यस्य तत्त्वम् ; यथा सत्यां मृदि घटः, सत्सु तन्तुषु पटः । न ह्यश्वो गोरन्यःसन् गोर्भाव एवोपलक्ष्यते ।।

'भावाच्चोपलब्धेः' इति वा सूत्रम् । न केवलं शब्दादेव कार्यकारणयोरनन्यत्वम्, प्रत्यक्षोपलब्धिभावाच्च तयोरनन्यत्वमित्यर्थः । तद्यथा—तन्तुसंस्थाने पटे तन्तुव्यतिरेकेण पटो नाम कार्यं नैवोपलभ्यते । आतानवितानवन्तस्तन्तव एव प्रत्यक्षमुपलभ्यन्ते, एवं प्रकृतेऽपि प्रत्यग्ब्रह्मैव सर्वगतमित्यवगन्तव्यम् ।। २ ।।

३. सत्त्वाच्चापरस्य २-१-१६

किञ्च, अपरस्य—अपरकालीनस्य कार्यस्य उत्पत्तेः प्राक् कारणात्मना सत्त्वं—अवस्थानं श्रुतम् । तस्मादपि कारणमेव कार्यस्य सत्त्वम् । तथा च श्रुतिः 'सदेव सौम्येदमग्र आसीत्' (छा. ६-२-१) इति, 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. -१-१) इत्यादि ।। ३ ।।

४. असद्व्यपदेशान्नेतिचेन्न धर्मान्तरेण वाक्यशेषात् २-१-१७

'असदेवेदमग्र आसीत्' (छा. ६-२-१) इति कार्यस्य क्वचिदसद्व्यपदेशात् प्रागुत्पत्तेरसत्त्वमिति चेत्—नेति ब्रूमः । न ह्यत्यन्तासत्त्वाभिप्रायेणासत्त्वव्यपदेशः ; किं तर्हि? धर्मान्तरेण—व्याकृतनामरूपत्वात् अव्याकृतनामरूपत्वं धर्मान्तरम् । तेन धर्मान्तरेणायमसद्व्यपदेशः प्रागुत्पत्तेः सत एव कार्यस्य कारणरूपेणानन्यस्य ।।

कथमिदमवगम्यते ? वाक्यशेषात् 'तत्सदासीत्' इति ।। ४ ।।

५. युक्तेः शब्दान्तराच्च २-१-८

किञ्च, युक्तेश्च शब्दान्तराच्च प्रागुत्पत्तेः कार्यस्य सत्त्वमवगम्यते । युक्तिस्तावत्—प्रागुत्पत्तेः कार्यस्यासत्त्वे, दध्यर्थिनां क्षीरोपादाने नियता प्रवृत्तिर्न स्यात्, घटार्थिनो मृदादिषु ; असत्त्वस्य प्रागुत्पत्तेः सर्वत्राविशिष्टत्वात् । क्षीरे कश्चिदतिशयो दध्नः, मृत्तिकायां वा घटस्येत्यतिशयकल्पनायां— अतिशयस्यास्य धर्मस्य धर्मिणं विनाऽवस्थानानुपपत्तेः असत्कार्यवादहानिः, सत्कार्यवादस्य सिद्धिश्च ।।

अथ मतं —नातिशयो नियमहेतुः, कार्ये कारणस्य शक्तिभेदः । स चासति कार्ये कारणस्य सत्त्वात् सन्नेवेति—नैतद्युक्तम्— तस्याः कार्यकारणाभ्यामन्यत्वपक्षे कार्यात्विना सत्त्वे च न नियामकत्वम् ; असत्त्वाविशेषात्, अन्यत्वाविशेषाच्च । तस्मात् कारणस्यात्मभूता शक्तिः, शक्तेश्चात्मभूतं कार्यमभ्युपगन्तव्यमिति ।।

शब्दान्तरमपि 'सदेव सौम्येदमग्र आसीत्' (छा. ६-२-१) इति । अवधारणमिदं शब्दकार्यस्य वाच्यस्य सत्त्वं दर्शयति ।। ५ ।।

७. पटवच्च १-१-१९

यथा संवेष्टितः पटो न व्यक्तं गृह्यते, किमयं पटः ? किं वाऽन्यद्रव्यम् ? इति ; स एव प्रसारितः 'यत् संवेष्टितं द्रव्यं, तत् पट एव' इति प्रसारणेनाभिव्यक्तो गृह्यते, एवं तन्त्वादिकारणावस्थं पटादि कार्यं तुरीवेमकुविन्दादिकारणव्यापाराभिव्यक्तं स्पष्टं गृह्यते । एवमुक्तन्यायेनानन्यत्कारणात्कार्यमिति ।। ६ ।।

८. यथा च प्राणादिः २-१-२०

किञ्च, यथा प्राणापानादिकं वस्तु प्राणायामेन निरुध्यमानं जीवनमात्रं कार्यं करोति, नाकुञ्चनादिकार्यम् निवृत्ते च निरोधे प्राणादिभेदप्रवृत्त्याऽऽकुञ्चनादि कार्यं प्रवर्तते । न च प्राणभेदानां प्रभेदवतः प्राणादन्यत्वम्, समीरणस्वभावविशेषात्—एवं कार्यस्य कारणादनन्यत्वम् ।।

तस्मात् रज्जुसर्पवत् सर्वस्यापि प्रपञ्चस्य ब्रह्मकार्यस्य ब्रह्मण्येवारोपितत्वात् ज्ञानान्निवृत्त्युपपत्तेः अद्वैतसिद्धौ, तत्र वेदसमन्वयोऽपि युक्त इति सिद्धम् ।। ७ ।।

[इति आरम्भणाधिकरणम्]

[७. इतरव्यपदेशाधिकरणम्]

१. इतरव्यपदेशाद्धिताकरणादिदोषप्रसक्तिः २-१-२१

* प्रकारान्तरेण ब्रह्मकारणवाद आक्षिप्यते । जगतश्चेतनकारणत्वे चेतनरूपस्य परमेश्वरस्य हिताकरणादयो दोषाः प्रसज्यन्ते । कुतः ? 'इतरव्यपदेशात्'—'स आत्मा तत्त्वमसि श्वेतकेतो' (छा. ६-८-७) इति प्रबोधनात् इतरस्य जीवस्य ब्रह्मभावव्यपदेशात् । 'तत्सृष्ट्वा । तदेवानुप्राविशत्' (तै. आ. ६) इति तस्य परमेश्वरस्यापि जीवभावव्यपदेशाच्च ।

---

* पूर्वं कार्यस्य कारणादन्यत्वं एकविज्ञानप्रतिज्ञासिद्धये समर्थितम् । तर्हि तेनैव न्यायेन जीवब्रह्मणोरप्यभेदात् जीवधर्माः हिताकरणादयो ब्रह्मणि प्रसज्येरन्नित्याक्षेपसंगत्येदमाह—स.शि.वृ.

सर्वज्ञत्वात् परमेश्वरो जीवाद्भेदं प्रपश्य जीवगतहिताहितपुण्यपापादिभिर्युज्यत इति तात्पर्यार्थः ॥ १ ॥

समाधत्ते—

२. अधिकं तु भेदनिर्देशात् २-१-२२

तुशब्दः पक्षं व्यावर्तयति । यत् सर्वज्ञं सर्वशक्ति ब्रह्म नित्यमुक्तस्वभावं शारीरात् 'अधिकं'—अन्यत्, तत् वयं जगत्स्रष्टृ ब्रूमः । ततश्च सर्वज्ञत्वादेवेश्वरः जीवसंसारस्य मिथ्यात्वं, स्वस्य निर्लेपत्वं च पश्यन् जीवगतहितादिदोषैर्न लिप्यते । कुत एतत्? 'भेदनिर्देशात्'—'सोऽन्वेष्टव्यः स विजिज्ञासितव्यः' (छा. ८-७-१) इति कर्मकर्तृभावेन भेदनिर्देशादित्यर्थः ॥

प्रत्यग्ब्रह्मणः परमेश्वरत्वं स्रष्टृत्वं, जीवस्वरूपस्य सतः संसारित्वम् । स्रष्टृत्वं सर्वज्ञत्वं चानादिमिथ्याज्ञानविजृंभितम् । तच्च सम्यज्ज्ञानेन बाधितमिति कुत एव सृष्टिः? कुतो वा हिताकरणादिप्रसङ्गावकाश इति तात्पर्यार्थः ॥

एकस्यैव प्रत्यग्ब्रह्मणोऽविद्याकृतसंसारित्वापेक्षया भेदनिर्देशो हेतुत्वेनोक्तः ॥ २ ॥

३. अश्मादिवच्च तदनुपपत्तिः २-१-२३

यथा लोके वज्रवैडूर्यादिपाषाणादुत्तमवीर्या देहालङ्कारयोग्याः, वायसादिप्रक्षेपणार्हाश्चाधमवीर्याः, अन्ये सूर्यकान्तादयो मध्यमवीर्याः पृथिवीत्वसामान्याविशेषेऽपि दृश्यन्ते; यथा च वृक्षादयः पृथिव्याश्रयपार्थिवात्वविशेषेऽपि नानागुणा दृश्यन्ते, एवमेकस्यापि ब्रह्मणो जीवेश्वरत्वजगदाकृतिभेद-

भिन्नस्य जीवप्राज्ञपृथक्त्वं कार्यवैचित्र्यं च सर्वज्ञत्वकिञ्चिद्ज्ञत्वादिकं चोपपद्यते। अतः 'तदनुपपत्तिः'—परिकल्पितदोषानुपपत्तिरित्यर्थः ।।

श्रुतेश्च प्रामाण्यात्, विकारस्य वाचारंभणमात्रत्वात् 'स्वप्नदृष्ट-वैचित्र्यवच्च, इत्यभ्युच्चयार्थश्चकारः ।। ३ ।।

[इति इतरव्यपदेशाधिकरणम्]

[८. उपसंहारदर्शनाधिकरणम्]

१. उपसंहारदर्शनान्नेति चेन्न क्षीरवद्धि २-१-४

*'एकमेवाद्वितीयम्' (छा. ६-२-१) इतिश्रुत्या ब्रह्मणः स्वगत-सजातीयविजातीयनानात्वं निरस्तम्। अतः संशयो भवति—किमेका-द्वितीयात् सृष्टिर्भवति? न वा? इति ।।

घटादिकार्याणां मृद्दण्डचक्रचीवराद्यनेककारकोपसंहारदर्शनात्, एका-द्वितीयान्न सृष्टिर्भवतीति चेत्— नैषदोषः—यतः क्षीरवत् द्रव्यस्वभावविशेषा-दुपपद्यते। यथाहि लोके क्षीरं जलं वा स्वयमेव दधिभावेन, हिमभावेन, वा वर्धते अनपेक्ष्य बाह्यं साधनं, तथेहापि भविष्यति ।।

यद्यपि तत्त्वतो ब्रह्म अद्वैतं निरवयवं अविकारि कूटस्थं च— तथाप्य-विद्यासहायोपेतं जगत्कारणमिति श्रुतियुक्तिभ्यां अवगम्यते—'पराऽस्य

---

*पूर्व औपाधिकजीवभेदात् हिताकरणादिदोषो नास्तीत्युक्तम्। संप्रत्युपाधि-तोऽपि ब्रह्मणो विभक्तं कारणादिकं नास्ति, ब्रह्मनानात्वाभावादिति प्रत्युदाहरणसंगत्ये-दमाह—स.शि.वृ.

शक्तिर्विविधैव श्रूयते ' (श्वे. ६-२) ' मायां तु प्रकृतिं विद्यान्मायिनं तु महेश्वरम् ' (श्वे. ४-१०) इति च श्रुतिः परमप्रेमास्पदत्वेन सुखरूपत्वे सिद्धे, दुःखरूपत्वप्रतीतिः अविद्याकल्पितैवेति युक्तिः ।। १ ।।

असहायत्वेन चेतनकारणत्वाक्षेपे अचेतनदृष्टान्तो न युक्त इति—तत्राह—

२. देवादिवदपि लोके २-१-२५

यथा लोके देवा ऋषयः पितरो वा बाह्यसाधनानपेक्षया प्रासादादि निर्मिमाणा दृश्यन्ते, बलाका चान्तरेण शुक्रं गर्भं धत्ते, तद्वदिहापि भविष्यतीति ।। २ ।।

[इति उपसंहारदर्शनाधिकरणम्]

[९. कृत्स्नप्रसक्त्यधिकरणम्]

१. कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा २-१-२६

* कार्यकारणयोरभेदस्य साधितत्वादारंभवादोऽभिमतः । परिणामपक्षे तु—ब्रह्मणः किं दध्यादिवत् कार्त्स्न्येन चेतनपरिणामः ? उतैकदेशेन ? इति संशये—

---

*पूर्वं क्षीरादिदृष्टान्तकथनेन ब्रह्मणः परिणामित्वभ्रमोत्पत्तेः तन्निरसनमनेन क्रियत इति कार्यकारणभावसंगत्येदमाह—स·शि.वृ.

पूर्ववाद्याह—कृत्स्नेति । कृत्स्नप्रसक्तिः—कृत्स्नस्य ब्रह्मणः कार्य-रूपेण परिणामः प्रसज्येत । तदा क्षीरवदनित्यत्वमपि स्यात् । अथैतद्दोषपरिजिहीर्षया सावयवं ब्रह्माभ्युपगम्येत, तर्हि निरवयवत्वशब्दकोपः प्र —'निष्कलं निष्क्रियं शान्तम्' (श्वे. ६-१९) इत्यादिशब्दोऽप्रमाणं स्यादित्यर्थः ।। १ ।।

अत्र सिद्धान्त्याह—

२. श्रुतेस्तु शब्दमूलत्वात् २–१–२६

तुशब्देनाक्षेपं परिहरति । न खल्वस्मत्पक्षे कश्चिदपि दोषोऽस्ति । न तावत् कृत्स्नप्रसक्तिरस्ति । कुतः? यथैव ब्रह्मणो जगदुत्पत्तिः श्रूयते, एवं विकारव्यतिरेकेणापि ब्रह्मणोऽवस्थानं श्रूयते 'तावानस्य महिमा । अतो ज्यायांश्च पूरुषः' (छा. ३-१२-६) इत्यादौ । न च निरवयवत्व-शब्दकोपोऽस्ति, श्रूयमाणत्वादेव । ब्रह्मणः 'शब्दमूलत्वात्'—शब्द-प्रमाणकत्वात्, इन्द्रियादिप्रमाणागम्यत्वात् शब्दावगतमुभयं कृत्स्नप्रसक्ति-निरवयवत्वं चोभयं अङ्गीकर्तव्यम् ।।

एतदुक्तं भवति—'इन्द्रो मायाभिः पुरुरूप ईयते' (बृ. २. ५-१९) इतिश्रुतेः ब्रह्मणो मायाशक्तिवशाज्जगद्रूपत्वपरिणामः नासौ वास्तवः, आकाशस्येव नीरूपस्य निरवयवस्यापि तलमलिनतादिरूपपरिणामः । तस्मात् कृत्स्नैकदेशविकल्पानवकाशात् युज्यते परिणाम इति ।। २ ।।

३. आत्मनि चैवं विचित्राश्च हि २–१–२७

किञ्च, आत्मन्यप्येकस्मिन् स्वरूपानुपमर्देनैव 'अथ रथान्' (बृ. ४-३-१०) इत्यादौ विचित्राकाराः सृष्टयः पठ्यन्ते । लोकेऽपि

देवादिषु च स्वरूपानुपमर्देनैव विचित्रहस्त्यश्वादिसृष्टयो दृश्यन्ते। एवमेकस्मिन्नपि ब्रह्मणि घटते ॥ ३ ॥

४. स्वपक्षदोषाच्च २-१-२९

प्रतिवादिनोऽपि सांख्यस्य स्वपक्षेऽयं दोषः प्राप्नोति। तथाहि—प्रधानमपि निरवयवं शब्दादिहीनं अपरिच्छिन्नम्। तत्परिणामाङ्गीकारे कृत्स्नप्रसक्तिर्निरवयवत्वाभ्युपगमविरोधश्चेत्येतौ दोषौ प्राप्नुत एव। तत्र ब्रह्मवादिना स्वपक्षदोषस्य परिहृतत्वात् सांख्येन परिहर्तुमशक्यत्वान्न समत्वम् ॥ ४ ॥

[इति कृत्स्नप्रसक्त्यधिकरणम्]

[१०. सर्वोपेताधिकरणम्]

सर्वोपेता च तद्दर्शनात् २-१-३०

* एकस्यापि ब्रह्मणः विचित्रा मायाशक्तिः सहकारिणीत्युक्तम्। तत्र संशयः—अशरीरस्य ब्रह्मणो माया संभवति? न वा? इति। लोके मायाविनामैन्द्रजालिकानां शरीरवत्त्वदर्शनात् अशरीरस्य ब्रह्मणो माया न संभवतीति प्राप्ते—

राद्धान्तः—सर्वोपेता चेति। 'सर्वोपेता'—सर्वशक्तियुक्ता परा देवता। कुतः? 'तद्दर्शनात्'। तथा हि दर्शयति श्रुतिः—सर्वशक्तियोगं परस्या देवतायाः 'सर्वकर्मा सर्वकामः सर्वरसः' (छा. ३-१४-४) इत्यादिका ॥ १ ॥

---

* पूर्वोक्तविचित्रकार्यशक्तिमत्त्वविषयशङ्कानिरासेनसमर्थनात् विषयविषयिभावसंगत्येदमाह—स.शि.वृ.

२. विकरणत्वान्नेति चेत्तदुक्तम् २–१–३१

'अचक्षुष्कमश्रोत्रमवागमनः' (बृ. ३-८-८) इत्यादिश्रुतेः करणरहितत्वावगमात् न मायाशक्तियोग इति चेत्— न—कुतः ? 'तदुक्तम्' —यदत्रोत्तरं वक्तव्यं तत् पुरस्तादेवोक्तम्। यथैन्द्रजालिकानां बाह्यसाधनानपेक्षया लौकिकमायाविनां गृहनिर्माणादिहेतुत्वं दृष्टम्, तथा ब्रह्मणोऽपि विना शरीरं चक्षुरादिकरण वा मायावित्वं संभवति। प्रत्यक्षदृष्टत्वात् बाह्यनैरपेक्ष्येण निर्मातृत्वं युक्तमिति चेत्— न—तर्हि शरीरनैरपेक्ष्येण ब्रह्मणोऽपि मायावित्वे 'मायिनं तु महेश्वरम्' (श्वे- ४-१०) इति श्रुतिः प्रमाणम् ॥

अथवा 'अपाणिपादो जवनो गृहीता पश्यत्यचक्षुः स शृणोत्यकर्णः' (श्वे. ४-१९) इत्यादिश्रुतिः अशरीरस्याविद्यावशात् सर्वशक्तिमत्त्वं दर्शयति। न च मायाऽविद्ययोर्भेदः, उभयोरप्यनिर्वचनीयत्वलक्षणस्यैकत्वात् ॥ २ ॥

[इति सर्वोपेताधिकरणम्]

[प्रयोजनवत्त्वाधिकरणम्]

१. न प्रयोजनवत्त्वात् २–१–३२

* 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८) इत्यादिश्रुतिसिद्धनित्यसुखरूपं ब्रह्म किं जगत् सृजति ? न वा ? इति संशये तावदाह पूर्ववादी—

---

* पूर्वं श्रुत्यवष्टंभेन सर्वशक्तिमतो ब्रह्मणः कर्तृत्वमवादि। तदाक्षिप्य समाधानादाक्षेपसंगत्येदमाह—स. शि. वृ.

नेति । कुतः ? 'प्रयोजनवत्त्वात्'—लोके चेतनप्रवृत्तीनां प्रयोजनवत्त्वदर्शनात्, इह च तदभावादित्यर्थः । न हि नित्यतृप्तस्य परमात्मनः स्वार्था सृष्टिः संभवति । नापि जीवार्था, तस्य परमात्मनोऽनन्यत्वात् ॥

अत्राह सिद्धान्ती—

२. लोकवत्तु लीलाकैवल्यम् २-१-३३

तुशब्देनाक्षेपं परिहरति । यथा आप्तकामस्य राज्ञः प्रयोजनमनभिसन्धाय केवललीलारूपाः— क्रीडारूपाः व्यवहाराः भवन्ति, श्वासोच्छ्वासादयोऽपि चेष्टाः विनैव प्रयोजनं बालानां दृश्यन्ते, तद्वन्नित्यतृप्तोऽपि परमेश्वरः प्रयोजनमन्तरेणापि अनु....सन् सृजति ॥

अविद्याकल्पितनामरूपव्यवहारगोचरत्वात सृष्टिप्रतिपादनस्य, ब्रह्मात्मभावप्रतिपादनाङ्गत्वेन परमानन्दरूपमोक्षफलत्वं न विस्मर्तव्यम् ॥ २ ॥

[इति प्रयोजनवत्त्वाधिकरणम्]

———

[१२. वैषम्यनैर्घृण्याधिकरणम्]

१. वैषम्यनैर्घृण्ये न सापेक्षत्वात् तथाहि दर्शयति २-१-३४

*किं जगत्कर्ता ईश्वरः वैषम्यनैर्घृण्यरूपदोषवान् ? न वा ? इति संशये – कांश्चिद्देवादीन् सुखिनः सृजतः, कांश्चित्पश्वादीन् दुःखिनः सृजतः

* पूर्वं मायामय्या लीलया ब्रह्मणः स्रष्टृत्वमवादि । तदाक्षिप्य समाधानादाक्षेपसंगत्येदमाह—स० शि० वृ०

कांश्चिन्मनुष्यादीन् सुखदुःखभाजः सृजतः........वैषम्यनैर्घृण्ये नेश्वरस्य प्रसज्येते । कुतः ? 'सापेक्षत्वात्'—सृज्यमानप्राणिधर्माधर्मसापेक्षत्वात् सृष्टेरित्यर्थः । धर्माधर्मसापेक्षत्वे गमकमाह—'तथाहि दर्शयति' इति । श्रुतिरिति शेषः । 'एष ह्येवासाधु कर्म कारयति' (कौ. ब्रा. ३-८) इत्येवमादिकश्रुतिरिहोदाहर्तव्या ॥

पुण्यपापनियामकत्वादुक्तदोषस्तदवस्थ इति चेत्—न—तत्तद्वस्तुगत-शक्तीनां व्यवस्थापरिहारमात्रनियामकत्वेनाभिप्रेतत्वात् । शक्तयस्तु माया-मात्रशरीरगताः; न तु तासामुत्पादक ईश्वर इति न वैषम्यनैर्घृण्यदोषः ॥ १ ॥

२. न कर्माविभागादिति चेन्नानादित्वात् २–१–३५

'सदेव सौम्येदमग्र असीदेकमेवाद्वितीयम्' (छा. ६-२-१) इति प्राक्सृष्टेरविभागावधारणात् न कर्म तदानीमस्ति, यत् सृष्टावपेक्ष्येतेति —नायं दोषः—अनादित्वात्संसारस्य । तर्हि प्रथमसृष्टौ कर्माभावात् उक्तदोषः स्यात्; अनादित्वात् संसारस्य ब्रह्मविद्यामन्तरेण नान्तोऽस्तीति बीजात्मनाऽवस्थितमपेक्ष्यत इति तात्पर्यार्थः ॥ २ ॥

कथं संसारस्यानादित्वम् ? अत आह—

३. उपपद्यते चाप्युपलभ्यते च २–१–३६

उपपद्यते च संसारस्यानादित्वम् । आदिमत्त्वे हि संसारस्याकस्मा-दुद्भूतौ मुक्तानामपि पुनः संसारप्रसङ्गः । अकृताभ्यागमः कृतविप्रणाशश्च प्रसज्येयाताम् ॥ ३ ॥

उपलभ्ये च श्रुतिस्मृत्योः संसारस्यानादित्वम् । 'सूर्याचन्द्रमसौ धाता यथापूर्वमकल्पयत्' (ऋ. स. १०-१९०-३, महा. ५-७) इति

श्रुतिः । 'न रूपमस्येह तथोपलभ्यते नान्तो न चादिर्न च संप्रतिष्ठा' (भ. गी १५-३) इति स्मृतिः ॥ ३ ॥

[इति वैषम्यनैर्घृण्याधिकरणम्]

[१३· सर्वधर्मोपपत्त्याधिकरणम्]

१. सर्वधर्मोपपत्तेश्च २-१-३७

* चेतनं ब्रह्म जगतः कारणं प्रकृतिश्चेत्यस्मिन्नवधारिते वेदार्थे परै रुपक्षिप्तान् विलक्षणत्वादिदोषान् पर्यहार्षीदाचार्यः । इदानीं परिणामारंभसङ्घातवादान् सांख्यवैशेषिकबौद्धाद्यभिमतान् निराकरिष्यमाणः स्वपक्षं विवर्तवादमुपसंहरति ॥

यदेतत् प्रकृतित्वं नाम कार्याकारेण विक्रियमाणत्वं, तत् किं ब्रह्मणोऽपि क्षीरादिवत् दध्याकारेण परिणामित्वम् ? उत रज्वादिवत् भ्रमाधिष्ठानत्वम् ? इति संशये—ब्रह्मणो निर्गुणस्य क्षीरादिवत् परिणामित्वानुपपत्तेः, सावयवस्यैव रज्वादेः भ्रमाधिष्ठानत्वदर्शनाच्च नोभयविधमपि कारणत्वम्—इति प्राप्ते—

राद्धान्तः—सर्वधर्मेति । यस्मादस्मिन् प्रत्यग्ब्रह्मणि कारणे परिगृह्यमाणे जीवेश्वरत्वजगदाकृतिसकलप्रपञ्चभेदभ्रमाधिष्ठानत्वादयः दर्शितेन प्रकारेण सर्वे कारणधर्मा उपपद्यन्ते । यस्मात् सर्वज्ञं सर्वशक्तं महामायं च ब्रह्म ॥

---

* पूर्वं विषमसृष्टिप्रयोजिककर्मणः सत्त्वात् ब्रह्मणः विषमसृष्टिहेतुत्वमुक्तम् । तद्वदुपादानत्वप्रयोजकगुणवत्त्वस्याभावात् नोपादानत्वमिति प्रत्युदाहरणसंगत्यदमाह—स. शि· वृ.

एतदुक्तं भवति—निर्गुणस्य निरवयस्य कूटस्थस्याविकारिणः परिणामित्वासंभवेऽपि रज्वादिवत् भ्रमाधिष्ठानत्वमुपपद्यते । रज्वादेरविकारिणः कूटस्थतयाऽवस्थितस्यैव सर्पादिभ्रमाधिष्ठानत्वमात्रेण दृष्टान्तत्वोपपत्तौ सावयवत्वनिरवयवत्वादिकमप्रयोजकम् । निरवयवस्याकाशस्येन्द्रनीलमणिमयावाङ्मु *[खकटाहभ्रमाधिष्ठानत्वं दृश्यते । अतः निर्गुणस्य निरवयवस्यापि ब्रह्मणः अविद्यावशात् जगद्विवर्तोपादानत्वं युज्यत एव] ।। १ ।।

[इति सर्वधर्मोपपत्त्यधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृग राधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

द्वितीयाध्यायस्य

प्रथमःपादः

———

* कुण्डलितो भागः मातृकायां लुप्तः, संपादकेन पूरितः ।।

द्वितीयाध्यायस्य

द्वितीयः पादः

[७. रचनानुपपत्त्यधिकरणम्]

* [इत्थं मुमुक्षोः सम्यग्ज्ञानोत्पादके त्रय्यन्तसमन्वये परपरिकल्पितदोषनिरासेन स्वपक्षः स्थापितः । अधुना मुमुक्षोः निर्दोषेऽद्वैतदर्शने निर्विचिकित्सप्रवृत्तिसिद्धये परमतदूषणप्रधानः पादोऽयमारभ्यते । एवञ्च समन्वयविरोधनिरासेन स्वपक्षस्थापनपरप्रथमपादेनास्य परमतनिरासनपरस्य पादस्योपजीव्योपजीवकभावः सङ्गतिः ॥

'सर्वधर्मोपपत्तेश्च' (ब्र. सू. २-१-३७) इत्यनेन ब्रह्मणि कारणधर्माणामुपपत्तिरुक्ता । तेषां प्रधान एवोपपत्तिः किं न स्यात् ? इत्याक्षिप्यात्र समाधीयत इत्याक्षेपलक्षणावान्तरसङ्गत्या इदमधिकरणमारभ्यते ॥

१. रचनानुपपत्तेश्च नानुमानम् २-२-१

अत्र पूर्वपक्षे सांख्ययुक्तिविरोधात् समन्वयासिद्धिः सिद्धान्ते तदविरोधात् तत्सिद्धिरिति फलभेदः । प्रधानमचेतनं जगदुपादानमिति सांख्यसिद्धान्तोऽत्र विषयः ? स किं प्रमाणमूलः ? भ्रान्तिमूलो वा ? इति सन्देहे—जगत् सुखदुःखमोहात्मकवस्तूपादानकं, तदन्वितत्वात्, मृदन्वितघटादिवत्—इत्यनुमानेन यत् सुखाद्यात्मकं सिद्धं, तदेव त्रिगुणात्मकं प्रधानम् । अतः प्रामाणिकः सांख्यसिद्धान्तः इति पूर्वः पक्षः ॥

---

* एवं समनन्तरपुटेऽपि कुण्डलितो भागः सदाजीवब्रह्मेन्द्रवृत्तेः संयोजितः, यतः एतद्भागस्य मातृका लुप्ता ॥

सिद्धान्तस्तु—नोक्तानुमानसिद्धं प्रधानं जगदुपादानम्। कुतः? 'रचनानुपपत्तेः'—अचेतनात् स्रष्टव्यज्ञानशून्यात् प्रधानात् अनेकविध-विचित्रजगद्रचनानुपपत्तेः इत्यर्थः। लोके विचित्रप्रासादादिरचनायाः बुद्धिकुशलशिल्प्यादिकार्यत्वदर्शनादिति भावः। सूत्रे 'च' शब्देन हेतोः स्वरूपासिद्धिं समुच्चिनोति। सुखादीनामान्तरत्वप्रतिपत्तेः तदन्वितत्वं जगतोऽसिद्धम्। तस्मात् न प्रामाणिकः सांख्यसिद्धान्त इति॥ २॥

यत्तु 'शक्तितः प्रवृत्तेश्च' इति–तत्राह—

२. प्रवृत्तेश्च २–२–२

लोके हि अचेतनरथादिप्रवृत्तेः चेतनाधीनत्वदर्शनात् प्रधानस्य साम्यावस्थाप्रच्युतिरूपप्रवृत्तेश्चेतनमन्तरेण अनुपपत्तेरित्यर्थः॥ २॥

अन्यत्र व्यभिचारमाशङ्क्य परिहरति—

३. पयोऽम्बुबच्चेत्तत्रापि २–२–३

ननु अचेतनस्य स्वयं प्रवृत्तिर्दृश्यते। यथा क्षीरं वत्सविवृद्धये स्वयमेव प्रवर्तते, यथा वा जलं स्वयमेव स्यन्दते, तद्वत् प्रधानमपि स्वयमेव प्रवर्तत इति चेत्]—नैवम्—तत्रापि–पयोम्बुनोरपि चेतनाधिष्ठितयोरेव रथादिवत् प्रवृत्तिरित्यनुमिमीमहे। 'योऽप्सु तिष्ठन्' (बृ. ३-७-४) इति शास्त्रसिद्धान्तर्यामी चाम्बुप्रेरकः। धेनोश्च चेतनत्वात् क्षीरप्रवर्तकत्वं चेतनस्यैव॥ ३॥

४. व्यतिरेकानवस्थितेश्चानपेक्षत्वात् २–२–४

प्रधानस्य गुणत्रयात्मकस्य गुणव्यतिरेकेण प्रवर्तकं निवर्तकं वा न बाह्यमपेक्ष्यमवस्थितमस्ति। पुरुषस्तूदासीनो न प्रवर्तकः, न निवर्तकः।

अतोऽनपेक्षं प्रधानम् । अनपेक्षत्वाच्च प्रधानं सर्वदा प्रवर्तेत । अथवा न कदाचित् , नियामकाभावात् ।। ४ ।।

५. अन्यत्राभावाच्च न तृणादिवत् २-२-५

यथा तृणपल्लवलोदकादिकं निमित्तान्तरनिरपेक्षं क्षीराकारेण परिणमते, तथा प्रधानमपीति न युक्तम् । कुतः ? 'अन्यत्राभावात्'—धेनुशरीर-सम्बन्धादन्यत्र वृषभाद्युपभुक्तस्य क्षीररूपपरिणामाभावादित्यर्थः ।। ५ ।।

६. अभ्युपगमेऽप्यर्थाभावात् २-२-६

अस्तु स्वाभाविकी प्रवृत्तिः प्रधानस्येत्यभ्युपगम्येत, तथापि दोषः । कुतः ? 'अर्थाभावात्'—प्रयोजनाभावादित्यर्थः । पुरुषस्यानाधेयातिशयत्वात् न तस्य भोगाय प्रवृत्तिः । प्रागपि पुरुषस्यापवर्गस्य सिद्धत्वात् न मोक्षार्था प्रवृत्तिः ।। ६ ।।

७. पुरुषाश्मवदिति चेत्तथापि २-२-७

यथा पङ्गुः पुरुषो दृक्शक्तिसंपन्नो दृग्विहीनं अन्धं तमेवाधिष्ठाय प्रवर्तयति, अयस्कान्तो वा मणिः स्वयमप्रवर्तमानोऽप्ययः प्रवर्तयति, एवं प्रधानं पुरुषः प्रवर्तयतीति चेत्-मैवम्—यतस्तथापि दोषान्न निर्मोक्षोऽस्ति । प्रधानस्य स्वतन्त्रताभ्युपगमहानिरेको दोषः, पुरुषस्यौदासीन्यहानिरपरः ।। ७ ।।

८. अङ्गित्वानुपपत्तेश्च २-२-८

यदि प्रधानावस्था कूटस्थनित्या, तर्हि तस्याः प्रच्युतेरभावात् गुणानामङ्गाङ्गिभावानुपपत्तेः प्रधानस्य महदाद्युत्पादनाय न प्रवृत्तिः । यदि

परिणामिनित्या, तर्हि बाह्यस्य क्षोभयितुरभावादङ्गाङ्गित्वानुपपत्त्योक्तदोषः ॥ ८ ॥

९. अन्यथाऽनुमितौ च ज्ञशक्तिवियोगात् २-२-९

महदादिकार्योत्पादननिबन्धात् साम्यावस्थायामपि वैषम्योपगमयोग्या एव गुणा व्यवस्थिता इति अन्यथाऽनुमितावपि पूर्वोक्तदोषाः प्रसज्येरन्। कुतः ? 'ज्ञशक्तिवियोगात्'—ज्ञानशक्तिवियोगात् रचनानुपपत्त्यादयो दोषाः प्रसज्यन्त इत्यर्थः। ज्ञानशक्तिमत्त्वाङ्गीकारेऽपसिद्धान्तः। चकारेण अङ्गित्वानुपपत्तिरपि सूचिता। गुणानां वैषम्याभजनात्। विनाऽपि निमित्तेन वैषम्याभजने सर्वदा वैषम्यप्रसङ्गात् ॥ ९ ॥

१०. विप्रतिषेधाच्चासमञ्जसम् २-२-१०

परस्परविरुद्धश्चायं सांख्यसिद्धान्तः। क्वचित् सप्तेन्द्रियाण्यनुक्रान्तानि, क्वचिदेकादश। क्वचिन्महतः तन्मात्रासर्गमुपदिशति, क्वचिदहंकारात्। क्वचित् त्रीण्यन्तःकरणानि, क्वचिदेकम्। प्रसिद्धश्च श्रुत्येश्वरकारणवादिन्या विरोध इति परस्परं विप्रतिषेधादपि असमञ्जसं सांख्यदर्शनमिति ॥ १० ॥

[इति रचनानुपपत्त्यधिकरणम्]

[२. महद्दीर्घाधिकरणम्]

१. महद्दीर्घवद्वा ह्रस्वपरिमण्डलाभ्याम् २-२-११

* परिणामवादनिराकरणानन्तरं वैशेषिकाद्यभिमतमारम्भवादं निराचिकीर्षुः तैर्विवर्तवादोक्तं दूषणं तदभिमतदृष्टान्तोपन्यासेन परिहरति ॥

किं ब्रह्मणो विसदृशजगदुत्पत्तौ काणादाभिमतदृष्टान्तोऽस्ति ? न वा ? इति संशये—शुक्लेभ्यस्तन्तुभ्यः शुक्लस्यैव पटस्योत्पत्तिदर्शनात् नास्तीति प्राप्ते—

राद्धान्तः—महद्दीर्घवदिति । यथा अणुत्वह्रस्वत्वगुणयुक्तात् द्व्यणुकात्, महद्दीर्घवत्—महत्वदीर्घत्वपरिमाणयुक्तं चतुरणुकं जायते इति कार्यकारणयोर्विसदृशगुणयोगित्वम् । यथा वा परमाणुद्वयारब्धद्व्यणुके कार्ये ह्रस्वत्वं गुणः, कारणे च परमाणौ पारिमाण्डल्यपरिमाणत्वं गुणः, ताभ्यां ह्रस्वपरिमण्डलाभ्यां कार्यकारणयोर्विसदृशत्वं, तद्वज्जगतोऽपि अचेतनस्य चेतनात् ब्रह्मण उत्पत्तिः संभवति । एषा हि तेषां प्रक्रिया—परमाणवः किलादृष्टादिसचिवाः कृत्स्नं जगदारभन्ते । कारणगुणाश्च कार्ये गुणमिति । द्वौ परमाणू द्व्यणुकमारभेते । चतुर्भ्यो द्व्यणुकेभ्यश्चतुरणुकमारभ्यत इति ॥ १ ॥

[इति महद्दीर्घाधिकरणम्]

---

* पूर्वं प्रपञ्चस्य प्रधाननिष्ठाशब्दत्वादिगुणानन्वयात्—प्रधानानुपादानकत्ववत्, ब्रह्मगुणचेतनत्वानन्वयात् ब्रह्मोपादानकत्वं न स्यादिति दृष्टान्तसंगत्येदमाह–स·शि·वृ.

[३. परमाणुकारणत्वाधिकरणम्]

१. उभयथाऽपि न कर्मातस्तदभावः २-२-१२

*अनेनारम्भवादो निराकरिष्यते। किं संयुक्ताः परमाणवो जगदारभन्ते? न वा? इति संशये तावत्—आरभन्त इति प्राप्तम्—प्रलीने हि पूर्वसिद्धे जगति, यदा महेश्वरस्य सिसृक्षा भवति, तदा प्राणिकर्मवशान्निखिलेषु परमाणुषु आद्यं कर्मोत्पद्यते। तस्मात् कर्मणः परमाणुः परमाण्वन्तरेण संयुज्यते। तस्माच्च संयोगात् द्व्यणुकमारभ्यते। तेभ्यस्त्रिभ्यो द्व्यणुकेभ्यस्त्र्यणुकमित्यादिक्रमेण जगदुत्पत्तौ बाधकाभावात् संयुक्ताः परमाणवो जगज्जनयन्तीत्येवं प्राप्ते—

ब्रूमः—उभयथाऽपीति। उभयथा—परमाणूनामाद्यस्य कर्मणः कारणाभ्युपगमेऽनभ्युपगमेवा न कर्म, अतः तदभावः—तस्य द्व्यणुकादिक्रमेण सर्वस्याभावः॥

अथवा—यद्यणुसमवाय्यदृष्टम्, अथ क्षेत्रज्ञसमवायि, उभयथाऽपि—तस्याचेतनस्य चेतनानधिष्ठितस्य प्रवृत्त्यनुपपत्ते कर्माभावः॥

अथवा—संयोगोत्पत्त्यर्थं विभागोत्पत्त्यर्थं, उभयथाऽपि न कर्म। अतः—सर्गहेतोः संयोगस्याभावात्, प्रलयहेतोश्च विभागस्याभावात्, तदभावः—सर्गप्रलययोरभावः इत्यर्थः॥

प्रथमव्याख्याने कारणानभ्युपगमे परमाणुकर्मणः सर्वदोत्पत्तिः, प्रलयो वा स्यात्। अभ्युपगमे वा—किं दृष्टं कारणम्? उतादृष्टम्—प्रयत्नस्या-

* प्रासङ्गिकाव्यवहितेनास्य न संगत्यपेक्षा। व्यवहितेन तु पूर्वं प्रधानस्य चेतनानधिष्ठितत्वात् कारणत्वाभावे उक्ते, तर्हि चेतनाधिष्ठिताः परमाणवः कारणं जगत इति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

भिघातस्य वा शरीरोत्पत्तेः प्रागसंभवात् । ईश्वरप्रयत्नस्य नित्यस्य कादाचित्कीमाद्यकर्मोत्पत्तिं प्रत्यनियामकत्वात् ॥

अदृष्टं कारणमपि द्वितीयव्याख्याने निराकृतम् । तस्यामवस्थायामात्मनश्चानुत्पन्नचैतन्यस्य जडत्वान्निमित्तकारणतामात्रेणेश्वराधिष्ठितत्वं चेतनादृष्टपरमाणूनां 'पत्युरसामञ्जस्यात्' (ब्र. सू. २-२-३७) इत्यत्र निराकरिष्यते ॥

तृतीयव्याख्याने तु उक्तप्रकारेणाण्वाद्यकर्माभावेन संयोगाभावः । एवं विभागनिमित्तकर्मणो निमित्ताभावात् विभागाभावः ॥ १ ॥

२. समवायाभ्युपगमाच्च साम्यादनवस्थितेः २-२-२३

समवायाभ्युपगमाच्च नाणुकारणवादः । कुतः ? 'साम्यादनवस्थितेः'—अणुभ्यामुत्पद्यमानं द्व्यणुकं कार्यं समवायलक्षणेन सम्बन्धेन ताभ्यां सम्बध्यते । समवायस्यापि कार्यकारणाभ्यां ताभ्यां भिन्नत्वसाम्यात् समवायलक्षणेनान्येन सम्बन्धेन भवितव्यम् । तस्याप्येवमित्यनवस्थादोषादित्यर्थः ॥ २ ॥

३. नित्यमेव च भावात् २-२-२४

किञ्च, अणूनां प्रवृत्तिस्वभावत्वे प्रवृत्तेर्नित्यमेव भावात् प्रलयाभावप्रसङ्गः । निवृत्तिस्वभावत्वे नित्यमेव निवृत्तेर्भावात् सर्गाभावप्रसङ्गः । उभयस्वभावत्वं च विरोधादसमञ्जसम् । निमित्तवशादनुभयस्वभावत्वं निमित्तासंभावादेव निराकृतम् ॥ ३ ॥

४. रूपादिमत्त्वाच्च विपर्ययो दर्शनात् २–२–२५

किञ्च, रूपादिमन्तः नित्याश्च परमाणवो न संभवन्ति ; यतो रूपादिमत्त्वादेव तेषामणुत्वनित्यत्वविपर्ययः । कुतः ? 'दर्शनात्'—एवं लोके दृष्टत्वादित्यर्थः । यद्धि रूपादिमद्वस्तु—तत् स्वकारणापेक्षया स्थूलमनित्यं च दृष्टम् । यथांऽशूनपेक्ष्य तन्तवः ।। ४ ।।

५. उभयथा च दोषात् २–२–२६

किं स्थूलपृथिव्यादिवत् परमाणवोऽप्युपचितगुणाः कल्प्येरन् ? न वा ? उभयथाऽपि न दोषात्तावान्मोक्षः । प्रथमे, परमाणूनां मूर्त्युपचयापचयात् अपरमाणुत्वप्रसङ्गः । द्वितीये, तेषा गुणोपचयापचयाभावात् एकैकगुणवत्त्वात् तेजसि स्पर्शस्योपलब्धिर्न स्यात् । अप्सु रूपस्पर्शयोः, पृथिव्यां रसरूपस्पर्शानां च ।।

६. अपरिग्रहाच्चात्यन्तमनपेक्षा २–२–२७

किञ्च प्रधानवादश्च कैश्चिन्मन्वादिभिः सत्कार्यवादांशे परिगृहीतः । अणुकारणतावादस्तु न केनाप्यंशेन परिगृहीतः । तस्मादपरिग्रहात् अत्यन्तमनपेक्षा । अतोऽणुकारणतावादो नादरणीय इति ।। ६ ।।

[इति परमाणुकारणत्वाधिकरणम्]

[४. समुदायाधिकरणम्]

१. समुदाय उभयहेतुकेऽपि तदप्राप्तिः २–२–२८

अर्धवैनाशिकमतनिराकरणानन्तरं सर्ववैनाशिकमतनिरासद्वारा सङ्घातवादोऽनेन दूष्यते * ।।

---

* तथाच 'अत्रान्तरसंगत्या इदमाह' इति—स शि· वृ.

बाह्यास्तित्ववादिनो बौद्धा मन्यन्ते—द्वौ समुदायौ—बाह्यः, आभ्यन्तरश्चेति । तत्र बाह्यः भूसमुद्रादिः । आन्तरश्चित्तचैत्त्यात्मकः । गन्धस्निग्धोष्णचलनस्वभावाः पृथिव्यप्तेजोवायुपरमाणवः बाह्यसमुदायस्य कारणम् । रूपवेदनाविज्ञानसंज्ञासंस्काराख्याः पञ्च स्कन्धाः आन्तरसमुदायोत्पादकाः । चित्तेन निरूप्यमाणाः रूपस्कन्धाः शब्दस्पर्शादयः । तदभिव्यक्तिः विज्ञानस्कन्धः । तज्जन्यं दुःखं वेदनास्कन्धः । देवदत्तादिनामधेय संज्ञास्कन्धः । एतेषां वासनाः संस्कारस्कन्धः । तेभ्यः स्कन्देभ्यः पुञ्जीभूतेभ्यः आभ्यन्तरः समुदायो जायते । इति प्राप्ते—

प्रत्याह—समुदाय इति । उभयहेतुकेऽपि समुदाये—परमाणुहेतुकेऽपि समुदाये, रूपादिस्कन्धहेतुकेऽप्यान्तरसमुदाये संघातयितुश्चेतनस्याभवात् , तदप्राप्तिः—तस्य संघातस्य अप्राप्तिः—प्राप्त्यभावः । तेषां स्थायी कश्चिच्चेतनः संघातोपपत्तिकर्ताऽस्ति । क्षणिकस्तु स्वयंलब्धात्मकः संघातापत्तिं करोतीति वक्तुं न शक्यम् ; क्षणिकत्वहानिप्रसङ्गात् । अणूनां स्कन्धानाञ्चाचेतनत्वात् ॥

क्षणिकत्वाच्च न संघातापत्तिहेतुत्वम् । समुदायानुपपत्तौ च तदाश्रया लोकयात्रा न सिध्यति ॥ २ ॥

२. इतरेतरप्रत्ययत्वादिति चेन्नोत्पत्तिमात्रनिमित्तत्वात् २-२-२९

यद्यपि कश्चिच्चेतनः स्थिरः संहन्ता नास्ति ; तथापि यथा जीवानामसत्यन्यस्मिन्नधिष्ठातरि कार्यकारणभावो दृश्यते, एवमविद्यासंस्कारनामरूपादीनां 'इतरेतरप्रत्ययत्वात्'—इतरेतरकारणत्वात् उपपन्ना लोकयात्रेति चेत्—न—कस्मात् ? 'उत्पत्तिमात्रनिमित्तत्वात्'—अविद्यादीनां पूर्वं उत्तरस्योत्तरस्य उत्पत्तिमात्रनिमित्तं भवेत् , न तु संघातोत्पत्तेर्निमित्तं किञ्चिदस्तीत्यर्थः । नानाहेतुसमवधानजन्मा पञ्चस्कन्धसमुदायो विना चेतनेन

स्थिरेण नानाकारणसमवधात्रा नोत्पत्तिमर्हति । यथा घटादिकार्यस्य नानाकारणसमवधाननिमित्तभूतेन कुलालादिचेतनेन विनाऽनुत्पादः ।।

बीजाङ्कुरोत्पत्तेरपि प्रत्ययोपनिबद्धायाः अप्यसिद्धत्वेन पक्षनिक्षिप्तत्वात् । पक्षेण च व्यभिचारोद्भावनायामतिप्रसङ्गात् ।। २ ।।

एवमविद्यादीनां निमित्तनैमित्तिकभावमङ्गीकृत्य दूषणमुक्तम् । इदानीं निमित्तनैमित्तिकभाव एव न घटत इत्याह—

३. उत्तरोत्पादे च पूर्वनिरोधात् २-२-२०

उत्तरस्मिन् क्षणे उत्पद्यमाने पूर्वक्षणो नश्यतीति क्षणभङ्गवादे न पूर्वोत्तरक्षणयोः हेतुफलभावः शक्यते वक्तुम् । निरुद्ध्यमानस्य निरुद्धस्य वा पूर्वक्षणस्य वाऽभावग्रस्तत्वात् उत्तरक्षणहेतुत्वानुपपत्तेः ।। ३ ।।

४. असति प्रतिज्ञोपरोधो यौगपद्यमन्यथा २-२-२१

अथासत्येव हेतौ फलोत्पत्तिं ब्रूयात्, तर्हि प्रतिज्ञोपरोधः स्यात् चतुर्विधान् हेतून् प्रतीत्य चित्तचैत्ता उत्पद्यन्त इतीयं प्रतिज्ञा पीड्येत । अथोत्तरक्षणोत्पत्तिर्यावत्, तावदवतिष्ठते पूर्वक्षण इति ब्रूयात्, ततो यौगपद्यं हेतुफलयोः स्यात्, सर्वे संस्काराः क्षणिका इति प्रतिज्ञाऽपि पीड्येत ।।४।।

५. प्रतिसंख्याऽप्रतिसंख्यानिरोधाप्राप्तिरविच्छेदात् २-२-२२

बौद्धमते—बुद्धिपूर्वकः किल भावानां नाशः प्रतिसंख्यानिरोधः । तद्विपरीतः अप्रतिसंख्यानिरोधः । तयोः 'अप्राप्तिः'—असंभवः । कुतः ? 'अविच्छेदात्'— सन्तानगोचरो वा निरोधः ? सन्तानिगोचरो वा ? न तावत् सन्तानगोचरः संभवति, सन्तानिनामविच्छिन्नेन हेतुफल-

भावेन सन्तानविच्छेदस्यासंभवात् । नापि सन्तानिगोचरः, सर्वास्वप्यवस्थासु प्रत्यभिज्ञानबलेन अन्वयाविच्छेददर्शनात् ॥ ५ ॥

६. उभयथा च दोषात् २-२-२३

प्रतिसंख्यानिरोधान्तःपात्यविद्यानिरोधः किं सम्यग्ज्ञानाद्वा ? स्वयमेव वा ? पूर्वस्मिन् कल्पे निर्हेतुकविनाशाभ्युपगमहानिः । द्वितीये मार्गोपदेशानर्थक्यम्, इत्युभयथा च दोषात् असमञ्जसमिदं दर्शनम् ॥ ६ ॥

७. आकाशे चाविशेषात् २-२-२४

यथा प्रतिसंख्याप्रतिसंख्ययोः बौद्धेन निरूपाख्यत्वं वक्तुं न शक्यम्, तथा आकाशस्यापि निरुपाख्यत्वं न वक्तुं शक्यम्, आकाशेऽपि वस्तुत्वप्रतिपत्तेरविशेषात् 'आत्मन आकाशः संभूतः' (तै. आ. १) इत्यादिश्रुतिभ्यः । विप्रतिपन्नान् प्रति तु शब्दगुणानुमेयत्वम् ॥ ७ ॥

८. अनुस्मृतेश्च २-२-२५

अपि च सर्वं क्षणिकमिति वदन् बौद्धः आत्मनोऽपि क्षणिकत्वमभ्युपेयात्; न तद्युक्तम् । कुतः ? 'अनुस्मृतेः'—अनुभवं उपलब्धिं अनूत्पद्यमानं स्मरणं—अनुस्मृतिः । सा चोपलब्ध्यैककर्तृका सती संभवति, पुरुषान्तरोपलब्धे विषये पुरुषान्तरोपलब्धेरदर्शनात् ॥ ८ ॥

विनष्टाद्धि बीजादङ्कुरोत्पत्तिदर्शनात् असतो भावोत्पत्तिं बौद्धा मन्यन्ते । तदनुपपन्नमित्याह—

९. नासतोऽदृष्टत्वात् २-२-२६

नाभावात् भाव उत्पद्यते; अभावाविशेषात् कारणविशेषाभ्युपगमानर्थक्यप्रसङ्गात् । बीजादीनामुन्मृदितानां यो भावः, तस्य शशविषा-

णादीनां निस्वभावत्वाविशेषात् शशविषाणादिभ्योऽप्यङ्कुरा जायेरन्; न चैवं दृश्यते ॥ ९ ॥

१०. उदासीनानामपि चैवं सिद्धिः २-२-२७

यदि चाभावात् भावोत्पत्तिरभ्युपेयेत, 'उदासीनानां'—अनीहमानानामपीष्टसिद्धिः स्यात् ॥ १० ॥

[इति समुदायाधिकरणम्]

[१. अभावाधिकरणम्]

१. नाभाव उपलब्धेः २-२-२८

* बाह्यार्थास्तित्ववादिबौद्धमतं निराकृत्य विज्ञानवादिमतमिदानीं निराक्रियते ॥

क्षणिकविज्ञानस्कन्धमात्रत्वं युज्यते? न वा? इति संशये युज्यत एवेति तावत् प्राप्तम्। न च व्यवहारानुपपत्तिः, स्वप्ने बाह्यार्थाननपेक्ष्य केवलया बुद्ध्या व्यवहारदर्शनात्। तथैव जाग्रद्व्यवहारस्याप्युपपत्तेः। तस्मात् विज्ञानस्कन्धमात्रं युज्यत इति प्राप्ते—

ब्रूमः—न हि बाह्यस्यार्थस्याभावोऽध्यवसातुं शक्यते। कुतः? 'उपलब्धेः'—उपलभ्यन्ते हि पटादयो बहिष्ठत्वेन ॥

---

* पूर्वं क्षणिकबाह्यार्थवादिमतनिराकरणमकारि। तदुपजीव्य क्षणिकविज्ञानमात्रवादी प्रत्यवतिष्ठत—इत्युपजीव्योपजीवकभावसंगत्येदमाह—स·शि·वृ·

अथोच्येत बुद्धिरेव बाह्यघटादिवदवभासते । तथाऽऽहुः—'यदन्तर्ज्ञेयतत्त्वं तद्बहिर्वदवभासते' (प्र. स.) इति—एवं तर्हि त्वदुक्तिरेव बाह्यार्थसद्भावे प्रमाणमिति ब्रूमः । क्वचिदपि बाह्यार्थाभावे तद्व्युत्पत्तिराहित्यात् 'बहिर्वत्' इत्युपमानोक्तिर्न सङ्गच्छेत ।। १ ।।

२. वैधर्म्याच्च न स्वप्नादिवत् ३-२-२९

किञ्च न स्वप्नादिप्रत्ययवत् जाग्रत्प्रत्यया भवितुमर्हन्ति । कस्मात्? 'वैधर्म्यात्'—वैधर्म्यं हि भवति स्वप्नजागरितयोः । किं पुनर्वैधर्म्यम्? बाधाबाधाविति ब्रूमः । प्रबोधदशायां स्वप्नदृष्टस्य बाध्यमानत्वात्, जाग्रद्व्यवहारस्य च कदाऽपि बाधादर्शनात् ।। २ ।।

३. न भावोऽनुपलब्धेः २-२-३०

न च स्वप्नादिष्वन्तरेणार्थं ज्ञानवैचित्र्यदर्शनात् तद्वासनावशाज्जाग्रत्यपि ज्ञानवैचित्र्यं नार्थजन्यम्, किन्तु वासनामात्रमिति वाच्यम्; यतो न भावो वासनानामुपपद्यते, त्वत्पक्षेऽनुपलब्धेः । बाह्यार्थानामनुपलभ्यमानत्वेन प्रत्यर्थमुपलब्धिनिमित्तवासनानामसंभवात् ।। ३ ।।

ननु तर्ह्यालयविज्ञानं वासनाश्रयं भवत्विति—नेत्याह—

४. क्षणिकत्वाच्च २-२-३१

न चालयविज्ञानं वासनाश्रयं भवितुमर्हति । कुतः? 'क्षणिकत्वात्'—न हि कालत्रयसम्बन्धिन्येकस्मिन् अन्वयिन्यसति कूटस्थे वा सर्वार्थदर्शिनि देशकालनिमित्तापेक्षवासनाधीनस्मृतिप्रतिसन्धानादिव्यवहारः संभवति ।। ४ ।।

५. सर्वथाऽनुपपत्तेश्च २–२–३२

यथा यथा सौगतसमयो विचार्यते, तथा तथा सैकतकूपवत् विदीर्यते । अतः 'सर्वथा'— ग्रन्थतोऽर्थतश्चायं वैनाशिकसमयः अनुपपत्तेः श्रेयोऽर्थिभिर्नाङ्गीकर्तव्यः । 'तिष्ठन्नापश्यन्' इत्याद्यपशब्दप्रयोगाच्छब्दतोऽनुपपत्तिः । नैरात्म्यमभ्युपेत्य आलयविज्ञानं समस्तवासनाधारमभ्युपगच्छन् अक्षरमात्मानमभ्युपेयादित्यर्थतोऽनुपपत्तिः ।। ५ ।।

[इत्यभावाधिकरणम्]

——o——

[६. एकस्मिन्नसंभवाधिकरणम्]

मुक्तकच्छानां मतं निराकृत्य विवसनसमय इदानीं निराक्रियते* ।।

किं जैनमते सप्तपदार्थी सप्तभङ्ग्याख्यन्यायात् सिद्ध्यति? न वा? इति संशये—सिध्यतीति तावत्प्राप्तम् । तथाहि—जीवाजीवास्रवसंवर-निर्जरबन्धमोक्षा नाम सप्तपदार्था जैनमते संमताः । तत्र बोधात्मको जीवः । जडवर्गस्त्वजीवः । आस्रवः इन्द्रियसङ्घातः, आस्रवत्यनेन जीवो विषयेष्विति । अविवेकः संवरः, संवृणोति विवेकमिति । केशो-ल्लुञ्छनतप्तशिलाधिरोहणादिकं तपः निर्जरः, निश्शेषेण जीर्यतेऽनेन काम-क्रोधादिरिति । कर्माष्टकेनापादितजरामरणपरंपरासम्बन्धः बन्धः । ज्ञाना-वरणीयं, दर्शनावरणीयम्, मोहनीयं, आन्तरायिकमिति चत्वार्यघातिकर्माणि । वेदनीयं, नामिकं, गोत्रिकं, आयुष्कं चेति जैनैरष्टकर्माण्युक्तानि । तेभ्योऽष्टभ्यः कर्मभ्यो निर्गतस्य जीवस्य सततोर्ध्वगमनं मोक्षः ।।

---

* तथा च 'बुद्धिसन्निधिलक्षण(प्रसङ्ग)संगत्येदमाह'—स.शि.वृ.

एतान् सप्तपदार्थान् सप्तभङ्ग्यभिधो न्यायो व्यवस्थापयति । स्यादस्ति, स्यान्नास्ति, स्यादस्ति च नास्ति च, स्यादवक्तव्यः, स्यादस्ति चावक्तव्यः, स्यान्नास्ति चावक्तव्यः, स्यादस्तिनास्ति चावक्तव्यः—इति सप्तभङ्ग्याख्यो न्यायः । स्याच्छब्द ईषदर्थवाची निपातः । तत्र सद्वादिनः, असद्वादिनः, सदसद्वादिनः, अनिर्वचनीयवादिनश्चेति चत्वारो हि प्रतिवादिनः । एवमनिर्वचनीयमतेन मिश्रितानि सदादिमतानीति सप्त प्रतिवादिनो भवन्ति । जैनैस्तु तान् प्रति सप्तविधाः प्रयोक्तव्याः । यदि सद्वादिना 'कथमेतन्मते मोक्षोऽस्ति ?' इति नियुक्तो जैनो ब्रूयात्—ईषदस्तीति । असद्वादिनं प्रति *[ईषन्न स्यादिति ब्रूयात् । सदसद्वादिनं प्रति स्यादस्ति च नास्ति चेति ब्रूयात् । केवलानिर्वचनीयवादिनं प्रति स्यादवक्तव्य इति ब्रूयात् । एवं मिश्रानिर्वचनीयवादिनः प्रति स्यादस्ति चावक्तव्यः इत्यादि ब्रूयात् । वस्तुनः सर्वात्मकत्वात् सर्वमेकस्मिन्नपि संघटते, विरोधाभावात् । अतः अनेकान्तवाद एव साधीय इति प्राप्ते—

१. नैकस्मिन्नसंभवात् २-२-३४

एकस्मिन् वस्तुनि परस्परविरुद्धानां अस्तित्वनास्तित्वादीनां असंभवात् अनेकान्तवादो न युक्त इत्यर्थः । सर्वस्य सर्वात्मकत्वे हि विधिनिषेधादयः, साधननिराकरणादयो वा उन्मत्तप्रलापायेरन् । अत एव सप्तभङ्गीनयोऽपि निरस्तः । अत एव च तत्र प्रतिष्ठितं जैनमतमपि निरस्तम्] ॥ १ ॥

---

* कुण्डलितो भागः मातृकायां गलितः ग्रन्थसंपादकेन पूरितः ।

†[दिगम्बराणां देहपरिमाण एवात्मेति यन्मतं, तद्दूषयति—

२. एवञ्चात्माऽकात्स्न्यम् २–२–३५

यथा एकत्र विरुद्धधर्मासंभवो दोषः स्याद्वादे प्रसक्तः, एवं आत्मनो जीवस्य अकात्स्न्यं—परिच्छिन्नत्वं अपरो दोषः स्यादित्यर्थः। तथा च परिच्छिन्नत्वादात्मनः घटादिवदनित्यत्वं स्यात्। देहपरिणामत्वे मनुष्यात्मनः कर्मवशात् गजशरीरे कृत्स्ने कृत्स्नस्यात्मनः पुत्तिकाशरीरे वा प्रवेशो न स्यादिति भावः॥ २॥

ननु आत्मनः सावयवत्वाङ्गीकारात् क्रमेण प्रवेशोऽस्त्वित्याशङ्क्याह—

३. न च पर्यायादप्यविरोधो विकारादिभ्यः २–२–३५

पर्यायेणापि अवयवगमनागमनाभ्यां तत्तत्स्थूलसूक्ष्मशरीरपरिमाणत्वस्य आत्मन्यविरोध इति न च। कुतः? विकारादिभ्यः—आत्मनः सावयवत्वेन तत्तच्छरीरप्राप्त्या वृद्धिह्रासत्वाङ्गीकारे विकारित्वप्रसक्त्या अनित्यत्वे बन्धमोक्षाभ्युपगमो बाध्येतेत्यर्थः॥ ३॥

किञ्च—

४. अन्त्यावस्थितेश्चोभयनित्यत्वादविशेषः २–४–२६

अन्त्यस्य मोक्षावस्थाभाविनः जीवपरिमाणस्य नित्यत्वेनावस्थितेः तत्पूर्वयोरुभयोरपि आद्यमध्यमपरिमाणयोः नित्यत्वप्रसङ्गात् त्रयाणामाद्य-

---

† एतदाभ्य 141 पुटे कुण्डलितभागपर्यन्तं मातृकायां गलितत्वात्—सदाशिवब्रह्मेन्द्रवृत्तिः संयोजिता।

मध्यमान्त्यपरिमाणानां अविशेषः—साम्यं स्यात् । अतः सौगतमतवत् आर्हतमतमपि अप्रामाणिकमिति सिद्धम् ॥ ४ ॥

[इति एकस्मिन्नसंभवाधिकरणम्]

[७. पत्यधिकरणम्]

पूर्वं सत्त्वासत्त्वयोरेकत्र विरोधात् असंभव इत्युक्तम् । तर्हि तद्वदुपादानकर्तृत्वयोः एकत्र विरोधादसंभव इति दृष्टान्तसङ्गत्येदमाह—

१. पत्युरसामञ्जस्यात् २–२–३७

फलं पूर्ववत् । केवलमधिष्ठाता ईश्वरः जगतो नोपादानमिति माहेश्वरराद्धान्तोऽत्र विषयः । स किं प्रमाणमूलः ? भ्रान्तिमूलो वा ? इति सन्देहे—प्रमाणमूल इति पूर्वः पक्षः ।

सिद्धान्तस्तु—पत्युः—ईश्वरस्य जगदुपादानप्रधानादिप्रेरकत्वेन जगन्निमित्तमात्रत्वं न संभवति । कुतः ? ‘ असामञ्जस्यात् ’—ईश्वरस्य जगत्सर्जने प्रवृत्तौ रागादिदोषप्रसङ्गात् असामञ्जस्यं स्यात् । प्रवृत्तेः रागादिपूर्वकत्वेन लोके दृष्टत्वात् ; दृष्टानुसारित्वाच्च कल्पनायाः । अस्माकं तु श्रुत्यनुसारित्वात् , अनिर्वचनीयवादित्वाच्च न दोष इति भावः ॥ १ ॥

अपि च—

२. सम्बन्धानुपपत्तेश्च २–२–३८

प्रेर्यप्रधानादिभिः प्रेरकस्येश्वरस्य सम्बन्धो वाच्यः । असम्बद्धस्य प्रेरकत्वायोगात् । न च सम्बन्धः सम्भवति, निरवयवत्वात् , युतसिद्ध-

त्वाच्च संयोगसमवाययोरनुपपत्तेरित्यर्थः। सिद्धान्ते तु अविद्याप्रेरकत्वं कल्पिततादात्म्येनोपपद्यत इति भावः ॥ २ ॥

किञ्च —

३. अधिष्ठानानुपपत्तेश्च २-२-३९

लोके कुलालस्य मृदादिप्रेरकत्वं दृष्टम्। न हीश्वरस्य प्रधानादिप्रेरकत्वं संभवति, प्रधानस्य रूपादिहीनत्वेन तद्विषयकाधिष्ठानस्य प्रेरणाया अनुपपत्तेरित्यर्थः। सिद्धान्ते तु न दृष्टापेक्षा, श्रुत्येकशरणत्वादिति भावः ॥ ३ ॥

एतत् विधान्तरेणाक्षिप्य परिहरति—

४. करणवच्चेन्न भोगादिभ्यः २-२-४०

करणानीन्द्रियाणि अप्रत्यक्षान्यपि यथा जीवेन प्रेर्यन्ते, एवं प्रधानमप्रत्यक्षमपि ईश्वरेण प्रेर्यत इति चेत्— न— कुतः ? भोगादिभ्यो दोषेभ्यः ; जीवस्य भोगार्थमिन्द्रियप्रेरकत्ववत् ईश्वरस्य प्रेरकत्वे तद्भोगादयः प्रसज्येरन्नित्यर्थः ॥ ४ ॥

किञ्च—

५. अन्तवत्त्वमसर्वज्ञता वा २-२-४१

प्रधानजीवेश्वराणां या संख्या, यच्च परिमाणम्, तदुभयमपि ईश्वरेण परिच्छिद्यते न वा—इति सन्देहे—आद्ये परिच्छिन्नसंख्यापरिमाणत्वात् त्रयाणां घटवत् अन्तवत्त्वं—विनाशित्वं स्यात्। द्वितीये ईश्वर-

स्यात्सर्वज्ञत्वं स्यात् । अतो माहेश्वरराद्धान्तो भ्रान्तिमूल एवेति सिद्धम् ।। ५ ।।

[इति पत्यधिकरणम्]

[८. उत्पत्त्यसंभवाधिकरणम्]

एवं केवलाधिष्ठातैवेश्वर इति वेदासङ्गतमते निरस्ते निमित्तं प्रकृतिश्चेश्वर इति भागवतमतस्य वेदसङ्गतत्वात् जीवोत्पत्त्यंशेऽपि प्रमाणमूलत्वं स्यात्—इति प्रत्युदाहरणसंगत्येदमाह—

१. उत्पत्त्यसंभवात् २-२-४२

फलं पूर्ववत् । वासुदेवः खलु परमात्मा जगदुपादानं निमित्तं च । तस्मात् संकर्षणाख्यो जीव उदेति । तस्मात् प्रद्युम्नाख्यं मनो जायते । तस्मादनिरुद्धाख्योऽहंकारो जायत इति भागवतराद्धान्तोऽत्र विषयः । स किं प्रमाणमूलः ? भ्रान्तिमूलो वा ? इति सन्देहे—प्रमाणमूल इति पूर्वः पक्षः—

सिद्धान्तस्तु—भवतु वेदाविरुद्धांशे प्रमाणमूलत्वम् , न तत् वेदविरुद्धजीवोत्पत्त्यंशे । कुतः ? वासुदेवात् जीवस्योत्पत्तेरसंभात् । यद्युत्पत्तिरङ्गीक्रियते, तर्हि घटवदनित्यत्वापत्त्या भगवत्प्राप्तिरूपमोक्षः त्वदुभ्युपगतः कस्य स्यात् ? अतो भ्रान्तिमूलो भागवतसिद्धान्तः ।। १ ।।

इत्थं जीवजन्म निरस्य ततो मनोजन्म निरस्यति—

२. न च कर्तुः करणम् २-२-४३

कर्तुः देवदत्तादेः सकाशात् करणस्य कुठारादेः उत्पत्त्यदर्शनात् जीवात् कर्तुः करणं मनो जन्यत इत्येतदप्यसङ्गतमित्यर्थः ।। २ ।।

ननु वासुदेवात् न संकर्षणस्य जन्म, नापि संकर्षणात् प्रद्युम्नस्येत्यत्रेष्टापत्तिमाशङ्क्याह—

३. विज्ञानादिभावे वा तदप्रतिषेधः २-२-४४

संकर्षणादीनां त्रयाणां वासुदेववत् विज्ञानादिभावे वा—विज्ञानैश्वर्यबलवत् निर्दोषनिरवद्यस्वरूपत्वेऽपि तदप्रतिषेधः—तस्योत्पत्त्यसंभवरूपदोषस्य प्रकारान्तरेण प्रतिषेध इत्यर्थः। किं वासुदेवादयश्चत्वारोऽपीश्वराः? उत संकर्षणादयस्त्रयः वासुदेवतुल्याः? आद्ये—भगवानेक एव वासुदेव इति स्वसिद्धान्तहानिः। द्वितीये उत्पत्त्यसंभवदोषः तदवस्थ एवेति भावः ।। ३ ।।

अपि च—

४. विप्रतिषेधाच्च २-२-४५

क्वचित् ज्ञानैश्वर्यशक्तिबलवीर्यतेजांसि वासुदेवस्य गुणा इति, क्वचिच्च उक्तगुणा एव वासुदेव इति गुणगुणिनोः भेदमभेदं च वर्णयन्ति। तथा च परस्परं विप्रतिषेधात् अप्रामाणिकमिदं भागवतमतमित्यर्थः। तस्मादेवं सांख्यवैशेषिकसौगतार्हतमाहेश्वरभागवतमतानां भ्रान्तिमूलत्वेन

तैर्मतैः निरवद्यादद्वैतात् ब्राह्मणो जगत्सर्गं ब्रुवन् समन्वयो न विरुध्यत इति सिद्धम् ।। ४ ।।

[इति उत्पत्त्यसंभवाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्र ह्म सू त्र वृ त्तौ

द्वितीयाध्यायस्य

द्वितीयःपादः

———

द्वितीयाध्यायस्य

तृतीयः पादः

[१. वियदधिकरणम्]

पूर्वस्मिन् पादे श्रुतिविरुद्धत्वात् परपक्षाणामनपेक्षत्वं अभाणि। तर्हि श्रुतीनामप्यन्योन्यविरुद्धत्वात् ब्रह्मकारणवादस्याप्यनपेक्षत्वं स्यादिति शङ्कानिरासार्थं परं पादद्वयमारभ्यते। एवञ्च पूर्वपादेनास्य पादद्वयस्य दृष्टान्तसङ्गतिः शङ्काव्याजेन दर्शिता। पादान्तरत्वात् पूर्वाधिकरणेनास्याधिकरणस्य न संगत्यपेक्षा ॥

१. न वियदश्रुतेः २-३-१

अत्र पूर्वपक्षे श्रुतीनां मिथो विरोधादप्रामाण्यम्। सिद्धान्ते विरोधाभावात् प्रामाण्यमिति फलभेदः। एवं सर्वेषु चाधिकरणेषु पादद्वयगतेषु पूर्वोत्तरपक्षयोः फलं द्रष्टव्यम् ॥

अत्रादौ सृष्टिवाक्यानामविरोधं प्रतिपादयितुं आकाशमाश्रित्य विचार्यते। किमाकाशस्योत्पत्तिरस्ति? उत न?—इति संदेहे—यद्यस्ति तर्हि छान्दोग्ये आकाशवायू विना 'तत्तेजोऽसृजत' (छा. ६-२-३) इति तेजआदिका सृष्टिः श्रूयते। तैत्तरीयके तु 'आत्मन आकाशः संभूतः' (तै. आ. १) इति आकाशादिका। तथा चानयोर्वाक्ययोर्विरोध इति पूर्वपक्षः ॥

सिद्धान्तस्तु—एकदेशिमतेन—न वियत्-आकाशः उत्पद्यते। कस्मात्? 'अश्रुतेः'—आकाशस्योत्पत्तिप्रतिपादकवाक्यस्याश्रवणात्।

यद्यपि 'आत्मन आकाशः संभूतः'—(तै. आ. १) इति श्रुतिरस्ति, तथापि सा गौणीति गूढाभिसन्धिः ॥ १ ॥

ततश्च आकाशस्योत्पत्तेरनभ्युपगमादेव न विरोध इति ग्रन्थाभिसन्धिमजानानः शङ्कते—

२. अस्ति तु २-३-२

'तु' शब्दः पक्षान्तरपरिग्रहे । छान्दोग्ये आकाशस्योत्पत्त्यभावेऽपि सा श्रुतिः तैत्तिरीयकेऽस्तीत्यर्थः । तथा च विरोधस्तदवस्थ एवेति शङ्कितुराशयः ॥ २ ॥

एकदेशी स्वाभिप्रायं प्रकटयति—

३. गौण्यसंभवात् २-३-३

न ह्याकाशस्योत्पत्तिश्रुतिर्मुख्या, किन्तु गौणी । कुतः ? 'असंभवात्' आकाशोत्पत्तौ समवायिकारणादिसामग्र्यभावात्, विभुत्वेन नित्यत्वानुमानाच्च आकाशोत्पत्तेरसंभवादित्यर्थः ॥ ३ ॥

किञ्च—

४. शब्दाच्च २-३-४

'वायुश्चान्तरिक्षं चैतदमृतम्' (बृ. २-३-३) इत्याकाशे अमृतशब्ददर्शनात् नाकाशस्योत्पत्तिरित्यर्थः ॥ ४ ॥

ननु एकस्मिन् वाक्ये एकस्य संभूतशब्दस्य गौणत्वं मुख्यत्वं च विरुध्यत इत्यत आह—

५. स्याच्चैकस्य ब्रह्मशब्दवत् २–३–५

यथा एकस्मिन्नेव प्रकरणे विषयभेदात् ‘अन्नं ब्रह्म’ (तै. भृ-२) इत्यत्र ब्रह्मशब्दो गौणः, ‘आनन्दो ब्रह्म’ (तै. भृ. ६) इत्यत्र मुख्यः, तथा प्रकृतेऽपि विषयभेदादेकस्य गौणत्वं मुख्यत्वं च स्यादित्यर्थः ।। ५ ।।

इदमेकदेशिमतं दूषयन् सिद्धान्तयति—

६. प्रतिज्ञाऽहानिरव्यतिरेकाच्छब्देभ्यः २–३–६

औपनिषदाद्ब्रह्मणः सर्वस्य वस्तुजातस्य अव्यतिरेकात्—एक-विज्ञानेन सर्वविज्ञानप्रतिज्ञाया अहानिर्भवति । यद्याकाशस्योत्पत्तिर्न स्यात्, तर्हि सा प्रतिज्ञा हीयेत । अतस्तत्सिद्धये आकाशस्योत्पत्तिरङ्गीकर्तव्या ।।

किञ्च—शब्देभ्यः—‘सदेव सौम्येदमग्र आसीत्’ (छा. ६-२-१) ‘ऐतदात्म्यमिदं सर्वं’ (छा. ६-८-७) इत्यादिशब्देभ्यः कार्यकारणा-भेदपरेभ्यः प्रतिज्ञासिद्धिरवगम्यते । न चैवमप्याकाशस्योत्पत्तौ पूर्वोक्त-विरोधस्तदवस्थ एवेति वाच्यम्; छान्दोग्यश्रुतिः तैत्तिरीयश्रुत्यनुसारेण ‘आकाशं वायुं च सृष्ट्वा तत् तेजोऽसृजत’ इति विपरिणम्यत इति. नानयो-र्विरोधः । यत्तु सामग्र्यभावादिति—तन्न—श्रौतस्य ब्रह्मण एव वियत्सामग्रीत्वात् ।। ६ ।।

यच्च नित्यत्वानुमानान्नेति, तच्चानुमानेनैव दूषयति—

७. यावद्विकारं तु विभागो लोकवत् २–३–७

‘तु’ शब्द आकाशोत्पत्त्यसंभवशङ्काव्यावृत्त्यर्थः । यतः यावद्वि-कारजातं विभागो दृश्यते, न त्वविकारे ब्रह्मणि; लोके घटादेर्विकारस्यैव

विभक्तत्वदर्शनात् । यथा चायं प्रयोगः—आकाशादिः पराधीनसत्ताकः, स्वसमानसत्ताकविभागवत्त्वात् , घटादिवत्— इति । तथा च परोक्ताविभक्तत्वहेतोरसिद्धिर्द्रष्टव्या । अमृतशब्दप्रयोगस्तु आपेक्षिकः । अत आकाशस्य ब्रह्मकार्यत्वं सिद्धम् ।। ७ ।।

[इति वियदधिकरणम्]

———

[२. मातरिश्वाधिकरणम्]

उक्तन्यायमन्यत्राप्यतिदिशति—

१. एतेन मातरिश्वा व्याख्यातः २-३-८

अतिदेशत्वान्न पृथक्संगत्यपेक्षा ? अत्र वायोरुत्पत्तिरस्ति ? न वा ? इति सन्देहे—छान्दोग्ये वायोरुत्पत्तिः न श्रूयते, तैत्तिरीयके च श्रूयते । तथा च पूर्ववदनयोर्वाक्ययोर्विरोधप्राप्तौ तत्परिहाराय उत्पत्तिर्गौणी वाच्या । 'सैषाऽनस्तमिता देवता यद्वायुः' (बृ. १-५-२२) इति लयप्रतिषेधाच्च न वायोरुत्पत्तिरिति पूर्वः पक्षः—

सिद्धान्तस्तु—एतेन—आकाशस्योत्पत्तिमत्त्वव्याख्यानेन वायुरपि आकाशावच्छिन्नब्रह्मजन्यत्वेन—व्याख्यातः । लयप्रतिषेधस्त्वापेक्षिकः ; अन्यथा प्रतिज्ञाहान्यादेः समानत्वादिति भावः ।। १ ।।

[इति मातरिश्वाधिकरणम्]

———

[३. असंभवाधिकरणम्]

पूर्वमसंभावितोत्पत्तिकयोरपि वियत्पवनयोरुत्पत्तिरस्तीति श्रुतिबलादुक्तम्। तद्वत् ब्रह्मान्तरात् ब्रह्मोत्पत्तिः श्रुतिबलादस्त्विति दृष्टान्तसंगत्येदमाह—

१. असंभवस्तु सतोऽनुपपत्तेः २-३-९

अत्र 'न चास्य कश्चिज्जनिता न चाधिपः' (श्वे. ६-९) इत्यादिना ब्रह्मणो नित्यत्वप्रतिपादकश्रुतीनां 'त्वं जातो भवसि विश्वतोमुखः' (श्वे. ४-३) इति श्रुत्या विरोधोऽस्ति? न वा? इति संदेहे—विरोध इति पूर्वः पक्षः—

सिद्धान्तस्तु—सतः—सदात्मकस्य ब्रह्मणः उत्पत्त्यसंभवः। कुतः? अनुपपत्तेः—विशेषस्यैव हि घटादेः मृत्सामान्यजन्यत्वदर्शनात्। जन्मश्रुतिश्च औपाधिकविषया। अतो नित्यं ब्रह्मेत्यविरोधः] ॥ १ ॥

[इति असंभवाधिकरणम्]

[४. तेजोऽधिकरणम्]

१. तेजोऽतस्तथा ह्याह २-३-१०

* 'वायोरग्निः' (तै. आ. १) इति तेजसो वायुजन्यत्वप्रतिपादकश्रुतेः, 'तत्तेजोऽसृजत' (छा. ६-२-३) इति तेजसो ब्रह्मजन्यत्वप्रति-

---

* पूर्वत्र सामान्यात् सामान्योत्पत्तिर्मा भूत्। इह सामान्यात् ब्रह्मणः विशेषस्य तेजस उत्पत्तिरस्त्विति प्रत्युदाहरणसंगत्येदमाह—स.शि.वृ.

पादकश्रुत्या विरोधोऽस्ति ? न वा ? इति सन्देहे—साक्षात् सत एव तेजसो जन्मश्रवणात् । सर्वस्यापि सन्मूलत्वे प्रतिज्ञाऽपि सिध्यतीति । अतः श्रुत्योर्विरोधः प्राप्तः ॥

तत्राह—तेजोऽत इति । तेजः अतः—मातरिश्वनो जायते । कुतः ? ' ' तथा ह्याह '—' वायोरग्निः ' इति । अव्यवहिते हि तेजसो ब्रह्मजत्वे ' वायोरग्निः ' इति बाधिता स्यात् । न च वायोरनन्तरं तेजसः सतः संभव इति कर्मार्थत्वं पञ्चम्याः । ' आत्मन आकाशः ' (तै. आ. १) इत्यपादानत्वस्य सिद्धत्वात् । ऊर्ध्वपदाध्याहारेण क्रमकल्पनाद्वरं वलृप्त-कारकार्थोपादानत्वं न्याय्यम् । तत् उभयोः श्रुत्योः एकवाक्यत्वाद्वायुरूपा-पन्नाद्ब्रह्मणस्तेजो जायते, परंपरयाऽपि ब्रह्मकार्यत्वात् प्रतिज्ञाऽपि सिध्यति । तस्मादनयोः श्रुत्योरविरोधः ॥ २ ॥

[इति तेजोऽधिकरणम्]

——o——

[५. अबधिकरणम्]

२. आपः २-३-११

* ' तदपोऽसृजत ' (छा. ६-२-३) इति छन्दोगश्रुतेः, ' अग्नेरापः ' (तै. आ १) इति तैत्तरीयश्रुतेश्चात्र विरोधाभावेऽपि. किं तेजस अपां जन्म ? उत ब्रह्मणः ? इति संशये—जलवह्न्योः निवर्तकनिवर्त्त्ययोर्न हेतुहेतु-मद्भाव इति अपां ब्रह्मकार्यत्वसिद्धौ प्राप्तायाम् –

---

* पूर्वं तेजसो वायुजन्यत्वं कथितम् । अथ अप्पृथिव्योः क्रमेण बुद्धिसन्निधि-लक्षण (प्रसंग) संगत्या तावदधिकरणद्वयमाह—स. शि. वृ.

सिद्धान्तः—आप इति । 'तथा ह्याह' इत्यनुवर्तते । आपः अतः—तेजसो जायन्ते । तथा ह्याह—'अग्नेरापः' इति । पञ्चीकृतयोः पृथिव्यम्भ्योर्विरोधेऽपि नापञ्चीकृतयोर्विरोधः । सन्तापाधिक्ये स्वेदोद्भव-दर्शनादपि कार्यकारणभावस्तयोर्घटते । तस्मात्तेजोरूपापन्नात् ब्रह्मणः अपां जन्मेतिसिद्धम् ।। १ ।।

[इति अबधिकरणम्]

[६. पृथिव्यधिकरणम्]

१. पृथिव्यधिकाररूपशब्दान्तरेभ्यः २-३-१

'ता अन्नमसृजन्त' (छा- ६-२-४) इति श्रुतौ, किमन्नशब्देन व्रीहियवाद्यन्नमुच्यते ? किं वा पृथिवी ? इति संशये—प्रसिद्धेर्व्रीहियवाद्येवान्न-मिति प्राप्ते—

सिद्धान्तः—अद्भ्यो जायमाना पृथिव्येवान्नशब्देनोच्यते । कुतः ? 'अधिकाररूपशब्दान्तरेभ्यः'—अधिकारात्—महाभूतसृष्टिप्रकरणात् पृथि-व्येवान्नशब्देनोच्यते । 'यत्कृष्णं—तदन्नस्य' (छा. ६-४-२) इति वाक्य-शेषगतात् कृष्णरूपादपि पृथिव्येवान्नशब्दार्हा । 'अद्भ्यः पृथिवी' (तै. आ- १) इति शब्दान्तरादपि पृथिव्येवान्नशब्दार्हा । अन्नहेतुत्वात्—पृथिव्यामन्नशब्दः अधिकारादिभिर्बाधितप्रसिद्धिः लक्षणया वाचकः ।। १ ।।

[इति पृथिव्यधिकरणम्]

[७. तदभिध्यानाधिकरणम्]

१. तदभिध्यानादेव तु तल्लिङ्गात् सः २-३-१३

* किं वियदाद्याः स्वतन्त्राः कार्यकर्तारः ? उत ब्रह्मोपाधिकाः ? इति संशये—केवलाकाशादिकर्तृत्वप्राप्तौ—

सिद्धान्तः—स एव परमेश्वरस्तेन तेनात्मनाऽवतिष्ठमानोऽभिध्यायंस्तंतं विकारं सृजति। कुतः ? 'तल्लिङ्गात्'—'यः पृथिव्यां तिष्ठन् + पृथिवीमन्तरो यमयति' (बृ. ३-७-३) इति साध्यक्षामेव भूतानां प्रवृत्तिं दर्शयति। तथा 'तत्तेज ऐक्षत' 'ता आप ऐक्षन्त' (छा. ६-२-३) इत्येवमादीक्षणपूर्वकं यत् स्रष्टृत्वं तत्परमेश्वरपक्ष एव घटते। तस्मात् व्योमाद्युपाधिकस्य ब्रह्मण एव कारणत्वम् ॥ १ ॥

[इति तदभिध्यानाधिकरणम्]

[७. विपर्ययाधिकरणम्]

१. विपर्ययेण तु क्रमोऽत उपपद्यते च २-३-१४

† किं भूतानां सृष्टिक्रमेण लयः ? उत विपरीतक्रमेण ? इति संशये—वियदादिक्रमस्य सृष्टौ क्लृप्तत्वात् प्रलयेऽपि स एवेति प्राप्ते—

---

* इत्थमुत्पत्तिक्रमेण महाभूतश्रुतीनामविरोधः प्रत्यपादि। अधुना तानि भूतान्याश्रियान्यद्विचार्यंत इति आश्रयाश्रयिभावसंगत्येदमाह—स·शि.वृ.

† इत्थं भूतानामुत्पत्तिक्रमे चिन्तिते लयक्रमस्य बुद्धिस्थत्वात प्रसङ्गसंगत्याऽऽहेदमधिकरणम् ॥

राद्धान्तः—विपर्ययेण प्रलयक्रमः, अतः—उत्पत्तिक्रमात् भवितुमर्हति। कुतः? लोके तथादर्शनात्। अद्भ्यो जातं हिमकरकादि तास्वेव लीयमानं दृश्यते। अतश्चोपपद्यत एतत्, यत् पृथिव्यद्भ्यो जाता स्थितिकालव्यतिक्रान्तौ अपोऽपीयादिति। एवमपां तेजसि लयः॥

किञ्च 'जगत्प्रतिष्ठा देवर्षे पृथिव्यप्सु प्रलीयते। ज्योतिष्यापः प्रलीयन्ते ज्योतिर्वायौ प्रलीयते' इत्यादिलयक्रमोऽपि पुराणे पठ्यते॥ १॥

[इति विपर्ययाधिकरणम्]

[९. अन्तराविज्ञानाधिकरणम्]

१. अन्तरा विज्ञानामनसी क्रमेण तल्लिङ्गादिति चेन्नाविशेषात् २-३-१५

† भूतानामुत्पत्तिप्रलयक्रमस्य बुद्ध्याद्यैः किं भङ्गोऽस्ति? न वा? इति संशयः। 'अर्थेभ्यश्च परं मनः। मनसस्तु परा बुद्धिः' (क. १-३-१०) इति लिङ्गात् सिद्धयोर्बुद्धिमनसोराकाशात्मनोर्मध्ये जन्मप्रलयाधारे बुद्धिमनसी स्त इति क्रमभङ्ग इति चेत्—

न—कुतः? 'अविशेषात्'—बुद्धिमनसोः करणत्वेन चक्षुरादिवत् भौतिकत्वात् भूतोत्पत्तिक्रम एवानयोरप्युत्पत्तिक्रमः। प्राणानामिन्द्रियाणा-

---

† भूतोत्पत्तिलयक्रमविचारस्य यत् प्रयोजनं, तदेव कारणोत्पत्तिक्रमविचारस्येत्येकप्रयोजनकत्वसंगत्येदमाह—स· शि. वृ.

10

मपि भौतिकत्वात् । 'एतस्माज्जायते प्राणः' (मु. २-१-३) इत्याद्याऽपि श्रुतिः एवमेव व्याख्येया । तस्मात् नोक्तक्रमभङ्गोऽस्ति ॥ १ ॥

[इति अन्तरविज्ञानाधिकरणम्]

——o——

[१०. चराचरव्यपाश्रयाधिकरणम्]

१. चराचरव्यपाश्रयस्तु स्यात्तद्व्यपदेशो भाक्तस्तद्भावभावित्वात् २-३-१६

* किं जन्ममरणे जीवस्य ? किं वा पुरुषस्य ? इति संशये— जातो देवदत्त इत्यादिव्यवहारदर्शनात्, जातकर्मविधानाच्च जन्ममरणे जीवस्येति प्राप्ते—

सिद्धान्तः—चराचर इति । 'तु'शब्दः शङ्कां निराचष्टे । न जीवस्योत्पत्तिप्रलयौ स्तः । इतरथा तस्यानित्यत्वेन शास्त्रविहितफलाभावप्रसङ्गात् । तद्व्यपदेशो भाक्तः—जन्ममरणव्यपदेशो जीवस्य भाक्तः—औपचारिकः । किमाश्रयः पुनरयं मुख्यः ? येन जीवे भाक्तः स्यात्— उच्यते—'चराचरव्यपाश्रयस्तु स्यात्'— स्थावरजङ्गमशरीरव्यपाश्रय एष व्यपदेशो मुख्यः स्यात् । 'तद्भावभावित्वात्'—शरीरप्रादुर्भावतिरोभावयोः सतोर्जन्ममरणशब्दप्रयोगसंभवात् ॥ १ ॥

[इति चराचरव्यपाश्रयाधिकरणम्]

---

* इत्थं पूर्वाधिकरणेषु तत्पदार्थब्रह्मसिध्यै भूतकरणोत्पत्तिश्रुतिविरोधो निरस्तः । संप्रति आपादसमाप्तेः त्वंपदार्थशुध्यै जीवविषयश्रुतिविरोधो निरस्यते । तत्र यथा पूर्वं कारणोत्पत्तिश्रुत्या भूतश्रुतेरविरोध इत्युक्तम्, न तथेह जीवोत्पत्तिशास्त्रेणानिरोधः । तदुत्पत्तौ भूतोत्पत्तिक्रमभङ्गस्यावश्यकत्वादिति प्रत्युदाहरणावान्तरसंगत्येदमाह—स.शि.वृ.

[११· आत्माधिकरणम्]

१. नात्माऽश्रुतेर्नित्यत्वाच्च ताभ्यः २-३-१७

* जीवस्य देहाश्रयजन्ममरणभावेऽपि कल्पादौ वियदादिवत् उत्पत्तिरस्ति ? न वा ? इति संशये—जन्मादिव्यतिरिक्तजीवाङ्गीकारेऽद्वितीयत्वप्रतिज्ञाविरोधात्, पुण्यपापादिमत्त्वेनापहतपाप्मत्वादिलक्षणब्रह्मरूपानुपपत्तेश्च, श्रुतौ विष्फुलिङ्गदृष्टान्तेनोत्पत्तिकथनात् उत्पत्तिरस्तीति प्राप्ते—

राद्धान्तः—नात्मेति । नात्मा जीवः कल्पादावुत्पद्यते । कुतः ? 'अश्रुतेः'—न ह्यस्योत्पत्तिप्रकरणे श्रवणमस्ति । यत्तु विष्फुलिङ्गदृष्टान्तेनोत्पत्तिरस्तीत्युक्तम्—तन्न—कुतः ? 'नित्यत्वाच्च ताभ्यः'—नित्यत्वात् अजत्वादिप्रतिपादकश्रुतिभ्यश्चेत्यर्थः । 'स वा एष महानज आत्मा' (बृ. ४-४-२२) इत्याद्याः श्रुतय आत्मन उत्पत्तिं वारयन्ति ।।

विष्फुलिङ्गश्रुतिश्चौपाधिकजन्माभिप्रायेण प्रवृत्ता ; अन्यथा कृतविप्रणाशाकृताभ्यागमप्रसङ्गादिदोषः प्रसज्येत ।।

किञ्च यदद्वयं ब्रह्मविद्योत्पन्नबुद्धौ जीवरूपेण प्रतिबिम्बवत् प्रविशति, 'तत् सृष्ट्वा । तदेवानुप्राविशत्' (तै-आ-६) इति श्रुतेः । ततश्च, न प्रतिज्ञाविरोध इति जीवस्य आकाशादिवत् उत्पत्तिरङ्गीकार्या ।। १ ।।

[इति आत्माधिकरणम्]

---

* इत्थं देहोत्पत्तिनाशयोः सतोः जीवस्य जन्मनाशौ मा भूताम् ; कल्पाद्यन्तयोर्जीवस्य जन्मनाशौ किं न स्यातामिति प्रत्युदाहरणसंगत्येदमाह—प्र·शि.वृ.

[१२· ज्ञाधिकरणम्]

१. ज्ञोऽत एव २-३-१८

*किमयं जीवात्मा जडः? किं वा चिद्रूपः? इति संशये—सुषुप्ति-मूर्छासमाधिषु चैतन्याभावात्, जागरणे चात्ममनस्संयोगजन्यचैतन्यगुणसंभवात् जड आत्मेति प्राप्ते—

राद्धान्तः—'ज्ञ' इति। ज्ञः-नित्यचैतन्य एवायमात्मा। अत एव—यस्मादेव नोत्पद्यते, परमेव ब्रह्माविद्याकृतोपाधिसंपर्कात् जीवभावेनावतिष्ठते। ब्रह्म च 'विज्ञानमानन्दं ब्रह्म' (बृ. ३-९-२८) इतिश्रुत्या ज्ञानरूपमिति सिद्धम्। न चैतन्यं सुषुप्त्यादौ लुप्यते, सुषुप्त्यादिसाक्षित्वेनावस्थानात्; अन्यथा सुषुप्त्यादिपरामर्शो न स्यात्। तथा च श्रुतिः 'न हि द्रष्टुर्दृष्टेर्विपरिलोपो विद्यते' (बृ. ४-३-२३) इति। ज्ञानस्वरूपत्वेऽपि गन्धादिविशेषपरिच्छेदाय घ्राणाद्यपेक्षणात् ॥ १ ॥

[इति ज्ञाधिकरणम्]

—o—

* पूर्वसिद्धजीवानुत्पत्तिमुपजीव्य उत्तरसिद्धान्तोत्थानात् हेतुहेतुमद्भाव संगतिः—स· शि. वृ.

[१३. उत्क्रान्तिगत्यधिकरणम्]

१. उत्क्रान्तिगत्यागतीनाम् २-३-१९

*स एष जीवः किमणुपरिमाणः ? उत महत्परिमाणः ? इति संशये—पूर्वपक्षमाह—उत्क्रान्तिगत्यागतीनामिति । उत्क्रान्तिगत्यागतिश्रवणात् अणुर्जीवः । 'स यदाऽस्माच्छरीरादुत्क्रामति' (कौ. ३-३) इत्युत्क्रान्तिः । 'चन्द्रमसमेव गच्छन्ति' (कौ- १-२) इति गतिः । 'तस्माल्लोकात् पुनरेत्यस्मै लोकाय कर्मणे' (बृ. ४-४-६) इत्यागतिः । न हि विभोश्चलनेत्क्रान्त्यादयः संभवन्ति । मध्यमपरिमाणत्वे चानित्यत्वप्रसङ्गः । अतोऽणुपरिमाण एव भवितुमर्हति ।। १ ।।

२. स्वात्मना चोत्तरयोः २-३-०

उत्क्रमण हि मरणे निरूढम् अचलतोऽपि ग्रामस्वाम्यनिवृत्तिवत् भवतु नाम । इत्तरयोश्च गत्यागत्योश्चलने निरूढत्वात्स्वात्मना चलनरूपेणैव संभवः, गमेः कर्तृस्थक्रियात्वात्, तयोश्च महत्परिमाणेऽसंभवात्, मध्यमपरिमा †णस्यानित्यत्वप्रसङ्गात् आत्मनोऽणुत्व एव तयोः संभव इत्यर्थः ।।२।।

तर्हि सर्वगतत्वश्रुतिविरोध इत्याशङ्क्य समाधत्ते—

३. नाणुरतच्छ्रुतेरिति चेन्नेतराधिकारात् २-३-१

नायं जीवोऽणुः. अतच्छ्रुतेः—अनणुत्वश्रुतेः, 'सर्वव्यापी' (श्वे. ३-११) इत्यादिना सर्वगतत्वश्रुतेरिति चेत्—न—इतराधिकारात्—

---

* इत्थं जीवस्य ब्रह्माभेदयोग्यत्वाय नित्यत्वं स्वप्रकाशत्वं चाभिधाय, अधुना स्वप्रकाशत्वादिवत् बहिष्ठमपरिच्छिन्नत्वमणुत्वनिरसेन साधयतीत्यान्तरबहिर्भावसंगत्येदमाह—स.शि.वृ.

† एवं कुण्डलितभागस्य (१५३ पुटपर्यन्तं) मातृकाया लोपात् सदाशिवब्रह्मेन्द्रवृत्तिः संयोजिता ॥

इतरस्य ब्रह्मणः सर्ववेदन्ततेषु प्रधानतया ज्ञेयत्वेन प्रकृतत्वात् तस्यैव सर्वगतत्वश्रुतिः, न जीवस्येत्यर्थः ।। ३ ।।

जीवस्याप्यणुत्वश्रुतिरस्तीत्याह—

४. स्वशब्दोन्मानाभ्यां च २-३-२२

'एषोऽणुरात्मा' (मु. ३-१-९) इति स्वस्याणुत्वस्य वाचकः एतच्छब्दः, 'वालाग्रशतभागस्य' (श्वे ५-८) इत्युन्मानम्— उद्धृत्य सर्वेभ्यः स्थूलपरिमाणेभ्यो मानं—उन्मानम्—अत्यन्तापकृष्टपरिमाणमिति यावत्; ताभ्यां जीवोऽणुरेवेत्यर्थः ।। ४ ।।

ननु आत्मनोऽणुत्वे जाह्नवीतोयनिमग्नस्य देहव्यापिशैत्योपलब्धिविरोध इत्यत आह—

५. अविरोधश्चन्दनवत् २-३-२३

यथा चन्दनबिन्दुः शरीरैकदेशस्थः शरीरव्यापि सुखं जनयति, तथा जीवोऽपि देहव्यापिनं शैत्याद्युपलंभं करिष्यतीत्यविरोध इत्यर्थः ।। ५ ।।

दृष्टान्तदार्ष्टान्तिकयोर्वैषम्यमाशङ्क्य परिहरति—

६. अवस्थितिवैशेष्यादिति चेन्नाभ्युपगमाद्धृदि हि २-३-२४

नात्र चन्दनदृष्टान्तः, अवस्थितिवैशेष्यात्। प्रत्यक्षेण चन्दनबिन्दोरेकदेशेऽवस्थितिः ज्ञायते, जीवस्य नैवमित्यतुल्यत्वात् इति चेत्—न—कुतः? अभ्युपगमाज्जीवाणुत्वस्य। तत् कस्मात्? हृदि हि— यस्मादल्पपरिमाणे हृदि जीवः पठ्यते 'हृद्यन्तर्ज्योतिः' (बृ. ४-३-७) इत्यादौ, तस्मात् जीवस्याणुत्वमभ्युपगम्यत इति न दृष्टान्तवैषम्यमित्यर्थः ।। ६ ।।

ननु सावयवतया चन्दनबिन्दोः सर्वशरीरव्यापकत्वम्, न तथा जीवस्याणोः सावयवत्वम्, येन शरीरव्यापित्वं स्यादित्यतुष्ट्या पक्षान्तरमाह—

७. गुणाद्वा लोकवत् २–३–२५

आत्मनोऽणुत्वेऽपि तन्निष्ठज्ञानगुणस्य व्यापकत्वाङ्गीकारात् व्यापकगुणात् व्यापि कार्यं भविष्यति। लोकवत्—यथा लोके गृहनिष्ठप्रदीपस्याल्पत्वेऽपि प्रभात्मकगुणवशात् गृहव्यापि प्रकाशादिकार्यं संभवति, तद्वदित्यर्थः ॥ ७ ॥

ननु गुणिव्यतिरेकेण गुणस्य वृत्तेरन्यत्र दर्शनात् तत् कथमित्याशङ्क्याह—

८. व्यतिरेको गन्धवत् २–३–२६

यथा गुणस्यापि सतो गन्धस्य गुणिव्यतिरेकेण वृत्तिः, पुष्पपेटिकातो दूरे पर्यटतः पुंसो गन्धोपलंभदर्शनात्; तद्वत् गुणिव्यतिरेको ज्ञानस्येत्यर्थः ॥ ८ ॥

अधुना ज्ञानेनैवात्मनो देहव्याप्तिरित्यत्र श्रुतिमाह—

९. तथा च दर्शयति २–३–२७

हृदयायतनत्वं अणुपरिमाणत्वं चात्मनोऽभिधाय, तस्यैव 'आलोमभ्यः' (छा. ८-८-१) इति श्रुतेः ज्ञानेन समस्तशरीरव्यापित्वं दर्शयतीत्यर्थः ॥ ९ ॥

तत्रैव हेत्वन्तरमाह—

१०. पृथगुपदेशात् २-३-२८

'प्रज्ञया शरीरं समारुह्य' (कौ. ३-६) इति आत्मज्ञानयोः कर्तृकरणभावेन पृथगुपदेशात् गुणद्वाराऽस्य शरीरव्यापित्वं गम्यते। तथा च व्यापकं ज्ञानम्, जीवस्तु अणुरित्यणुत्वश्रुत्या सर्वगतत्वश्रुतेर्विरोध इति पूर्वः पक्षः ॥ १० ॥

सिद्धान्तस्तु—

११. तद्गुणसारत्वात्तु तद्व्यपदेशः प्राज्ञवत् २-३-२९

तुः पूर्वपक्षव्यावर्तकः। नैवाणुर्जीवः, सर्वगतस्यैव ब्रह्मणो जीवभावेन प्रवेशश्रवणात् तादात्म्योपदेशाच्च। कथं तर्हि जीवेऽणुत्वव्यपदेशः? 'तद्गुणसारत्वात्' तस्याः बुद्धेः गुणाः—अणुत्वोत्क्रान्तिगत्यागतिसुखदुःखादयः, ते गुणाः सारं—प्रधानं यस्य जीवस्य, स तथा। तस्य भावः तत्त्वं, तस्मात् तद्व्यपदेशः—अणुत्वादिव्यपदेशः, न स्वाभाविकः। 'प्राज्ञवत्'—यथा प्राज्ञस्य परमात्मनः सगुणोपासनेषु दहराद्युपाधिवशात् अणुत्वादिकं व्यपदिश्यते, तद्वदित्यर्थः ॥ ११ ॥

ननु आत्मन्यणुत्वादिसंसारस्य बुद्ध्युपाधिकत्वे, कदाचित् बुद्ध्या वियोगे संसारो न स्यादित्यत आह—

१२. यावदात्मभावित्वाच्च न दोषस्तद्दर्शनात् २-३-३०

बुद्धिसंयोगस्य, यावत् आत्मनः सम्यग्दर्शनेन संसारो न निवर्तते, तावद्भावित्वान्नोक्तदोषः। तत् कस्मात्? 'तद्दर्शनात्'—देहवियोगेऽपि

तस्य बुद्धिसंयोगस्य 'स समानस्सन्नुभौ लोकावनुसञ्चरति' (बृ. ४-३-४) इत्यादिश्रुतौ दर्शनादित्यर्थः ॥ १२ ॥

ननु सुषुप्तौ ब्रह्मसंपत्तिकार्यनाशयोरनभ्युपगमात् न बुद्धिसंयोगस्य यावदात्मभावित्वमित्यत आह—

१३. पुंस्त्वादिवत्तस्य सतोऽभिव्यक्तियोगात् २-३-३१

यथा बाल्ये सत एव पुंस्त्वादेः यौवनेऽभिव्यक्तिः, तद्वत् तस्य बुद्धिसंयोगादेः सुषुप्तौ सूक्ष्मात्मना सत एवाभिव्यक्तिसंभवात् यावदात्मभावित्वं न विरुध्यत इत्यर्थः ॥ १३ ॥

ननु बुध्यपरपर्यायान्तःकरणे किं प्रमाणम्? यत्प्रयुक्तः संसारः स्यादित्यत आह—

१४. नित्योपलब्ध्यनुपलब्धिप्रसङ्गोऽन्यतरनियमोवाऽन्यथा २-३-३२

इदमन्तःकरणमवश्यमभ्युपगन्तव्यम्; 'अन्यथा'—अनभ्युपगमे सर्वेषामिन्द्रियाणां स्वस्वविषयसन्निधानदशायां नित्योपलब्धिसाधने सति नित्यमेवोपलब्धिप्रसङ्गः। अथ सत्यपि हेतुसमवधाने फलाभावः, ततो नित्यमेवानुपलब्धिः प्रसज्येत। अथवा 'अन्यतरनियमः' अन्यतरस्य—आत्मन इन्द्रियस्य वा शक्तिप्रतिबन्धोऽङ्गीकर्तव्यः। आत्मनस्त्वविक्रियत्वान्न शक्तिप्रतिबन्धः संभवति। चक्षुरादिशक्तिप्रतिबन्धेऽपि न निमित्तत्वं पश्यामः। तस्मादुक्तलक्षणमन्तःकरणमङ्गीकर्तव्यम्। ततश्च तदध्यासः सकलानर्थहेतुरिति सिद्धम् ॥

[इति उत्क्रान्तिगत्यधिकरणम्]

[१४. कर्त्रधिकरणम्]

१. कर्ता शास्त्रार्थवत्त्वात् २–३–३३

* बुध्यादितादात्म्याध्यासबलात् अपरो जीवधर्मः प्रपञ्च्यते ॥

किं जीवः कर्ता ? उताकर्ता ? इति संशये—बुद्धेः परिणामित्वेन क्रियावेशात्मककर्तृत्वसंभवात्, आत्मनश्चासङ्गत्वात् न कर्तृत्वमिति सांख्यमत प्राप्तौ—

आह—आत्मा 'कर्ता' भवितुमर्हति । कस्मात् ? 'शास्त्रार्थवत्त्वात् । एवं सति 'यजेत' इतिशास्त्रमर्थवद्भवति, श्रवणादिशास्त्रमपि, लौकिकव्यापारश्च । करणत्वादेव धियः कर्तृत्वं न घटते ॥ १ ॥

२. विहारोपदेशात् २–३–३४

'स ईयतेऽमृतो यत्र कामम्' (बृ. ४-३-१२) इति स्वप्ने विहारोपदेशात् जीवः कर्ता भवति ॥ २ ॥

उपादानात् २–३–३५

'प्राणानां विज्ञानेन विज्ञानमादाय' (बृ. २-१-१७) इति करणोपादानात् जीवः कर्ता भवति ॥ ३ ॥

४. व्यपदेशाच्च क्रियायां न चेन्निर्देशविपर्ययः २–३–३६

'विज्ञानं यज्ञं तनुते' (तै. आ-५) इति क्रियायां कर्तृत्वव्यपदेशाच्च कर्ता जीवः ॥

---

* इत्थमणुत्वं पराणुद्य—ततो बहिश्च कर्तृत्वं साधयतीत्यान्तरबहिर्भावसंगत्येदमाह—स.शि.वृ.

ननु विज्ञानशब्दो बुद्धिवचनः, न जीववचन इति शङ्कते—न चेदिति । परिहरति—निर्देशविपर्यय इति । यदि बुद्धिः विज्ञानं स्यात्, तदा ‘ तदेषां प्राणानां विज्ञानेन विज्ञानमादाय ’ इतिवत् ‘ विज्ञानेन यज्ञं तनुते ’ इति विपर्ययनिर्देशः स्यादित्यर्थः ।। ४ ।।

ननु जीवस्य कर्तृत्वे स्वस्य हितमेव कुर्यात्, नाहितमिति । नेत्याह—

५. उपलब्धिवदनियमः २–३–३६

यथाऽयमात्मा उपलब्धिं प्रति स्वतन्त्रोऽपि इष्टमनिष्टं चोपलभते, एवमनियमेनैवेष्टमनिष्टं च संपादयिष्यति ।। ५ ।।

६. शक्तिविपर्ययात् २–३–३८

किञ्च यदि बुद्धेः कर्तृत्वं— तदा करणशक्तेः बुद्धेः कर्तृत्वं, कर्तृ-शक्तेर्जीवस्य करणत्वमिति शक्तिविपर्ययप्रसङ्गः । तस्मात् जीवः कर्ता ।। ६ ।।

७. समाध्यभावाच्च २–३–३९

‘ आत्मा वा अरे द्रष्टव्यः ’ (बृ. २-४-५९—४-५-६) इति समाध्यभावप्रसङ्गादपि जीवः कर्ता । तस्मात् जीवः कर्तेति सिद्धम् ।। ७ ।।

[इति कर्त्रधिकरणम्]

[१५. तक्षाधिकरणम्]

१. यथा च तक्षोभयथा २-३-४०

पूर्वाधिकरणे साधितं कर्तृत्वं किं पारमार्थिकम्? उत काल्पनिकम्? * इति संशये—बाधकाभावात् पारमार्थिककर्तृत्वे प्राप्ते—

सिद्धान्तः—यथा चेति। यथा च तक्षा तक्षणादिव्यापारेषु स्वयमपेक्ष्य वास्यादीनि करणादीनि कर्ता भवति, स्वशरीरेणाकर्ता—इत्युभयथाऽप्युपदिश्यते, एवमसङ्गत्वादयमात्मा स्वतोऽकर्ता, बुध्याद्यध्यासवशेन कर्तेत्युभयथा च एवं भ्रान्त्या कर्ता, परमार्थतस्त्वकर्ता जीवः कथ्यते॥

यत्तु बाधकाभावात् वास्तवं कर्तृत्वमिति—तन्न—'असंगो ह्ययं पुरुषः' (बृ. ४-३-१५) इति श्रुत्या कर्तृत्वसङ्गस्य बाधितत्वात्। विधिशास्त्रमप्यविद्यासिद्धकर्तृत्वमुपादाय कर्तव्यमुपदिशति, न कर्तृत्वमस्य प्रतिपादयति। उभयपरत्वे वाक्यभेदप्रसङ्गात्। सर्वगात्मवादिभिरवश्यमात्मनः परिस्पन्दाख्यव्यापारासंभवात् परिछिन्नबुध्यादिसम्बन्धायारोपितं कर्तृत्वमङ्गीकर्तव्यम्। अत आत्मनः काल्पनिकं कर्तृत्वमिति सिद्धम्॥

[इति तक्षाधिकरणम्]

---

* तथाच 'उपजीव्योपजीवकभावसंगतिः' इति—स.शि.वृ.

[१६. परायत्ताधिकरणम्]

१. परात्तु तच्छ्रुतेः २-३-४१

यदेतज्जीवस्य कर्तृत्वं किं तदीश्वरापेक्षम्? उत केवलरागाद्यपेक्षम्? इति संशये—कृष्यादिव्यापारेषु अनडुहादिवत् ईश्वरस्य सहकारित्वादर्शनात् नेश्वरापेक्षमिति प्राप्ते—

राद्धान्तः—परात्त्विति। 'तु'शब्दः पक्षव्यावृत्त्यर्थः। परस्मादात्मनः कर्माध्यक्षात् सर्वभूताधिवसात् साक्षिणश्चेतयितुरीश्वरात् तदनुज्ञया जीवस्य कर्तृत्वभोक्तृत्वलक्षणस्य संसारस्य सिद्धिः। कुतः? 'तच्छ्रुतेः'—'एष ह्येव साधु कर्म कारयति' (कौ. ३-८) इत्यादिश्रुतौ जीवकर्तृत्वस्येश्वराधीनत्वश्रवणात् इत्यर्थः। ईश्वरस्यानडुहादिवत्प्रत्यक्षत्वाभावेऽपि लोकप्रसिध्या श्रुतिप्रामाण्याच्च हेतुकर्तृत्वमास्थीयते ॥ १ ॥

तर्हीश्वरस्य वैषम्यनैर्घृण्यदोषप्रसङ्ग इति—नेत्याह—

२. कृतप्रयत्नापेक्षस्तु विहितप्रतिषिद्धावैयर्थ्यादिभ्यः २-३-४२

'तु'शब्दः पक्षं व्यावर्तयति। कृतो यः प्रयत्नः- जीवस्य धर्माधर्मलक्षणः, तदपेक्ष ईश्वरः कारयति। वैषम्यादिकं तु जीवपुण्यपापापेक्षमिति भावः। कृतप्रयत्नापेक्ष ईश्वर इत्येतदुपपादयति—विहितप्रतिषिद्ध वैयर्थ्यादिभ्यः इति। 'स्वर्गकामो यजेत' 'ब्राह्मणो न हन्तव्यः' इत्येवमादिविहितप्रतिषिद्धयोः अवैयर्थ्यादिभ्यो हेतुभ्यः कृतप्रयत्नापेक्ष एवेश्वर इति गम्यते 'एष ह्येव' इत्यादिश्रुतेः, 'अज्ञो जन्तुरनीशोऽयमात्मनस्सुखदुःखयोः। ईश्वरप्रेरितो गच्छेत् स्वर्गं वा श्वभ्रमेव वा' इत्यादिस्मृतेश्च जीवस्य विहितप्रतिषिद्धफलप्राप्तावत्यन्तपारतन्त्र्यात् ईश्वरो यदि धर्माधर्मनिरपेक्षः विधिप्रतिषेधयोः स्थाने नियुञ्जीत, तदा यत् विधिनिषेधयोः फलं, तत् ईश्वरेण तत्प्रतिपादितधर्मा-

धर्मनिरपेक्षेण कृतमिति विधिनिषेधयोरानर्थक्यं स्यात् । तन्मा भूदिति परमेश्वरस्य धर्माधर्मसापेक्षता; तथा विहितकारिणमनर्थेन योजयेत्, निषिद्धकारिणमप्यर्थेनेति वेदस्याप्रामाण्यप्रसङ्गः स्यात् । तन्निवृत्त्यर्थमपि तस्य धर्माधर्मसापेक्षता ॥ ३ ॥

[इति परायत्ताधिकरणम्]

[१७. अंशाधिकरणम्]

१. अंशो नानाव्यपदेशादन्यथा चापि दाशकितवादित्वमधीयत एके २-३-४३

*जीवेश्वरयोः प्रयोज्यप्रयोजकभाव उक्तः । सः सम्बद्धयोरेव भवतीति किं स्वामिभृत्यभावलक्षणः सम्बन्धः ? उत महाकाशघटाकाशयोरिवांशांशिभावलक्षणः सम्बन्धः ? इति संशये—स्वामिभृत्यभाव एव युक्तः, स्वामिभृत्यभावेष्वेव ईशेशितव्यभावस्य प्रसिद्धत्वादिति प्राप्तम्—

तस्योत्तरम्— अंशो नानाव्यदेशादिति । अंशो जीव ईश्वरस्य भवितुमर्हति । कुतः ? 'नानाव्यपदेशात्' 'सोऽन्वेष्टव्यः' (छा. ८-७-१) इति । इह चाविद्याकल्पितभेदमाश्रित्य निरवयवस्यैकाद्वितीयस्यांशासंभवात् अंश इवांशः घटाकाश इव महाकाशस्य । नानाव्यपदेशोऽपि काल्पनिको न पारमार्थिक इत्याह अन्यथा चापीति । अन्यथा व्यपदेशो भवति अन्यान्यत्वस्य प्रतिपादकं व्यपदेशमेव दर्शयति—दाशकितवादित्वमधीयत एक इति ।

---

* इत्थं नित्यत्वादिकमात्मनोऽभिधाय, तस्य ब्रह्मैक्यं साधयतीति हेतुहेतुमद्भावसंगतिः—स.शि.वृ.

एकशाखिन दाशकितवादिभावं ब्रह्मण आमनन्ति। आथर्वणिकः ब्रह्मसूक्ते 'ब्रह्म दाशा ब्रह्म दासा ब्रह्मेमे कितवाः' (ब्रह्मसूक्तं) इति। दाशाः कैवर्ताः। कितवाः द्यूतकारिणः। ये दाशादयस्ते सर्वे ब्रह्मेति निहीनजन्तूदाहरणेन नामरूपकृतकार्यकारणसंघातानेकोपाधिप्रविष्टजीवस्य ब्रह्मात्मत्वमुक्तम्। 'तत् सृष्ट्वा। तदेवानुप्राविशत्' (तै. आ-६) 'तत्त्वमसि' (छा. ६-८-७) इति जीवब्रह्मणोरेकत्वोक्तेश्च न स्वामिभृत्यभावस्तयोः॥ १ ॥

२. मन्त्रवर्णात् २–३–४

'तावानस्य महिमा। अतो ज्यायांश्च पूरुषः' (छा. ३-१-२६) इत्यादिमन्त्रवर्णादपि तयोरंशांशिभाव एव, न स्वामिभृत्यभावः॥ २ ॥

३. अपि च स्मर्यते २–३–४५

'ममैवांशो जीवलोके जीवभूतस्सनातनः' (गी. १५-७) इत्यादि गीतायामपि ब्रह्मांशत्वमेव जीवस्य स्मर्यते॥ ३ ॥

४. प्रकाशादिवन्नैवं परः २–३–४६

जीवब्रह्मणोरेकत्वेऽपि कल्पितभेदात् न परो जीववत् संसारमनुभवति। 'प्रकाशवत्'—यथा प्रकाशः सौर्यश्चान्द्रमसो वा वियद्व्याप्यावतिष्ठमानोऽङ्गुल्यादिसम्बन्धाहृजुवक्रभावमापन्नोऽपि न परमार्थतस्तद्भावमापद्यते, तथाऽयमीश्वरोऽपि॥ ४ ॥

५. स्मरन्ति च २–३–४६

'लिप्यते न स पापेन पद्मपत्रमिवांभसा' (गी. ५-१०) इति व्यासादयोऽपि स्मरन्ति प्रत्यग्ब्रह्मणः संसारालेपम्॥ ५ ॥

ननु प्रत्यगात्मनः परमेश्वरस्य जीवभावेनावस्थितस्यैकस्य परस्य परमार्थतो जीवा नांशश्चेति विधिप्रतिषेधव्यवस्था न स्यात्। तत्राह—

६. अनुज्ञापरिहारौ देहसम्बन्धाज्ज्योतिरादिवत् २-३-४९

लौकिकवैदिकावनुज्ञापरिहारौ— विधिप्रतिषेधौ परमात्मन एकत्वेऽपि देहसम्बन्धात् स्याताम्। देहैः सम्बन्धः—देह सम्बन्धः—आध्यासिक इति ब्रूमः। असङ्गस्य कूटस्थस्य कार्यकरणसङ्घातरूपदेहेन न संयोगः सम्बन्धः। अयुतसिद्धत्वाभावाच्च न देहात्मनोः समवायः। तस्मात् देहाद्युपाधिसम्बन्धकृतात् विशेषादेकात्मताऽभ्युपगमेऽपि संभवत एवानुज्ञा-परिहारौ। ज्योतिरादिवदिति दृष्टान्तः। यथा ज्योतिष एकत्वेऽपि अग्निः गृहात् स्वीक्रियते, क्रव्यात् परित्यज्यते। यथा वा मूत्रपुरीषं गवां स्वीक्रियते, जात्यन्तरे परित्यज्यते॥ ६॥

७. असन्ततेश्चाव्यतिकारः २-३-४७

शरीरविशेषसम्बन्धादनुज्ञासंभवेऽपि स्वाम्येकत्वात् संसारसांकर्यमित्येतदपि नास्ति। कुतः? 'असन्ततेः'—कर्तुर्भोक्तुरात्मनः सन्ततिः—सर्वैः शरीरैः सम्बन्धो नास्ति। उपाध्यसन्तानान्नास्ति जीवसन्तान इत्यर्थः। ततश्च कर्मव्यतिकरः फलव्यतिकरो वा नास्ति॥ ७॥

८. अभास एव च २-३-५०

आभास एवैष जीवः परस्यात्मनः जलसूर्यकादिवत् प्रतिपत्तव्यः। ततश्च यथैकस्मिन् जलसूर्ये कंपमाने न जलसूर्यान्तरं कंपते, एवं प्रकृतेऽपि न फलसंकरः॥ ८॥

एवं स्वमते सांकर्यपरिहारमुक्त्वा परमते तत्परिहारासंभवमाह—

अदृष्टानियमात् २-३-५१

सर्वगा बहवश्चानन्ता जीवा इति वदतां फलसांकर्यम् । न चादृष्टं नियामकम् ; कुतः ? 'अनियमात्' बहुष्वात्मसु सर्वगतेषु प्रतिशरीरं बाह्याभ्यन्तरविशेषेण सन्निहितेषु मनोवाक्कायैर्धर्माधर्मलक्षणमदृष्टमुपार्ज्यते—तत्रैवास्यैवात्मन इदमदृष्टमिति नियामकहेत्वभावात् ॥ ९ ॥

१०. अभिसन्ध्यादिष्वपि चैवम् २-३-५२

'इत्थं करवाणि' इत्यादयो येऽभिसन्ध्यादयः प्रत्यात्मं प्रवर्तमानाः, ते नादृष्टनियामकाः ; तेष्वप्यात्मनः संयोगेन सर्वात्मसन्निधौ क्रियमाणानां नियामकहेत्वनुपपत्तेः ॥ १० ॥

११. प्रदेशादिति चेन्नान्तर्भावात् २-३ ५३

शरीरप्रदेशसंयोगात्मनः संयोगोऽभिसन्ध्यादिनियामक इति चेत्—न—कुतः ? 'अन्तर्भावात्'—विभुत्वाविशेषाद्धि सर्व एवात्मनः सर्वशरीरेष्वन्तर्भवन्तीति अन्तर्भावात् । न हि वैशेषिकशरीरावच्छिन्नोऽप्यात्मप्रदेशः शक्यः कल्पयितुम् । तस्मादात्मैकत्वपक्ष एव सर्वदोषाभाव इति सिद्धम् ॥ ११ ॥

[इति अंशाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

तृतीयःपादः

द्वितीयाध्यायस्य

चतुर्थः पादः

[१. प्राणोत्पत्त्यधिकरणम्]

१. तथा प्राणाः २-४-१

*इदानीं प्राणादिविषयश्रुतिविरोधः परिह्रियते । किं प्राणः उत्पद्यते ? न वा ? इति संशये—'तत्तेऽजोऽसृजत' (छा. ६-२-३) इति, प्रकरणे उत्पत्त्यश्रवणात् , 'ऋषयो वा एतदग्र आसीत् , के त ऋषय इति प्राणा वा व ऋषय इति' (शत. ब्रा. ६-१-१) इति सृष्टेः प्राक् तेषा प्राणानां अवस्थानेनानादित्वाच्चानुत्पत्तेः, 'एतस्माज्जायते प्राणः' (मु. २-१-३) इत्यादौ च प्राणोत्पत्तिश्रवणाच्च श्रुत्योर्विरोध इति प्राप्ते—

अभिधीयते—तथा प्राणा इति । यथा आत्मनः सकाशादकाशादयः उत्पद्यन्ते, तथा प्राणाः—इन्द्रियाण्यप्युत्पद्यन्ते । कस्मात् ? तेषां भूतकार्यत्वप्रतीतेः । 'अन्नमयं हि सोम्य मनः, आपोमयः प्राणः' (छा. ६-५-४) इति प्राणानां जन्म श्रूयते । 'प्राणो मनः सर्वेन्द्रियाणि च' (मु. २-१-३) इति च ॥ २ ॥

ननु प्राणजन्मश्रुतिर्गौणी भवत्विति—नेत्याह—

---

* पूर्वपादे भूतभोक्तृश्रुतिविरोधं विधूय, अधुना भौतिकेन्द्रियादिश्रुतिविरोधं परिहर्तुं पादान्तरमवतारयन्—बुद्धिस्थसंगत्येदमाह—स.शि.वृ.

२. गौण्यसंभवात् २–४–२

एकपदमिदं सूत्रम् । गौण्या असंभवः—गौण्यसंभवः । नहि प्राणानामुत्पत्तिश्रुतिर्गौणी भवितुमर्हति ; 'कस्मिन्नु भगवो विज्ञाते सर्वमिदं विज्ञातं भवति ' (मु. १-१-३) इति प्रतिज्ञाहानिप्रसङ्गात् ।।

यत्तु सृष्टेः प्राक् प्राणानां सद्भावश्रवणं, तदवान्तरसृष्टिविषयम् 'अप्राणो ह्यमनाः शुभ्रः ' (मु. २-१-२) इति मूलप्रकृतेः प्राणादिसमस्त-विशेषरहितत्वश्रवणादिति ।। २ ।।

३. तत्प्राक्श्रुतेश्च २–४–३

किञ्च ' एतस्माज्जायते प्राणः ' (मु. २-१-३) इति एकं जायत इति पदं प्राक् श्रुतं उत्तरेषु खादिष्वनुवर्तते । न ह्येकः शब्दः सकृदुच्चरितो बहुभिस्संबध्यमानः क्वचिन्मुख्यः, क्वचिद्गौण इति शक्यं वक्तुम् , वैरूप्य-प्रसङ्गात् ।। ३ ।।

यदुक्तं ' तत्तेजोऽसृजत ' (छा. ६-२-३) इति प्रकरणे प्राणाना-मुत्पत्त्यश्रवणमिति—तस्योत्तरम्—

४. तत्पूर्वकत्वाद्वाचः २–४–४

ब्रह्मप्रकृतिकतेजोऽन्नपूर्वकत्वाभिधानात् वाक्प्राणमनसां तत्सामान्याच्च सर्वेषामेव प्राणानां ब्रह्मप्रभवत्वं सिद्ध्यति ।। ४ ।।

[इति प्राणोत्पत्त्यधिकरणम्]

———

[२· सप्तगत्यधिकरणम्]

१. सप्त गतेर्विशेषितत्वाच्च ४-५-५

* इदानीं मुख्यप्राणातिरिक्तानीन्द्रियाणि चिन्त्यन्ते ॥

उत सप्तैन्द्रियाणि ? उतैकादश ? इति संशये—

पूर्ववाद्याह—सप्तेति । सप्तैवेन्द्रियाणि : ' सप्त प्राणाः प्रभवन्ति ' (मु. २-१-८) इति श्रुतौ सप्तत्वावगतेः ' सप्त वै शीर्षण्याः प्राणाः ' (तै. सं. ५-७-१) इति शिरोगतसप्तछिद्रनिष्ठत्वेन विशेषितत्वाच्च । तस्मात् सप्तैव प्राणा इति प्राप्ते—

सिद्धान्त्याह—

२. हस्तादयस्तु स्थितेऽतो नैवम् २-४-६

हस्तादयस्त्वपरे सप्तभ्योऽतिरिक्ताः प्राणाः श्रूयन्ते । ' हस्तो वै ग्रहः ' (बृ. ३-२-८) इत्यादिश्रुतिषु सप्तत्वातिरेके च स्थिते अतः— हीनसंख्याया अधिकसंख्यायामन्तर्भावात् नैवं मन्तव्यम्, स्तोककल्पनानुरोधात् सप्तैव प्राणाः स्युरिति ' दशेमे पुरुषे प्राणा आत्मैकादशः ' (बृ. ३-९-४) इति श्रुतिवशात् एकादश प्राणा विज्ञेयाः । ' आत्म ' शब्देन मन उच्यते, कार्यवशात् एकादशैव शब्दस्पर्शरूपरसंगन्धविषयाः पञ्चबुद्धिभेदाः, तदर्थानि पञ्च भूतेन्द्रियाणि । वचनादानविहारोत्सर्गा-

---

* उत्पत्तिविषयः श्रुतिविप्रतिषेधः प्राणानां परिहृतः । संख्याविषय इदानीं परिह्रियते—शं. भा.

नन्दाः पञ्च कर्मभेदाः, तदर्थानि पञ्च कर्मेन्द्रियाणि। सर्वार्थविषयं त्रैकाल्यवर्ति मन एकमनेकवृत्तिकमिति ॥ १ ॥

[इति सप्तगत्यधिकरणम्]

[३. प्राणाणुत्वाधिकरणम्]

१. अणवश्च २-४-७

* किमेतानीन्द्रियाणि व्याप्तानि? उत मध्यमपरिमाणानि? इति संशये—व्याप्तानीति। सांख्यमतप्राप्तौ—

आह—अणवश्चेति। अणवश्चैते प्रकृताः प्राणाः प्रतिपत्तव्याः। मध्यमपरिमाणेष्वपि प्रत्यक्षदृश्यत्वं उत्क्रान्त्यादिसमये नास्तीति अणुत्वनिर्देशः। तेषां परमाणुतुल्यत्वे कृत्स्नशरीरव्यापिकार्यानुपलब्धिप्रसङ्गात्। देहावच्छिन्नवृत्तिमद्भिरेवाशेषव्यवहारसिद्धौ वृत्तिरहितसर्वगतेन्द्रियकल्पनायां गौरवात् ॥ १ ॥

[इति प्राणाणुत्वाधिकरणम्]

[४. प्राणश्रैष्ठ्याधिकरणम्]

१. श्रेष्ठश्च २-४-८

† 'स प्राणमसृजत' (प्र. ६-४) इति मुख्यप्राणो यः सृज्यत्वेन श्रुतः, स किमनादिः? उत सादिः? इति विशये नासदासीये सूक्ते

---

* इन्द्रियाणामुत्क्रान्तिर्न संभवति, तेषामपरिच्छिन्नाहंकारजन्यत्वेन विभुत्वादित्याक्षेपसंगत्येदमाह—स. शि. वृ.

† अतिदेशात्, न पृथक् संगत्यपेक्षा—स. शि. वृ.

'आनीदवातं' (ऋ. सं. ८-७-१७) इति सृष्टेः प्राक् प्राणचेष्टाश्रवणात् अनादिरिति प्राप्ते—

राद्धान्तः—मुखबिले संहरन् उछ्वासकारी वायुः मुख्यः प्राणः श्रेष्ठः=सर्वाधिकः। स परमात्मनो जायते। अन्यथा प्रतिज्ञाहानिप्रसङ्गात्। 'आनीत्' शब्दोऽपि न प्राणव्यापारं वक्ति, 'अवातं' इति प्रतिषेधात्। 'एतस्माज्जायते प्राणः' (मु. २-१-३) इति साक्षादेव तस्य जन्म श्रूयते ॥ १ ॥

[इति प्राणश्रैष्ठ्याधिकरणम्]

[५. वायुक्रियाधिकरणम्]

१. न वायुक्रिये पृथगुपदेशात् २-४-९

* किमयं मुख्यप्राणो वायुः? उतेन्द्रियाणां व्यापारः? उतान्यः कश्चित्? इति संशये, वायुः प्राण इति प्राप्तम्—'स वायुः' इति श्रुतेः॥

सांख्यमतानुसारेण करणव्यापारो वा प्राणः—इतीमां प्राप्तिं निराकरोति— न वायुक्रिये इति। न वायुः प्राणः, नापि करणव्यापारः; कुतः? 'पृथगुपदेशात्'—'प्राण एव ब्रह्मणश्चतुर्थः पादः स वायुना ज्योतिषा भाति च तपति च' (छा. ३-१८-४) इति वायोः पृथङ्निर्देशात्। वागादिकरणान्यनुक्रम्य पृथक्प्राणस्यानुक्रमणात् करणव्यापारादपि पृथग्व्यपदेशः, वृत्तिवृत्तिमतोश्च भेदात्। 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च'

* उत्पत्तिचिन्तानन्तरं उत्पत्तिमतः प्राणस्य स्वरूपं चिन्त्यत इति प्रसङ्गसंगत्येदमाह—स. शि. वृ.

(मु. २-१-३) इति मुख्यप्राणस्येन्द्रियाणां च विस्पष्टं पृथग्जन्मापि श्रूयते ।। १ ।।

तर्हि प्राणोऽपि कश्चिदस्मिन् देहे जीववत् स्वतन्त्रः प्राप्नोति, तस्यापि श्रेष्ठत्वादिगुणयोगादिति—नेत्याह—

२. चक्षुरादिवत्तु तत्सहशिष्ट्यादिभ्यः २–४–१०

'तु'शब्दः प्राणस्य स्वातन्त्र्यं व्यावर्तयति । यथा चक्षुरादीनि राजप्रकृतिवत् जीवस्य कर्तृत्वं भोक्तृत्वं च प्रति करणभूतानि, न स्वतन्त्राणि, तथा मुख्योऽपि प्राणो राजमन्त्रिवत् जीवस्य सर्वार्थत्वेनोपकरणभूतो न स्वतन्त्रः। कुतः ? 'तत्सहशिष्ट्यादिभ्यः—तैश्चक्षुरादिभिः सह प्राणः शिष्यते प्राण-संवादादिषु । समानधर्माणां च सहशासनं युक्तम्, बृहद्रथन्तरवत् । 'आदि'शब्देन संहतत्वाचेतनत्वादीन् प्राणस्यास्वातन्त्र्यहेतून् दर्शयति ।। २ ।।

ननु तर्हि द्वादशकरणकल्पनायां विषयान्तरमपि कल्पनीयमिति—नेत्याह—

३. अकरणत्वाच्च न दोषः तथाहि दर्शयति २–४–११

न तद्विषयान्तरप्रसङ्गो दोषः, अकरणत्वात् प्राणस्य । न हि चक्षुरादिवत् प्राणस्य करणत्वमभ्युपगम्यते । न चैतावता प्राणस्य कार्याभावः । कस्मात् ? तथाहि दर्शयति प्राणसंवादे श्रुतिरेव शरीरधारणाख्यं कार्यं दर्शयति—'मा मोहमापद्यथाऽहमेवैतत् पञ्चधाऽऽत्मानं प्रविभज्यैतद्बाण-मवष्टभ्य विधारयामि' (प्र. २-३) इति । बाणशब्देन शरीरमुच्यते ।।३।।

४. पञ्चवृत्तिर्मनोवद्व्यपदिश्यते २–४–१२

इतश्चास्ति मुख्यस्य प्राणस्य वैशेषिकं कार्यं, यत्कारणमयं पञ्चवृत्ति-र्व्यपदिश्यते श्रुतिषु 'प्राणोऽपानो व्यान उदानस्समानः' (बृ. १-५-३) इति।

वृत्तिभेदश्चायं कार्यविशेषापेक्षः। प्राणः प्राग्वृत्तिरुच्छ्वासादिकर्मा। अपानोऽवाग्वृत्तिः निश्वासादिकर्मा। व्यानस्तयोः सन्धौ तिर्यक्कर्महेतुः। उदान ऊर्ध्ववृत्तिरुत्क्रान्त्यादिहेतुः। समानः समं सर्वेष्वङ्गेषु योऽन्नरसान्नयति सः। एवं पञ्चवृत्तिः प्राणः। 'मनोवत्' इति निदर्शनम्। यथा मनसः पञ्चवृत्तयः श्रोत्रादिनिमित्ताः शब्दादिविषयाः, एवं प्राणस्यापि पूर्वोक्ता इत्यर्थः ॥ ४ ॥

[इति वायुक्रियाधिकरणम्]

[७. श्रेष्ठाणुत्वाधिकरणम्]

१. अणुश्च २-४-१३

* किमयमिन्द्रियादिवन्मध्यमपरिमाणः? उत विभुः? इति संशये— 'समः प्लुषिणा समो मशकेन समो नागेन सम एभिस्त्रिभिर्लोकैः समोऽनेन सर्वेण' (बृ. १-३-२२) इति विभुत्वप्रतीतेः विभुरिति प्राप्ते—

ब्रूमः—अणुश्चेति। अणुश्चायं प्राणः—मध्यमपरिमाण इति यावत्। इन्द्रियपरिमाणवदिहापि सौक्ष्म्यपरिच्छेदस्य विवक्षितत्वात् न परमाणुतुल्यस्य कृत्स्नशरीरव्यापित्वात्, उत्क्रान्तौ च पार्श्वस्थैरनुपलभ्यमानत्वात् अणुशब्दो मध्यमपरिमाणेऽपि प्रयुक्तः। आधिदैविकस्य हिरण्यगर्भप्राणस्य व्यष्टिरूपेण समष्टिरूपेणावस्थानात् भवतु विभुत्वम्; 'वायुरेव व्यष्टिः वायुरेव समष्टिः' इति श्रुतेः ॥

---

* प्रसङ्गसङ्गत्येदमधिकरणं प्रवृत्तम्।

'क्षमः क्षुषिणा' इत्यादिना तस्योपासनार्थं प्रपञ्चितत्वात् । आध्यात्मिकस्तु प्राणः इन्द्रियवददृश्यः परिच्छिन्नश्च ॥ ८ ॥

[इति श्रेष्ठाणुत्वाधिकरणम्]

[७. ज्योतिराद्यधिकरणम्]

१. ज्योतिराद्यधिष्ठानं तु तदामननात् २-४-१५

* इन्द्रियादीनां प्रवृत्तिः किं स्वतन्त्रा ? किं देवताधीना ? इति संशये—स्वतन्त्रा प्रवृत्तिः; देवताधीनत्वे तेषामेव भोगः स्यात्, न स्वात्मनः—इति प्राप्ते—

सिद्धान्तः । 'तु'शब्दः पक्षं व्यावर्तयति । ज्योतिरादिभिः—अग्न्याद्यभिमानिनीभिः देवताभिः अधिष्ठितं वागादिकरणजातं स्वकार्याय प्रवर्तत इति प्रतिजानीते । हेतुं चाचष्टे—'तदामननात्' इति । तथा ह्यामनन्ति—'अग्निर्वाग्भूत्वा मुखं प्राविशत्, वायुः प्राणो भूत्वा नासिके प्राविशत्, (ऐ. २-४) इत्यादि । अत्र वागादीनामग्न्याद्यनुगृहीतत्वश्रवणात् न स्वतन्त्रा प्रवृत्तिः ॥ १ ॥

न चैतावता तत्र देवानां भोक्तृत्वप्रसङ्ग इत्याह —

२. प्राणवता शब्दात् २-४-१५

सतीष्वपि प्राणानामधिष्ठात्रीषु देवतासु प्राणवता कार्यकरणस्वामिना शरीरेणैवैषां प्राणानां सम्बन्धः श्रुतेरेव गम्यते । तथा हि श्रुतिः 'अथ

---

* प्रसङ्गसंगत्येदमाह—स. शि. वृ.

यत्रैतदाकाशमनुविषण्णं चक्षुः स चाक्षुषः पुरुषो दर्शनाय चक्षुरथ यो वेदेदं जिघ्राणीति स आत्मा गन्धाय घ्राणम्' (छा. ८-१२.४) इत्यादिका शारीरकेण प्राणानां सम्बन्धं दर्शयति ॥ २ ॥

३. तस्य च नित्यत्वात् २-४-१६

तस्य—शारीरस्य अस्मिन् शरीरे भोक्तृत्वेन नित्यत्वात्—नियतत्वात् भोक्तृत्वं आध्यासिकपुण्यपापलेशसंभवात् सुखदुःखोपभोगसंभवाच्च। न देवतानां, महापुण्यफलेन देवत्वं प्राप्तानां अत्रोपभोगस्यासंभवात् ॥ ३ ॥

[इति ज्योतिराद्यधिकरणम्]

[८.इन्द्रियाधिकरणम्]

१. त इन्द्रियाणि तद्व्यपदेशादन्यत्र श्रेष्ठात् २-४-१७

*किमेकादशेन्द्रियाणि मुख्यस्य प्राणस्य वृत्तिभेदाः? किं वा तत्त्वान्तराणि? इति संशये—'एतस्यैव सर्वे रूपमभवन्' (बृ. १-५-२१) इतीन्द्रियाणां प्राणरूपत्वश्रवणात् वृत्तिभेदा इति प्राप्ते—राद्धान्तः—

तत्त्वान्तराण्येव प्राणात् वागादीनीति। कुतः? 'तद्व्यपदेशात्' तद्व्यपदेशभेदात्। को व्यपदेशभेदः? ते—प्रकृताः श्रेष्ठं वर्जयित्वा अवशिष्टा एकादशेन्द्रियाणीत्युच्यन्ते। श्रुतावेवं व्यपदेशदर्शनात्। 'एतस्माज्जायते प्राणो मनस्सर्वेन्द्रियाणि च' (मु. २-१-३) इत्येवंजातीयकेषु व्यपदेशेषु पृथक् प्राणो व्यपदिश्यते, पृथक् चेन्द्रियाणि ॥ १ ॥

---

* ननु सत्सु इन्द्रियेषु तदधिष्ठातृदेवताचिन्ता। तान्येव प्राणव्यापारव्यतिरेकेण न सन्तीत्याक्षेपसंगत्येदमाह—स. शि. वृ.

२. भेदश्रुतेः २-४-१८

भेदेन वागादिभ्यः प्राणः सर्वत्र श्रूयते । 'ते ह वाचमूचुः' (बृ. १-३-२) इत्युपक्रम्य वागादीनसुरविध्वस्तान् उपन्यस्योपसंहृत्य वागादिप्रकरणं, 'अथ हेममासन्यं प्राणमूचुः' (बृ. १ ३ ७) इत्यसुरविध्वंसिनो मुख्यस्य पृथगुपक्रमणात् ।। २ ।।

३. वैलक्षण्याच्च २-४-१९

किञ्च मुख्यप्राणस्येन्द्रियाणां वैलक्षण्यादपि हेतोः तत्त्वान्तरभूता मुख्यादितरे । सुप्तेषु वागादिषु मुख्य एको जागर्ति । स एवैको मृत्युनाऽनाप्तः, आप्ता इतरे—इत्यादिवैलक्षण्यात् भेदः प्राणेन्द्रियाणाम् । 'एतस्यैव सर्वे रूपमभवन्' (बृ. १-५-२१) इति यदिन्द्रियाणां प्राणरूपत्वमुक्तं, तदुक्तवैलक्षण्यात् तदनुरोधेन वागादिषु परिस्पन्दनलक्षणं प्राणायत्तं तद्रूपभवनं व्याख्येयम् ।। ३ ।।

[इति इन्द्रियाधिकरणम्]

[९. संज्ञामूर्तिक्लृप्त्यधिकरणम्]

१. संज्ञामूर्तिक्लृप्तिस्तु त्रिवृत्कुर्वत उपदेशात् २-४-२०

* 'अनेन जीवेनात्मना' (छा. ६-३-२) इति श्रुतौ, पञ्चभूतेषु सृष्टेषु परमेश्वरेण, भौतिकयोर्दृश्यमानयोर्नामरूपयोः स्रष्टा किं जीवः ? उत परमेश्वरः ? इति संशये—जीव इति तावत् प्राप्तम्—'अनेन जीवेना-

---

* पूर्वं नामरूपभेदेन प्राणेन्द्रिययोर्भेद उक्तः । तत्प्रसङ्गेन नामरूपव्याकरणं किंकर्तृकमिति विचार्यते —स॰ शि॰ वृ॰

त्मनाऽनुप्रविश्य नामरूपे व्याकरवाणि' (छा. ६-३-२) इति जीवस्य कर्तृत्वश्रवणात्—इति प्राप्ते—

राद्धान्तः—'तु' शब्देन पक्षो व्यावर्त्यते। संज्ञामूर्तिक्लृप्तिरिति नामरूपव्याक्रिया। सा परमेश्वरकर्तृका भवितुमर्हति। कुतः? 'त्रिवृत्कुर्वत उपदेशात्'—त्रिवृत्करणे—तस्य निरपवादकर्तृत्वं निश्चितम्। अतः स एव नामरूपव्याकरणेऽपि कर्ता। न च जीवस्य गिरिनदीसमुद्रनिर्माण-शक्तिरस्ति; ईश्वरस्तु सर्वशक्तियुक्तः—'पराऽस्य शक्तिर्विविधा' (श्वे. ६-८) इति श्रवणात्। 'सेयं देवतैक्षत' (छा. ६-३-२) इत्युपक्रम्य, 'व्याकरवाणि' इत्युत्तमपुरुषः ईश्वरपक्ष एव समञ्जसः॥ १॥

२. मांसादि भौमं यथाशब्दमितरयोश्च २-४-२१

उत्तरसूत्रोपयुक्तविषयोपदर्शनपरमिदं सूत्रम्। भूमेस्त्रिवृत्कृतायाः व्रीहियवाद्यन्नरूपेणावस्थितायाः पुरुषेणोपभुज्यमानायाः यत् मांसादि कार्यं, तदिदं भौममित्युच्यते। तच्च कार्यं यथाशब्दं—यथाश्रुति द्रष्टव्यम्। 'अन्नमशितं त्रेधा विधीयते, तस्य यः स्थविष्ठो धातुः तत्पुरीषं भवति, यो मध्यमस्तन्मांसं, योऽणिष्ठस्तन्मनः' (छा. ६-५-१) इति। एवं इतरयोः—अप्तेजसोः कार्यमवगन्तव्यम्। मूत्रं लोहितं प्राणश्चापां कार्यम्। अस्थि मज्जा वाक्च तेजस इति॥ २॥

ननु सर्वस्य त्रिवृत्कृतत्वे भूमिरियं, इदं तेजः, इमा आपः इति विशेषवादो न स्यात् इति—नेत्याह—

३. वैशेष्यात्तु तद्वादस्तद्वादः २-४-२२

'तु' शब्देन चोदितदोषमपवदति। विशेषस्य भावो वैशेष्यम्। भूयस्त्वमिति यावत्। सत्यपि त्रिवृत्करणे क्वचित्कस्यचित् भूयस्त्वमुपचर्यते।

अग्नेस्तेजोभूयस्त्वम्, अपामब्भूयस्त्वम्, पृथिव्याश्च पृथिवीभूयस्त्वम्—'एषा पृथिवी' इत्यादिवादश्च ॥

इह वियदधिकरणे तैत्तरीयश्रुत्या एकवाक्यतोपपादनात् पञ्चीकरणमेव यद्यपि सूत्रभाष्यकारयोरभिप्रेतम्—तथापि केवल छान्दोग्यवाक्यमाश्रित्य त्रिवृत्करणमुक्तम्, नामरूपव्याकरणे कारणाविद्योपाधिकप्रत्यगीश्वरकर्तृत्वप्रतिपादनाय। आकाशवायुभ्यां विना व्यवहारानुपपत्तेः पञ्चीकरणमवश्यमङ्गीकर्तव्यम्। न चाकाशवाय्वोः पञ्चीकरणे रूपादिसम्बन्धात् महत्त्वाच्च चाक्षुषत्वप्रसङ्गः; आकाशवाय्वंरेव भूयस्त्वात्, रूपवत्त्वमहत्त्वयोरनुद्भूतत्वात्, कैश्चिदपि वादिभिराकाशस्य चाक्षुषत्वानङ्गीकाराच्च। 'पञ्चीकृतपञ्चमहाभूतानि सर्वं विराडित्युच्यते' इत्यादिसंप्रदायविदां वचनबलादपि पञ्चीकरणमङ्गीकर्तव्यम्। 'तद्वादस्तद्वादः' इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ ३ ॥

[इति संज्ञमूर्तिक्लृप्त्यधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

द्वितीयाध्यायस्य

चतुर्थः पादः

समाप्तश्च द्वितीयाध्यायः

——

तृतीयाध्यायस्य

प्रथमः पादः

[१. तदन्तरप्रतिपत्त्यधिकरणम्]

१. तदन्तरप्रतिपत्तौ रंहति संपरिष्वक्तः प्रश्ननिरूपणाभ्याम् ३-१-१

द्वितीयाध्याये वेदान्तविहितब्रह्मदर्शने स्मृतिन्यायश्रुतिविरोधपरिहारेणानध्यवसानलक्षणमप्रामाण्यं परिहृतम्। अथेदानीं तस्य साधनं निरूप्यते ॥

तत्रापि प्रथमे पादे पञ्चाग्निविद्यामाश्रित्य वैराग्याख्यं साधनं चिन्त्यते ॥

'अथैनमेते प्राणा अभिसमायन्ति' (बृ. ४-४-१) इत्येवमादेः, 'अन्यन्नवतरं कल्याणतरं रूपं कुरुते' (बृ. ४-१-४) इत्येवमन्तात् संसारप्रकरणस्थाच्छब्दात् जीवो मुख्यप्राणसचिवः सेन्द्रियः समनस्कः विद्याकर्मसहायः पूर्वदेहं विहाय देहान्तरं प्रतिपद्यत इति गम्यते ॥

तत्र किं भूतसूक्ष्मैः संपरिष्वक्तो जीवो गच्छति? उत न? इति संशये— 'स एताः' (बृ ४-४-१) इत्यादेः करणोपादानवत् भूतोपादानस्याश्रुतत्वात् अपरिष्वक्तो गच्छतीति प्राप्ते तावदिदमारभ्यते—तदन्तरेति।

'तदन्तरप्रतिपत्तौ'—देहाद्देहान्तरप्रतिपत्तौ देहबीजैः भूतसूक्ष्मैः संपरिष्वक्तो 'रंहति'—गच्छतीत्यवगन्तव्यम्। कुतः? 'प्रश्ननिरूपणाभ्याम्'। 'वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति'

(छा. ४-३-३) इति प्रश्नः। निरूपणं च प्रतिवचनम्—'इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति' (छा. ५-९-१ इति ॥ १ ॥

नन्वत्र अप्परिवेष्टितस्य जीवस्य गमनमवगम्यते, न भूतान्तरपरिवेष्टितस्येति चेत्—तत्राह—

२. त्र्यात्मकत्वात्तु भूयस्त्वात् ३-१-२

तुशब्दश्चोद्यं निराकरोति। देहे तेजोऽबन्नानां त्रयाणां कार्योपलब्धेः त्र्यात्मकत्वमवगतम्। आपश्च त्रिवृत्करणश्रुतेः त्र्यात्मिकाः। तास्वारंभिकास्वभ्युपगतासु अन्यदपि भूतद्वयमभ्युपगन्तव्यम् भवति। अपां बाहुल्याच्चाप्शब्दप्रयोगः ॥ २ ॥

३. प्राणगतेश्च ३-१-३

'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति प्राणमनूत्क्रामन्तं सर्वे प्राणा अनूत्क्रामन्ति' (बृ. ४-४-२) इत्यादिश्रुतौ प्राणानां गतिश्रवणात्, तेषां गतिः आश्रयमन्तरेण न भवतीति भूतसूक्ष्माश्रितमेव गमनं सिद्ध्यति ॥ ३ ॥

४. अग्न्यादिगतिश्रुतेरिति चेन्न भाक्तत्वात् ३-१-४

'यत्रास्य पुरुषस्य मृतस्याग्निं वागप्येति' (बृ. ३-२-१३) इत्यादि श्रुतौ प्राणानामग्न्यादिगतिश्रवणात् न देहान्तरप्रतिपत्तौ जीवेन सह गमनमिति चेत्—न—भाक्तत्वात् प्राणानामग्न्यादिगतिश्रुतेः। 'ओषधीर्लोमानि वनस्पतीन् केशाः' (बृ. ३-२-१३) इत्युपचारप्राये पाठात् प्रायणसमये वागादिभिः प्रयोजनाभावात् अग्न्यादीनां वागादिगमनमुपचर्यते ॥ ४ ॥

५. प्रथमेऽश्रवणादिति चेन्न ता एव ह्युपपत्तेः ३-१-५

श्रद्धासोमवृष्ट्यन्नरेतोरूपाणां होमद्रव्याणां होमाधारेष्वग्निषु द्युलोक-पर्जन्यपृथिवीपुरुषयोषिदाख्येषु अग्निषु प्रथमे तावदग्नौ 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति' (छा. ५-४-२) इति श्रद्धाया होमद्रव्यत्वमुक्तम्। न च श्रुद्धायाः चित्तप्रसादलक्षणायाः होमोपयोग्यत्वमिति। सोमादीनां चाऽबहु-लत्वेनाप्शब्दवाच्यत्वमुपपद्यतां नाम। तस्मात् नाप्परिवेष्टितस्य गमनमिति चेत्—'न'—'ता एव'—आप एव श्रद्धाशब्देनोच्यन्ते। कुतः? 'उपपत्तेः'—एवं ह्यादिमध्यावसानसंगानादनाकुलमेतत्स्यात्। तनुत्वं श्रद्धासारूप्यं गच्छन्त्य आपः श्रद्धाशब्देन कथ्यन्ते। 'श्रद्धा वा आपः' इत्यादितैत्तरीयकप्रयोगदर्शनाच्चाप्सु श्रद्धाशब्द उपपद्यते ॥ ५ ॥

६. अश्रुतत्वादिति चेन्नेष्टादिकारिणां प्रतीतेः ३-१-६

भवतु नामापां श्रद्धादिक्रमेण पञ्चम्यामाहुतावपां पुरुषाकारता; तथाप्यपामिव जीवानां रंहणप्रतिपादकस्याश्रुतत्वात् न तत्परिष्वक्तस्य जीवस्य रंहणमिति चेत्—'न'—'इष्टादिकारिणां प्रतीतेः'। 'अथ य इमे ग्रामे इष्टापूर्ते दत्तमित्युपासते'—(छा. ५-१०-६) इत्यारभ्य, 'आकाशा-च्चन्द्रमसमेष सोमो राजा' (छा. ५-१०-४) इति य इष्टादिकारिणश्चन्द्रतां गताः, त एवेहापि प्रतीयन्ते, 'तस्मिन्नेतस्मिन्नग्नौ देवाः श्रद्धां जुह्वति तस्या आहुतेः सोमो राजा संभवति' (छा. ५-४-२) इति श्रुतिसामान्यात्। तस्मादिष्टादिकारिणोऽद्भिः परिवेष्टिता एव सोमलोकं गच्छन्ति ॥ ६ ॥

ननु 'एष सोमो राजा तद्देवानामन्नं तं देवा भक्षयन्ति' (छा. ५-१०-४) 'ते चन्द्रं प्राप्यान्नं भवन्ति' (बृ. ६-२-१६)

इतीष्टादिकारिणां धूमप्रतीकेन वर्त्मना तत्पुण्यफलोपभोगाय चन्द्रमसमारूढानां व्याघ्रादिभिरिव भक्ष्यमाणानां नोपभोगः संभवतीति— नेत्याह—

७. भाक्तं वाऽनात्मवित्त्वात् तथा हि दर्शयति ३–१–७

'वा' शब्दश्चोदिताऽऽशङ्कानिरासार्थः। भाक्तमेवैषामन्नत्वम्, न तु मुख्यम्; अन्यथा स्वर्गकामवाक्यं भज्येत स्यात्। 'विशोऽन्नं राज्ञाम्' इत्यादिषु च अनन्नेऽप्यन्नशब्द उपचर्यमाणो दृश्यते। तस्मात् पुत्रादिवत् गुणभावं गतैर्य देवानां सुखविहरणं, तदेषां भक्षणम्, न मोदकादिवच्चर्वणम्; 'न वै देवा अश्नन्ति न पिबन्ति' (छा. २-६-१) इति श्रुतेः। अनात्मवित्त्वाच्चेष्टादिकारिणां देवोपभोग्यत्वम्। तथा हि दर्शयति—'अथ योऽन्यां देवतामुपास्तेऽन्योऽसावन्योऽहमस्मीति न स वेद यथा पशुरेवं स देवानाम्' (बृ. १-४-१०) इति ॥ ७ ॥

[इति तदन्तरप्रतिपत्त्यधिकरणम्]

[२. कृतात्ययाधिकरणम्]

१. कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च २–१–७

*इष्टादिकारिणां फलोपभोगाय चन्द्रमसमारूढानां पुनः प्रत्यवरोहः श्रूयते—'तस्मिन् यावत्संपातमुषित्वाऽथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतम्' (छा. ५ १०-५) इति। तत्र संशयः—भुक्तकृत्स्नकर्माणोऽवरोहन्ति ?

* पूर्वं कर्मसमवेतानामपां पञ्चमाहुतौ पुरुषात्मना परिणामश्रवणं हेतुमाश्रित्य भवादिभूतपरिवेष्टितस्य जीवस्य रंहणमुक्तम्। तदयुक्तम्। स्वर्गादवरोहतां जीवानां कर्माभावेन तत्समवेतानामपामप्यभावादित्याक्षेपसंगत्येदमाह— स. शि. वृ.

उत सानुशयाः ? इति । संपतन्त्यस्माल्लोकादमुं लोकं फलोपभोगायेति संपातशब्देन कर्माशयग्रहणात् , ' यावत् ' इति विशेषणाच्च सर्वकर्मफलोपभोगावगमात् . निरनुशया इति प्राप्ते—

सिद्धान्तः— कृतात्यय इति । कृतस्य—इष्टादेः फलोपभोगेनोपक्षये सति सानुशया एवेममवरोहन्ति । कुतः ? ' दृष्टस्मृतिभ्याम् '— ' तद्य इह रमणीयचरणाः ' (छा. ५-१०-७) इत्यादिप्रत्यक्षश्रुतिः दृष्टशब्देनोच्यते । स्मृतिशब्देन ' वर्णा आश्रमाश्च स्वकर्मनिष्ठाः प्रेत्यकर्मफलमनुभूय ततः शेषेण विशिष्टदेशजातिकुलरूपायुःश्रुतवृत्तविचित्रमेधसो जन्म प्रतिपद्यन्ते ' (गौ. ध. सू) इत्यादिका । अनुशयशब्देन आमुष्मिकफलकर्मजाते उपभुक्ते अवशिष्टमैहिकफलं कर्मजातमुच्यते, न तु फलोपभोगाय प्रारब्धफलामुष्मिककर्मलेशः । यावत्संपातश्रुतिरपि प्रारब्धफलामुष्मिकविषयतया सङ्कुचितवृत्तिर्व्याख्येया । न हि यावन्तः संपाताः, यावतां वा पुंसां संपाताः, ते सर्वे तत्रेष्टादिकारिणां भोगेन क्षयं नीयन्ते, पुरुषान्तराश्रयाणां पुरुषान्तरोपभोगेन क्षयेऽतिप्रसङ्गात् । अशेषभुक्तानां कर्माशयानां चन्द्रमण्डलोपभोगेनापक्षयासंभवात् । एकस्य पुरुषस्य सर्वे संपाताश्च न चन्द्रमण्डलोपभोगेन क्षीयन्ते । तस्मादनुशयवन्तोऽवरोहन्ति ॥

अवरोहन्तः यथेतमनेवं चावरोहन्ति । यथेतं— यथागतमिति यावत् । अनेवमिति । तद्विपर्ययेणेत्यर्थः । धूमाकाशयोः पितृयाणेऽवन्युपात्तयोरवरोहे संकीर्तनात् यथेतंशब्दाच्च यथागतमिति प्रतीयते । रात्र्याद्यसंकीर्तनात् अभ्रद्युसंख्यानाच्च विपर्ययोऽपि प्रतीयते ॥ १ ॥

२. चरणादिति चेन्नोपलक्षणार्थेति कार्ष्णाजनिः ३-१-९

ननु रमणीयचरणाः ब्राह्मणादियोनिमापद्यन्ते कपूयचरणाः श्वादियोनिमिति श्रुतौ चरणशब्देनाचारः उच्यते, न कर्मानुशय इति

चेत्—न—यतः अनुशयलक्षणार्थो चरणश्रुतिरिति कार्ष्णाजिनिराचार्यो मन्यते ॥ २ ॥

३. आनर्थक्यमिति चेन्न तदपेक्षत्वात् ३-१-१०

ननु शीलवाचिनः चरणशब्दस्य किमिति लाक्षणिकानुशयार्थत्वमिष्यते ? साध्वसाधुरूपमेव शीलं योन्यापत्तिकारणं भवतु, अन्यथा शीलस्यानर्थक्यमेव स्यादिति चेत्— न—कुतः ? 'तदपेक्षत्वात्'—'आचारहीनं न पुनन्ति वेदाः' इति न्यायेनेष्टादिकर्मिणोऽपि तदपेक्षत्वात् न शीलस्यानर्थक्यमिति ॥ ३ ॥

४. सुकृतदुष्कृते एवेति तु बादरिः ३-१-११

बादरिस्त्वाचार्यः सुकृतदुष्कृते एव चरणशब्देन प्रत्याय्येते इति मन्यते । चरणं—अनुष्ठानं—कर्मेत्यनर्थान्तरम्, यत एव इष्टादिकारिणं 'धर्मं चरति' इति लौकिका आचक्षते ॥ ४ ॥

[इति कृतात्ययाधिकरणम्]

[३. अनिष्टादिकार्यधिकरणम्]

१. अनिष्टादिकारिणामपि च श्रुतम् ३-१-१२

* इष्टादिकारिण इवानिष्टादिकारिणश्चन्द्रमसं गच्छन्ति ? उत न ? इति संशये—पूर्ववाद्याह— इष्टादिकारिण एव चन्द्रमण्डलं गच्छन्तीत्येतन्न

* पूर्वं इष्टादिकारिण एव चन्द्रलोकं गच्छन्तीत्युक्तम्—तदयुक्तं—अनिष्टादिकारिणोऽपि गच्छन्तीत्याक्षेपसंगत्येदमाह—स.शि.वृ.

—यतोऽनिष्टादिकारिणामपि चन्द्रमण्डलं गन्तव्यत्वेन श्रुतम्—'ये वै के चास्माल्लोकात्प्रयन्ति चन्द्रमसमेव ते सर्वे गच्छन्ति' (कौ. १-२) इति कौषीतकिनामुपनिषदि ॥ १ ॥

तस्योत्तरम्—

२. संयमने त्वनुभूयेतरेषामारोहावरोहौ तद्गतिदर्शनात् ३-१-१३

तुशब्दः पक्षं व्यावर्तयति। अनिष्टादिकारिणः चन्द्रमसं न गच्छन्ति, तेषां तत्र भोगाभावात्। ते तु संयमनं यमालयमारुह्य स्वदुष्कर्मानुरूपं यामीर्यातना अनुभूय पुनरिमं लोकं अवरोहन्ति। कुतः? 'तद्गतिदर्शनात्'—पापिनां यमवश्यतायाः श्रुतौ दर्शनात् इति यावत्। 'न सांपरायः प्रतिभाति बालं प्रमाद्यन्तं वित्तमोहेन मूढम्। अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमापद्यते मे' (क. १-२-६) इति ॥

३. स्मरन्ति च ३-१-१४

अपि च मनुव्यासप्रभृतयः शिष्टाः संयमने यमायत्तं पूर्वकर्मविपाकं स्मरन्ति नाचिकेतोपाख्यानादिषु ॥ ३ ॥

४. अपि च सप्त ३-१-१५

अपि च सप्त नरकाः रौरवप्रमुखा दुष्कृतफलोपभोगाय तैरेव स्मर्यन्ते।ताननिष्टादिकारिणो गच्छन्ति ॥ ४ ॥

ननु न यमायत्ता यातनाः पापिनाम्, चित्रगुप्तादीनामपि तत्राधिष्ठातृत्वस्मरणात्—इति—नेत्याह—

५. तत्रापि च तद्व्यापारादविरोधः ३-१-१६

यमप्रयुक्तानां चित्रगुप्तानां सप्तसु नरकेषु व्यापाराङ्गीकाराद-विरोधः ॥ ५ ॥

६. विद्याकर्मणोरिति तु प्रकृतत्वात् ३-१-१७

इतश्च नानिष्टादिकारिणश्चन्द्रलोकं गच्छन्ति, यतः पञ्चाग्निविद्याया 'वेत्थ यथाऽसौ लोको न संपूर्यते' (छा. ५-३-३) इति प्रश्नोत्तरावसरे 'अथैतयोः पथोर्न कतरेण च न तानीमानि भूतानि क्षुद्राण्यसकृदावर्तीनि भवन्ति' (छा. ५-१०-८) इत्यत्र 'अथैतयोः' इति विद्याकर्मणोरित्यर्थः। कुतः ? 'प्रकृतत्वात्'। तस्मात् तेन विद्यासाधनेन ये देवयाने पथ्य-धिकृताः, नापि कर्मणा पितृयाणे, तेषामेष क्षुद्रजन्तुलक्षणोऽसकृदावर्ती तृतीयः पन्था भवतीति सिद्धम्। 'तु' शब्दः शाखान्तरीयवाक्यजन्याशेषगम-नाशङ्कामुच्छिनत्ति, ये के चास्मादधिकृताः प्रयान्ति, चन्द्रमसमेव ते सर्वे गच्छन्तीति, तत्रापि सर्वशब्दस्याधिकृतविषयत्वात् ॥ ६ ॥

ननु एवमप्यनिष्टादिकारिणो देहलाभाय चन्द्रमसं गन्तुमर्हन्ति, 'पञ्चम्यामाहुतौ' इति आहुतिसंख्यानियमात्। तत्राह—

७. न तृतीये तथोपलब्धेः ३-१-१८

न तृतीये स्थाने देहलाभाय पञ्चसंख्यानियमः आहुतीनामादर्तव्यः। कुतः ? 'तथोपलब्धेः'—'जायस्व म्रियस्वेत्येतत् तृतीयं स्थानम्' (छा. ५-१०-८) इति ॥ ७ ॥

८. स्मर्यतेऽपि च लोके ३-१-१९

अपि च स्मर्यते लोके द्रोणधृष्टद्युम्नप्रभृतीनां सीताद्रौपदीप्रभृतीनां चायोनिजत्वम्। तत्र द्रौपदीनां योषिद्विषयैकाहुतिर्नास्ति। धृष्टद्युम्ना-

दीनां योषित्पुरुषविषये द्वे आहुती न स्तः । यथा च तत्राहुतिसंख्याऽनियमः एवमन्यत्रापि भविष्यति ॥ ८ ॥

९. दर्शनाच्च ३-१-२०

अपि च चतुर्विधभूतग्रामे स्वेदजोद्भिज्जयोरन्तरेणैव ग्राम्यधर्ममुत्पत्तिदर्शनात् यथाऽऽहुतिसंख्याऽनियमः, एवमन्यत्रापि भवति ॥ ९ ॥

ननु 'तेषां' खल्वेषां त्रीण्येव बीजानि भवन्ति' (छा. ६-३-१) इति त्रित्वमेव भूतग्रामस्यावगतम्, न चातुर्विध्यम् । तत्राह—

१०. तृतीयशब्दावरोधः संशोकजस्य ३-१-२१

'आण्डजं स्वेदजमुद्भिज्जम्' (छा. ६-३-१) इत्यत्र तृतीयेन—उद्भिज्जशब्देनैव स्वेदजोऽपि संगृहीत इत्यविरोधः ॥ १० ॥

[इति अनिष्टादिकार्यधिकरणम्]

[४. साभाव्यापत्त्यधिकरणम्]

१. साभाव्यापत्तिरुपपत्तेः ३-१-२२

* इष्टादिकारिणां चन्द्रमसं प्राप्तानां अवरोहप्रकारः परीक्ष्यते ॥

---

* पूर्वं तृतीयं स्थानमिति स्थानशब्दस्य मार्गद्वयोपक्रमसामर्थ्यात् तृतीयमार्गोपलक्षकत्वमुक्तम् । न तथेह भवति श्रुतेः सादृश्यलक्षकत्वम्, तत्र मानाभावादिति प्रत्युदाहरणसंगत्येदमाह—स·शि·वृ.

'अथैतमेवाध्वानं पुनर्निवर्तन्ते यथैतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति' (छा. ५-१०-५) इति श्रूयते। तत्र संशयः—किमाकाशादिस्वरूपमेवावरोहन्तः प्रतिपद्यन्ते? उताकाशादिसाम्यम्? इति?॥

तत्र 'वायुर्भूत्वा' इत्यादिना स्फुटतरं तादात्म्यावगमात्, 'आकाशं' इत्येतदपि तादात्म्यपरमिति प्राप्ते—

तत्रोच्यते—साभाव्यापत्तिरिति। समानः भावः—रूपं येषां, ते सभावाः; तेषां भावः साभाव्यम्—सारूप्यं—सादृश्यमिति यावत्। तदापत्तिः—साभाव्यापत्तिः। कुतः? 'उपपत्तेः'—एवं ह्येतदुपपद्यते। न ह्यन्यस्यान्यभावो मुख्य उपपद्यते॥ १॥

[इति साभाव्यापत्त्यधिकरणम्]

[५. नातिचिराधिकरणम्]

१. नातिचिरेण विशेषात् ३-१-२३

*आकाशादिप्रतिपत्तौ व्रीह्यादिभावापत्तेः प्राक् संशयः—किं दीर्घं दीर्घं कालं पूर्वसादृश्येनावस्थाय उत्तरसादृश्यं गच्छन्ति? उताल्पमल्पं कालम्? इति। तत्र, अनियमः; नियमकारिणः शास्त्रस्याभावादिति प्राप्तौ—

इदमाह—अल्पमल्पं कालमाकाशादिभावेनावस्थाय वर्षधाराभिस्सहेमं लोकमापतन्ति। कुतः? 'विशेषात्'—विशेषदर्शनात्। तथा हि

---

* पूर्वमाकाशादिषु वर्षान्तेषु पूर्वपूर्वसादृश्यमित्युक्तम्। तदुपजीव्य अन्यद्विचार्यते—स.शि.वृ.

व्रीह्यादिभावापत्तेरनन्तरं विशिनष्टि—'अतो वै खलु दुर्निष्प्रपतरम्' (छा. ५-१०-६) इति। तस्मात् व्रीह्यादिभावापत्तेः प्रागल्पेनैव कालेनावरोहः सिद्ध्यति ॥ १ ॥

[इति नातिचिराधिकरणम्]

[७. अन्याधिष्ठिताधिकरणम्]

१. अन्याधिष्ठिते पूर्ववदभिलापात् ३-१-२४

* 'त इह व्रीहियवा ओषधिवनस्पतयस्तिलमाषा इति जायन्ते' (छा. ५-१०-६) इति श्रूयते। किं तेषां सुखदुःखभोगाय स्थावरतादात्म्यापत्तिः? उत तत्संश्लेषमात्रम्? इति संशयः। तत्र जनेर्मुख्यत्वात् स्थावरजात्यापन्नाः सुखदुःखभाजोऽनुशयिनो भवेयुरिति प्राप्ते—

इदमुच्यते—अन्यैर्जीवैरधिष्ठितेषु व्रीह्यादिषु सङ्गमात्रमनुशयिनः प्रतिपद्यन्ते, न तत्र सुखदुःखभाजो भवन्ति। 'पूर्ववत्'—यथा धूमादिभावे संश्लेषमात्रम्, तथा व्रीह्यादिभावेऽपीति यावत्। कुतः? 'अभिलापात्'—धूमादाविवात्रापि कर्मव्यापारमन्तरेणाभिलापादित्यर्थः। जनेर्न मुख्यार्थत्वमिह विवक्षितम् ॥ १ ॥

२. अशुद्धमिति चेन्न शब्दात् ३-१-२५

पशुहिंसायोगादशुद्धमाध्वरिकमिति इष्टादिकारिणः तत्फलोपभोगाय व्रीह्यादिरूपं जन्म प्रतिपद्यन्त इति चेत्—न—न हि पशुहिंसोच्छिष्टसोम-

---

* पूर्वं दुर्निष्प्रपतरशब्दस्य चिरकालावस्थानलक्षकत्वेपि, प्रकृते व्रीह्यादिभावेन 'जायन्ते' इति जीवजन्मश्रुतेः मुख्यत्वसंभव इति प्रत्युदाहरणसंगत्येदमाह —स.शि.वृ.

पानादियोगात् इष्टादेः कर्मणोऽशुद्धत्वम् । कुतः ? 'शब्दात्'—शास्त्रमूलत्वादिति यावत् । इह च 'न हिंस्यात्सर्वा भूतानि' इत्यादेः शास्त्रस्य, रागतः प्राप्तहिंसादेर्यच्छ्रेयस्साधनत्वं, तदेव निषेध्यमिति पुरुषार्थरूपाया एव निषेधः, न तु 'अग्नीषोमीयं पशुमालभेत' इति क्रत्वर्थाया हिंसायाः । तस्मादिष्टादेः केवलं धर्मत्वात् नेष्टादिकारिणामनुशयिनां दुःखोपभोगाय स्थावरजन्मापत्तिः ॥ २ ॥

३. रेतस्सिग्योगोऽथ ३-१-२६

इतश्च व्रीह्यादिसंश्लेषमात्रं तद्भावः. यत्कारणं व्रीह्यादिभावानन्तरं अनुशयिनां रेतस्सिग्भाव आम्नायते— 'यो यो ह्यन्नमत्ति यो रेतः सिञ्चति तद्भूय एव भवति' (छा. ५-१०-६) इति । न चात्र रेतस्सिग्भावः मुख्यः संभवति । सद्योजातो हि बालः न रेतस्सिग्भवति, अपि तु चिरजातः प्रौढयौवनः । तस्मात् रेतस्सिग्भाववत् व्रीह्यादिभावोऽपि संसर्गमात्रमनुशयिनाम् ॥

तत्किमिदानीमनुशयिनः सर्वत्र संसर्गमात्रम् । तथा च 'रमणीयचरणाः' इत्यादिषु तथाभाव आपद्येत—

४. योनेः शरीरम् ३-१-२७

रेतस्सिग्भावानन्तरं योनौ निषिक्ते रेतसि योनेरधिशरीरमनुशयिनोऽनुशयफलोपभोगाय जायत इत्याह शास्त्रम्—'तद्य इह रमणीयचरणाः' (छा. ५-१०-७) इत्यादि । तस्मादध्यवगम्यते अवरोहणावसरे व्रीह्यादि-

भावे शरीराभावात् न भोग इति। तस्माद्व्रीह्यादिसंश्लेषमात्रमनुशयिनां तज्जन्मेति सिद्धम् ॥ ४ ॥

[इति अन्याधिष्ठिताधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

तृतीयाध्यायस्य

प्रथमः पादः

तृतीयाध्यायस्य

द्वितीयः पादः

[१. सन्ध्याधिकरणम्]

१. सन्ध्ये सृष्टिराह हि ३-२-३

अतीते पादे कर्मफलस्य यातायातरूपत्वेन वैराग्यं निरूपितम्। इदानीं विरक्तस्य तत्त्वंपदार्थविवेकाय द्वितीयः पाद आरभ्यते ॥

तत्रापि 'न स्थानतोऽपि' (ब्र. सू. ३-२-११) इत्यतः प्राक् त्वंपदार्थो विचार्यते। तत आरभ्य तत्पदार्थः ॥

* प्रथमाधिकरणे च तस्य संसारिणः स्वयंज्योतिष्ट्वसिद्धयेऽवस्थाभेदश्चिन्त्यते ॥

स्वप्नावस्थायां 'अथ रथान् रथयोगान् पथः सृजते' (बृ. ४-३-१०) इति रथादिसृष्टिराम्नायते। रथे युज्यन्त इति रथयोगाः अश्वाः। किमियं सृष्टिः पारमार्थिकी? उत मायामयी? इति संशये—

पूर्वपक्षमाह—सन्ध्य इति। अस्मिन् सन्ध्ये स्थाने तथ्यरूपैव सृष्टिर्भवितुमर्हति। कुतः? 'हि'—यतः प्रमाणात् श्रुतिः 'अथ रथान्' इत्यादिः एवमाह ॥ १ ॥

---

* पूर्वं गत्यागतिचिन्तया जाग्रदवस्था निरूपिता। तदनन्तरं त्वंपदार्थस्य स्वयंज्योतिष्ट्वसिद्धये स्वप्नावस्थां निरूपयितुमिदमाह—स. शि. वृ.

२. निर्मातारं चैके पुत्रादयश्च ३ २ २

अपि चैके शाखिनः अस्मिन्नेव सन्ध्ये स्थाने कामानां निर्मातारमामनन्ति—'य एष सुप्तेषु जागर्ति कामं कामं पुरुषो निर्मिमाणः' (क. २-२-८) इति। अत्र पुत्रादयश्च कामा अभिप्रेयन्ते। काम्यन्त इति कामाः। 'शतायुषः पुत्रपौत्रान् वृणीष्व' (क. १-१-२३) इति प्रकृत्य, अन्ते 'कामानां त्वा कामभाजं करोमि' (क. १-१-२४) इति पुत्रादिषु कामशब्दश्रवणात्। तस्मात् पारमार्थिकी सन्ध्ये सृष्टिरिति ॥२॥

अत्राह सिद्धान्ती—

३. मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात् ३-२-३

'तु' शब्दः सन्ध्ये सृष्टिः पारमार्थिकीति पक्षं व्यावर्तयति। मायैव सन्ध्ये सृष्टिः, न परमार्थगन्धोऽस्ति। कुतः? 'कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्'—न हि कार्त्स्न्येन—परमार्थवस्तुधर्मेण भिव्यक्तः स्वप्नः। कार्त्स्न्यं नाम देशकालनिमित्तसंपत्तिः. अबाधश्च स्वप्ने संभाव्यते। संवृते देहदेशे रथादीनामुचितदेशासंभवात्। रजन्यां सुप्तो वासरं भारतवर्षे मन्यते। करणोपसंहारान्निमित्तान्यपि स्वप्ने न विद्यन्ते। प्रबोधे रथादिबाधदर्शनाच्च। तस्मात् मायामात्रं स्वप्नदर्शनम् ॥ ३ ॥

४. सूचकश्च हि श्रुतेराचक्षते च तद्विदः ३-२-४

मायामात्रत्वात् तर्हि न कश्चित्स्वप्ने परमार्थगन्ध इति चोद्यस्योत्तरमिदं सूत्रम्। सूचकश्च हि स्वप्नो भवति भविष्यतः साध्वसाधुनोः। तथा च श्रूयते—'यदा कर्मसु काम्येषु स्त्रियं स्वप्नेषु पश्यति। समृद्धिं तत्र जानीयात्तस्मिन् स्वप्ननिदर्शने' (छा. ५-२-६) इति। तथा 'पुरुषं कृष्णं कृष्णदन्तं पश्यति स एनं हन्ति' इति। आचक्षते च स्वप्नाध्याय-

विदः—'कुञ्जरारोहणादीनि धन्यानि स्वप्ने खरारोहणादीन्यधन्यानि' इति शुभाशुभफलहेतुत्वं स्वप्नस्याचक्षते। मिथ्याभूतस्यापि सूचकत्वान्मायामात्रत्वमविरुद्धम् ॥

एवञ्च 'आह हि' इति यदुक्तं, तत् भाक्तं व्याख्येयम्, 'लाङ्गलं जीवनम्' इतिवत् ॥

किञ्च, 'न तत्र रथा न पन्थानः' (बृ. ४-३-१०) इति आत्मनः स्वयंज्योतिष्ट्वनिर्णयाय रथाद्यभाव एव श्रुत्या निरूपितः। अन्यथा विषयेन्द्रियसंयोगादित्यादिज्योतिर्व्यतिकराच्च जागरिते स्वयंज्योतिष्ट्वं न निर्णीतं स्यात् ॥

निर्माणश्रवणमप्येवमेव व्याख्येयमिति ॥

'य एष सुप्तेषु जागर्ति' (क. २-२-८) इति प्रतिबुद्धजीवस्यैव कामनिर्मातृत्वश्रवणात् न प्राज्ञकर्तृका रथादिसृष्टिः, येन पारमार्थिकत्वशङ्का स्यात्। 'तदेव शुक्रं तद्ब्रह्म' (क. २-२-८) इति अनन्तरमेव तस्य ब्रह्मभावोपदेशाच्च ब्रह्मप्रकरणत्वं न विरुध्यते ॥ ४ ॥

ननु जीवपरमात्मनोरंशांशिभाववत् अग्निविस्फुलिङ्गयोरिव दहनप्रकाशयोः समत्ववत् ज्ञानैश्वर्यादीनां तात्त्विकी रथादिसृष्टिर्भवतीति—नेत्याह—

५. पराभिध्यानात्तु तिरोहितं ततो ह्यस्य बन्धविपर्ययौ ३-२-५

ब्रह्मांशत्वेऽपि जीवस्य न समानधर्मत्वम्। विद्यमानस्याप्यविद्यादिव्यवधानात् तिरोहितमपि तत् कस्यचिदीश्वरध्यानात् पुण्यपरिपाकात् ध्वान्तविगमे ह्याविर्भवति। ततो हीश्वराद्धेतोः अस्य बन्धमोक्षौ भवतः ॥ ५ ॥

परमात्मांशत्वेऽपि जीवस्य तिरोहितज्ञानादिशक्तित्वे हेतुमाह—

६. देहयोगाद्वा सोऽपि ३-२-६

जीवस्य ज्ञानैश्वर्यतिरोभावोऽपि देहयोगात्— देहेन्द्रियमनोबुद्धिविषयवेदनादियोगादिति ॥ ६ ॥

[इति सन्ध्याधिकरणम्]

——o——

[२· तदभावाधिकरणम्]

१. तदभावो नाडिषु तच्छ्रुतेरात्मनि च ३-२-७

*इदानीं सुषुप्त्यवस्था परीक्ष्यते। क्वचिन्नाडीमनुक्रम्य 'आसु तदा संपन्नो भवति' (छा. ८-६-३) इति श्रूयते। अन्यत्र नाडीरेवानुक्रम्य 'ताभिः प्रत्यवसृप्य पुरीतति शेते' (बृ. २-१-१९) इति श्रूयते। तथाऽन्यत्र 'सता सौम्य तदा संपन्नो भवति' (छा. ६-८-१) इति पठ्यते। इह हि नाडीपुरीततपरमात्मानः जीवस्य सुषुप्त्यवस्थायां स्थानत्वेन श्रूयन्ते। तत्किमेषां स्थानानां विकल्पः? आहोस्वित् समुच्चयः? इति संशयः॥

किं तावत्प्राप्तम्? विकल्प इति। कुतः? एकार्थत्वात्। न ह्येकार्थानां क्वचित् परस्परापेक्षत्वं दृश्यते व्रीहियवादीनाम् इति प्राप्ते—

---

*इत्थं बाह्यकरणोःपरमरूपं स्वप्नं जीवस्य रूपं योनिष्ठार्थं विचार्य, अन्तःकरणोपरमरूपां सुषुप्तिं प्रतियोग्यनुयोगिभावसंगत्या विचारयति—स· शि. वृ.

प्रतिपद्यते—तदभाव इति । 'तदभावः'—तस्य—प्रकृतस्य स्वप्नदर्शनस्य अभावः—सुषुप्तमित्यर्थः । 'नाडीषु', 'आत्मनि च' इति, चकारात् पुरीतति च—समुच्चयेन तानि नाड्यादीनि, न विकल्पेनेत्यर्थः । कुतः ? 'तच्छ्रुतेः'—'तासु तदा भवति, यदा सुप्तः स्वप्नं न कञ्चन पश्यति अथास्मिन् प्राण एवैकधा भवति' (कौ. ४-१९) इति समुच्चयं नाडीनां प्राणस्य च सुप्तौ श्रावयति श्रुतिः । प्राणस्य च ब्रह्मत्वं 'प्राणस्तथाऽनुगमात्' (ब्र. सू. १-१-२८) इत्यत्रावगतम् । विकल्पे ह्येषां पक्षे बाधः स्यात् ॥

यदुक्तं—एकार्थत्वात् व्रीहियवादिवत् विकल्प इति—तन्न—एकविभक्तिनिर्देशमात्रेणैकार्थत्वविकल्पयोरसंभवात् । 'प्रासादे शेते' 'पर्यङ्के शेते' इत्येवमादिषु अनेकार्थत्वसमुच्चययोरपि एकविभक्तिनिर्देशदर्शनात् ॥

किञ्च 'पुरीतति शेते' इति पुरीतत्पदेन हृदयपरिवेष्टनावगमात् तदन्तर्वर्तिनि हृदयाकाशे वर्तमानो जीवः तस्मिन् शेत इत्युच्यते । हृदयाकाशस्य दहराधिकरणे ब्रह्मत्वमुक्तम् । 'प्राज्ञेनात्मना संपरिष्वक्तो न बाह्यं किञ्चन वेद नान्तरम्' (बृ. ४-३-२१) 'सता सौम्य तदा संपन्नो भवति' (छा. ६-८-१) इति सत्प्राज्ञयोश्च ब्रह्मत्वं प्रसिद्धम् ॥

एवं एतासु श्रुतिषु त्रीण्येव सुप्तिस्थानानि संकीर्तितानि— नाड्यः, पुरीतत्, ब्रह्म चेति । तत्रापि द्वारमात्रं नाड्यः, पुरीतच्च, ब्रह्मैवैकं सुषुप्तिस्थानमिति सिद्धम् ॥

पूर्वपक्षे तु नाड्यादीनामपि सुषुप्तिस्थानत्वेन मिथ्याज्ञाननिवृत्तावपि ब्रह्मभावासंभवेन मूलाज्ञाननिवृत्तावपि न ब्रह्मभावो जीवस्य श्रुत्योच्येतेति ब्रह्मात्मभावमोक्षफलाय कर्मैव साधनं भवेदिति । समुच्चपक्षे तु परमात्मैव नाडीपुरीतद्द्वारा सुप्तिस्थानमिति सुप्तौ विपरीतज्ञाननिवृत्त्या जीवस्य ब्रह्मात्म-

भावः सिद्धो भवति। मूलाविद्यायाश्चानिवृत्तत्वात् पुनरुत्थानदर्शनात्, तन्निवृत्तये ब्रह्मात्मैक्यज्ञानमेव साधनं भवेत्, न कर्मेति फलं सिद्ध्यति ॥१॥

२. अतः प्रबोधोऽस्मात् ३-२-८

यस्मात् ब्रह्मैव सुप्तिस्थानं, अत एव च कारणात्तद्वत् अस्मादात्मनः प्रबोधः स्वापाधिकारे आम्नायते 'यथाऽग्नेः क्षुद्रा विस्फुलिङ्गा व्युच्चरन्ति एवमेवैतस्मात् प्राणाः' (बृ. २-१-२०) इत्यादिषु ॥ २ ॥

[इति तदभावाधिकरणम्]

——०——

[३. कर्मानुस्मृतिशब्दविध्यधिकरणम्]

१. स एव तु कर्मानुस्मृतिशब्दविधिभ्यः ३-२-९

*किं य एव सति संपन्नः, स एव प्रबुध्यते? उत स वाऽन्यो वा? इति संशये—जलराशिप्रक्षिप्तजलबिन्दूद्धरणवत् स एव प्रतिबुध्यत इति वक्तुमशक्यमिति प्राप्ते—

सिद्धान्तः—स एव तु जीवः प्रतिबुध्यते, नान्यः। कुतः? 'कर्मानुस्मृतिशब्दविधिभ्यः'। पूर्वं कृतस्य कर्मणः शेषानुष्ठानं सुप्तोत्थिते दृश्यते। पूर्वेद्युरद्राक्षमिति स्मरणं च। 'सर्वाः प्रजा अहरहः' (छा. ८-३-२) इत्यादि शब्दः स्वस्यैवोत्थानं दर्शयति। अन्योत्थाने

*पूर्वं सुषुप्त्यन्ते परमात्मनःसकाशात् जीवोत्थानश्रुतेः परमात्मैव सुषुप्तिस्थानमित्युक्तमयुक्तम्, सुप्तादन्यस्य प्रबोधसंभवेन सुप्तस्य नाड्यादिस्थानत्वासंभवादित्याक्षेपसंगत्येदमाह—स.शि.वृ.

कृतनाशाकृताभ्यागमप्रसङ्गात् कर्मविद्याविधयोऽनर्थकाः स्युः। तस्मात् स एव प्रतिबुध्यत इति। कर्मविद्यादिविवेककारणसंभवात् जलबिन्दुवैषम्यं च ॥

किञ्च जीवो नाम कश्चित् परस्मादन्यो न विद्यते, यो जलबिन्दुरिव जलराशेः सतो विविच्येत। सदेव तूपाधिसंपर्कात् जीव इत्युपवर्ण्यत इत्य कृत् प्रपञ्चितम्। एवञ्च सति यावदेकोपाधिगता बन्धानुवृत्तिः, तावदेकजीवव्यवहारः। उपाध्यन्तरगतायां तु बन्धानुवृत्तौ जीवान्तरव्यवहारः। स एव चायमुपाधिः स्वापप्रबोधयोः बीजाङ्कुरन्यायेनेति। अतः स एव प्रतिबुध्यत इति युक्तम् ॥ १ ॥

[इति कर्मानुस्मृतिशब्दविध्यधिकरणम्]

[४. मुग्धेऽर्धसंपत्त्यधिकरणम्]

१. मुग्धेऽर्धसंपत्तिः परिशेषात् ३-२-१०

* मूर्छावस्था जाग्रदादिभ्यो भिन्ना किम्? न वा? इति संशये—लौकप्रसिद्ध्यभावात् न पञ्चमी काचिदवस्था जाग्रदादिभ्यो भिन्नेति प्राप्ते—

सूत्रमिदं पठितम्—मूर्छावस्थां संपन्नो मुग्ध इत्युच्यते। तस्मिन् अर्धसंपत्तिः। कुतः? परिशेषात्। इन्द्रियैर्विषयानिरीक्षणात् न जागरितावस्था। निस्संज्ञकत्वान्न स्वप्नान् पश्यति। प्राणोष्मणोर्भावात् न मृतः। नापि सुप्तः, वेपथुसद्भावात् प्रसन्नवदनत्वाभावाच्च ॥

* पूर्वं सोऽहमितिप्रत्यभिज्ञानात् सुषुप्तप्रतिबुद्धैक्यमुक्तम्। तद्वद्विशेषाभावं मत्यभिज्ञानात् सुषुप्तिरेव मूर्छेति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

यदा चावस्थाऽङ्गं तदा त....ति । विलयाय प्रयत्नान्तरमास्थेयम् । अभेदे तु न यत्नान्तरमिति चिन्ताप्रयोजनम् ।। १ ।।

[इति मुग्धेऽर्धसंपत्त्यधिकरणम्]

[५. उभयलिङ्गाधिकरणम्]

१. न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि ३-२-११

*उपाध्युपशमात् सत्संपत्तिर्जीवस्योक्ता । किं तत्सत्पदं ब्रह्म सविशेषनिर्विशेषात्मकम् ? उत सविशेषम् ? आहोस्वित् निर्विशेषम् ? इतीदानीं चिन्त्यते ?

तत्र 'सर्वकर्मा सर्वगन्धः सर्वरसः' (छा. ३-१४-२) इति सविशेषलिङ्गात्, 'अस्थूलमनण्वह्रस्वम्' (बृ. ३-८८) इति निर्विशेषलिङ्गाच्चोभयात्मकं ब्रह्म । उभयरूपत्वानुपपत्तेः सविशेषं वा—इति प्राप्ते—

सूत्रमिदं पठितम्—न स्थानतोऽपीति । न तावत् स्थानतः—उपाधियोगात् उभयरूपत्वं ब्रह्मणः । न ह्यलक्तकादियोगात् स्वच्छे स्फटिके रक्ततादिबुद्धिरभ्रान्ता भवति । नापि स्वत उभयात्मकत्वं ब्रह्मणः, विरोधात् । न च सविशेषं ब्रह्म, सर्वत्र हि ब्रह्मप्रतिपादकवाक्येषु

---

* इत्थं चतुर्भिरधिकरणैः उद्देश्यत्वेन प्रथमं जिज्ञास्यं त्वंपदार्थं संशोध्य तज्जिज्ञासोपरमानन्तरं अवसरसंगत्या विधेयत्वेन जिज्ञास्यं तत्पदार्थं बोधयितुं पादशेषमारभमाणः मूर्छावस्थायाः विरुद्धसुषुप्तिमरणावस्थोभयधर्मवत्त्ववत् ब्रह्मणोऽप्युभयरूपत्वं भवत्विति दृष्टान्तावान्तरसंगत्येदमाह—स. शि. वृ.

'अशब्दमस्पर्शमरूपमव्ययम्' (क. १-३-१५) इति सर्वविशेषनिराकरणात् ॥ १ ॥

२. न भेदादिति चेन्न प्रत्येकमतद्वचनात् ३–२–१२

प्रतिबिंबं 'षोडशकलं ब्रह्म' 'त्रैलोक्यशरीरं ब्रह्म' इत्याकारभेदात् सविशेषं ब्रह्मोभयलिङ्गमिति चेत्—न—कुतः? कस्मात्? प्रत्युपाधिभेदं अभेदमेव श्रावयति शास्त्रम्। 'यश्चायमस्यां पृथिव्यां तेजोमयः' (बृ. २-५-१) इत्यादीनां श्रुतीनां ब्रह्मैकत्वप्रतिपादनपरत्वात् ॥ २ ॥

३. अपि चैवमेके ४–२–१३

अपि च एके शाखिनः भेदनिन्दापूर्वकमभेदमेव प्रतिपादयन्ति। 'मनसैवेदमाप्तव्यं नेहनानास्ति किञ्चन। मृत्योस्स मृत्युमाप्नोति य इह नानेव पश्यति' (क. २-१-१२) इति ॥ ३ ॥

ननु कथं निराकारमेव ब्रह्म?, सविशेषब्रह्मवचनानां बहुलमुपलंभात्? अत आह—

४. अरूपवदेव हि तत्प्रधानत्वात् ३–२–१४

रूपाद्यनाकारमेव हि ब्रह्मावधारयितव्यम्, न रूपादिमत्। कुतः? 'तत्प्रधानत्वात्'—'अस्थूलमनण्वह्रस्वमदीर्घम्' (बृ- ३-८-८) इत्यादिषु निर्गुणप्रधानत्वात् निर्गुणब्रह्मपरत्वेऽपि कासांचिच्छ्रुतीनां असति विरोधे सगुणोपासनापरत्वम् ॥ ४ ॥

का तर्ह्याकारोपदेशस्य गतिः ? इति ; तामाह—

५. *प्रकाशवच्चावैयर्थ्यम् ३-२-१५

यथा सूर्यादिप्रकाशः अङ्गुल्यादिसम्बन्धात् वक्रादिभावं प्रतिपद्यते, एवं ब्रह्मापि पृथिव्याद्युपाधियोगात् तदाकारमिव प्रतिपद्यते । तदालम्बनेनोपासनार्थमाकारवद्ब्रह्मोपदेशस्य न वैयर्थ्यम् ।। ५ ।।

६. आह च तन्मात्रम् ३-२-१६

आह च श्रुतिः विलक्षणरूपान्तररहितं चैतन्यमात्रं ब्रह्म—'स यथा सैन्धवघनः' (बृ. ४-५-१३) इत्यादिः ।। ६ ।।

७. दर्शयति चाथो अपि स्मर्यते ३-२-१७

दर्शयति च श्रुतिः परप्रतिषेधेनैव ब्रह्म—'अथात आदेशो नेति नेति' (बृ. २-३-६) इति, 'अन्यदेव तद्विदितात् अतोऽविदितादधि' (के. १-३) इत्येवमादयः । तथा स्मृतिष्वपि परप्रतिषेधेनोपदिश्यते—'ज्ञेयं यत्तत्प्रवक्ष्यामि यज्ज्ञात्वाऽमृतमश्नुते । अनादिमत्परं ब्रह्म न सत्तन्नासदुच्यते' (गी. १३-१२) इत्यादिषु ।। ७ ।।

८. अत एव चोपमा सूर्यकादिवत् ३-२-१७

यत एव चायमात्मा निर्विशेषः चैतन्यमात्रस्वरूपः, अत एव 'जलसूर्यकादिवत्' इत्युपमाऽपि दीयते । 'यथा ह्ययं ज्योतिरात्मा विवस्वान् अपो भिन्ना बहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपः देवः क्षेत्रेष्वेवमजोऽयमात्मा' (ब्र. बि. १२) इत्येवमादिषु ।। ८ ।।

---

* 'प्रकाशवच्चावैयर्थ्यात्' इति कुत्रचित्पाठः

७. प्रकाशाश्रयवद्वा तेजस्त्वात् ३–२–२८

अथवा यथा प्रकाशस्य तदाश्रयसूर्यस्य च भेदः, तेजस्त्वाविशेषादभेदः, एवमिहापीति ॥ २ ॥

७. पूर्ववद्वा ३–२–२५

उपन्यस्तं मतं दूषयति । यथा पूर्वमुपन्यस्तं—'प्रकाशादिवच्चावैशेष्यम्' इति । तद्वदात्मन्यपि द्रष्टव्यमिति ॥ ३ ॥

९. प्रतिषेधाच्च ३–२–३०

नान्योऽतोऽस्ति द्रष्टा' (बृ. ३-७-२३) इति परस्मादात्मनः अन्यस्य प्रतिषेधाच्चाभेद एव परमार्थः । 'अथात आदेशो नेति नेति' (बृ. २-३ ६) इत्यादौ ब्रह्ममात्रस्य परिशेषाच्चायमेव सिद्धान्तः ॥ ४ ॥

[इति प्रकृतैतावत्त्वाधिकरणम्]

[७. पराधिकरणम्]

१. परमतः सेतून्मानसम्बन्धभेदव्यपदेशेभ्यः ३–२–३१

* एवं निरूपिताद्वयब्रह्मणोऽन्यत् तत्त्वमस्ति ? किं वा नास्ति ? इति संशये—पूर्ववाद्याह—परं अतः अन्यत् तत्त्वं ब्रह्मणो भवितुमर्हति । कुतः?

---

* पूर्वं 'नेति नेति' इति ब्रह्मातिरिक्तं वस्तु निषेध्यमित्युक्तम् ; ब्रह्मणः सेतुत्वोन्मानादिव्यपदेशेन वस्त्वन्तरसत्त्वावगमात् — इत्याक्षेपसंगत्येदमाह—

स. शि. बृ.

सेतून्मानसम्बन्धभेदव्यपदेशेभ्यो हेतुभ्यः ।। [' य आत्मा स सेतुर्विधृतिः ' (छा, ८-४-१) इति लौकिकसेतुत्वमात्मन उक्त्वा ' सेतुं तीर्त्वा ' (छा. ८-४-२) इति प्रयोगात् आत्मानमन्यं असेतुं प्राप्नोतीत्यवगम्यते ।।

' तदेतद्ब्रह्म चतुष्पात् ' (छा. ३-१८-२) इत्यादावुन्मानत्वावगमात् कार्षापणादेरिव अन्यद्ब्रह्मणो वस्त्ववगम्यते ।।

' सता सौम्य तदा संपन्नो भवति ' (छा. ६-८-१) इत्यादौ जीवप्राज्ञयोर्मितयोः सम्बन्धदर्शनात् अन्यदपरिमितं तत्त्वमस्तीति गम्यते ।।

' य एषोऽन्तरादित्ये ' (छा १-६-६) इत्यादौ भेदेनेश्वरद्वयसंकीर्तनात् ब्रह्मणोऽन्यत्तत्त्वमस्तीति गम्यत इति ।। १ ।।

अत्राह सिद्धान्ती—

२. समान्यात्तु ३–२–३२

' तु ' शब्दः चोदितां प्राप्तिं निराकरोति । ' एकमेवाद्वितीयम् ' (छा. ६-२-१) इत्यवधारणात् न ब्रह्मव्यतिरिक्तवस्तुसंभवः ।।

जगतो मर्यादासामान्यात् ब्रह्मणि सेतुशब्दः प्रयुक्तः । ' सेतुं तीर्त्वा ' इति तरतिरतिक्रमासंभवात् प्राप्नोत्यर्थः । यथा व्याकरणं तीर्णः इति व्याकरणं प्राप्त इत्यर्थोऽवगम्यते ।। २ ।।

३. बुद्ध्यर्थः पादवत् ३–२–३३

उन्मानव्यपदेश उपासनार्थः । यथा मनआकाशयोः वागादयश्चत्वारः पादाः, तद्वत् ।। ३ ।।

४. स्थानविशेषात्प्रकाशादिवत् ३-२-३५

इह सम्बन्धभेदव्यपदेशयोरुत्तरम् । 'संपन्नो भवति' इति सम्बन्धव्यपदेशः स्थानविशेषात्—उपाधिभेदापेक्षया उपचर्यते, न स्वरूपभेदापेक्षया । यथा सूचीपाशाद्युपाध्युपगमे तद्गतप्रकाशसम्बन्धः, तद्वदेव भेदव्यपदेशोऽपि द्रष्टव्यः ॥ ४ ॥

५. उपपत्तेश्च ३-२-३६

उपाधिकृततिरोभावे तु 'स्वमपीतो भवति' (छा. ६-८-१) इत्युपपद्यते, अन्यथा स्वरूपमपेयात् । न हि तद्युक्तम् । बहुतरश्रुतिसिद्धैकेश्वरविरोधात् भेदव्यपदेशोऽपि नान्यादृशः संभवति ॥ ५ ॥

६. तथाऽन्यप्रतिषेधात् ३-२-३६

तथा अन्यप्रतिषेधादपि न ब्रह्मणः परं वस्त्वन्तरमस्तीति गम्यते । 'स एवाधस्तात्' (छा. ७-२५-१) 'अहमेवाधस्तात्' (छा. ७-२५-१) 'आत्मैवाधस्तात्' (छा. ७-२५-२) 'सर्वं तं परादाद्योऽन्यत्रात्मनः सर्वं वेद' (बृ. २-४-६) इत्यादौ ॥ ६ ॥

७. अनेन सर्वगतत्वमायामशब्दादिभ्यः ३-२-३६

अनेन सेत्वादिनिराकरणेन अन्यप्रतिषेधसमाश्रयणेन च सर्वगतत्वमात्मनः संभवति । 'यावान्वा अयमाकाशः' (छा. ८-१-३) इत्याद्यायामशब्दादिभ्योऽपि सर्वगतत्वं तस्य सिद्ध्यति । आदिशब्देन 'नित्यः सर्वगतः' (गी. २-२४) इत्यादिस्मृतयो न्यायाश्च गृह्यन्ते ॥ ७ ॥

[इति पराधिकरणम्]

[७. फलाधिकरणम्]

१. फलमत उपपत्तेः ३-२-३८

* तस्य ब्रह्मणः किं संसारदशायां कर्मफलदातृत्वम् ? उत कर्मणः ? इति संशये—

सिद्धान्त्याह—फलं अतः—ईश्वराद्भवति । कुतः ? उपपत्तेः । स हि देशकालविशेषादिभ्यः कर्मणामनुरूपं फलं ददातीत्युपपद्यते ।। १ ।।

२. श्रुतत्वाच्च ३-२-३९

'एष उ एव साधु कर्म कारयति' (कौ. ३-८) इत्यादिश्रुतौ परमेश्वरस्यैव कर्मफलदातृत्वस्य श्रुतत्वाच्च स एव फलप्रदाता ।। २ ।।

३. धर्मं जैमिनिरत एव ३-२-४०

जैमिनिराचार्यः धर्मं फलस्य दातारं मन्यते । अत एव—श्रुतेः, उपपत्तेश्च । 'ज्योतिष्टोमेन यजेत' इति यागस्य स्वर्गहेतुत्वं श्रूयते । अविचित्रस्य विचित्रकार्यानुपपत्तेः, वैषम्यनैर्घृण्यप्रसङ्गात्, अनुष्ठानवैयर्थ्यापत्तेश्च नेश्वरः फलदाता । तस्मात् धर्मादेव फलमिति ।। ३ ।।

---

* ब्रह्मातिरिक्तवस्तुनो निषेधे ब्रह्मणो निर्विशेषत्वेन फलदातृत्वं न स्यादित्याक्षेपसंगत्येदमाह—स. शि. वृ.

अत्राह पूर्ववादी—

९. अम्बुवदग्रहणात्तु न तथात्वम् ३-२-१९

न जलसूर्यसमं ब्रह्म ; सूर्यस्य मूर्तत्वात् , जलादेश्च । न च तयोरिव ब्रह्मोपाधीनां विप्रकृष्टत्वेन ग्रहणम् , सर्वगतत्वाद्ब्रह्मणः ॥ ९ ॥

अत्र प्रतिविधीयते—

१०. वृद्धिह्रासभाक्त्वमन्तर्भावादुभयसामञ्जस्यादेवम् ३-२-२०

जलवृद्धिह्रासे सूर्यप्रतिबिम्बस्य वृद्ध्यादिभाक्त्वं न परमार्थतः सूर्यस्य । एवं ब्रह्माप्युपाधियोगात् उपाधिगतवृद्धिह्रासादिभावं न च परमार्थतो भजते । एवं मूर्तामूर्तत्वादिसारूप्याभावेऽपि दृष्टान्तदार्ष्टान्तिकयोः अविरोधः ॥ १० ॥

११. दर्शनाच्च ३-२-२१

दर्शयति च श्रुतिर्देहाद्युपाधिभावं ब्रह्मणः—'पुरश्चक्रे द्विपदः पुरश्चक्रे चतुष्पदः । पुरस्स पक्षीभूत्वा पुरः पुरुष आविशत्' (बृ. २-५-१८) इति ॥ ११ ॥

[इति उभयलिङ्गाधिकरणम्]

[६. प्रकृतैतावत्त्वाधिकरणम्]

१. प्रकृतैतावत्त्वं हि प्रतिषेधति ततो ब्रवीति च भूयः ३-२-२२

* याभिः श्रुतिभिः ब्रह्म निरूपितम् , तासां ब्रह्मनिषेधपरत्वमिहाशङ्क्य निरस्यते। तथा च श्रूयते—'अथात आदेशो नेति नेति (बृ. २. ३. ६.) इति। तत्र संशयः—किं प्रकृतरूपद्वयं सवासनं ब्रह्म च सर्वं प्रतिषिध्यते ? उत ब्रह्मैव ? अथ सवासनरूपद्वयम्, ब्रह्म तु परिशिष्यते ? इति ॥

द्विः 'न' इतिशब्दप्रयोगात् , प्रकृतमूर्तत्वादिविशेषनिषेध एकेन क्रियते। विशेषनिषेधे निर्विशेषस्य सामान्यस्यावस्थानायोगात् अपरेण सामान्यस्य मूर्तामूर्तत्वादिरूपवत् ब्रह्मणः। अथवा वाङ्मनसातीतत्वात् ब्रह्मैव निषेध्यम्, न प्रत्यक्षादिसिद्धः प्रपञ्च इति प्राप्ते—

उच्यते—प्रकृतैतावत्त्वं हीति। प्रकृतं यत् एतावत्त्वं—इयत्तापरिच्छिन्नं ब्रह्मणो रूपं मूर्तामूर्तलक्षणं, तदेव प्रतिषेधति। तद्धि प्रकृतं—'द्वे वाव ब्रह्मणो रूपे मूर्तं चैवामूर्तं च' (बृ. २. ३. १.) इत्यादि ग्रन्थे। द्वौ चेतौ प्रतिषेधौ यथासङ्ख्यन्यायेन द्वे अपि मूर्तामूर्ते प्रतिषेधतः ॥

यद्वा पूर्वप्रतिषेधो भूतराशिं प्रतिषेधति, उत्तरः वासनाराशिम् ॥

अथवा 'नेति नेति' इति वीप्सायाम्। एतदुक्तं भवति—इतीति यावत्किञ्चिदुत्प्रेक्ष्यते, तत्सर्वं न भवतीति। तस्मात् कल्पितं रूपं प्रतिषेधति, प्रत्यग्ब्रह्म परिशिनष्टि ॥

---

* निषेधस्य ब्रह्मपर्यन्तत्वशङ्कया, तद्व्यतिरिक्तविषयत्वस्थापनार्थमिदमधिकरणम् ॥

इतश्चैष एव निर्णयः—यतः स्वतः प्रतिषेधात् भूयो ब्रवीति 'अन्यत्परमस्ति' (बृ. २-३-६) इति। न च मूर्तामूर्तत्वाद्युपाधिविशेषापगमे तदपेक्षितस्य ब्रह्मसामान्यस्य निषेधः। न पार्थानां दर्पणकृपाणादीनामपगमे मुखभावः, प्रतीतिर्वा। न च सन्निधानात्सर्वप्रतिषेधः। न च भावमनाश्रित्य प्रतिषेध उपपद्यते॥

वाङ्मनसातीतश्रुतिरपि अविषयान्तःपातिप्रत्यगात्मभूतं नित्यशुद्धबुद्धमुक्तस्वभावं ब्रह्मेत्याह; न स्वभावं प्रत्यग्ब्रह्मणः। अन्यथा 'ब्रह्म ते ब्रवाणि' (बृ. २-१-१) इत्याद्युपक्रमो भज्येत। *['असन्नेव स भवति। असद्ब्रह्मेति वेद चेत्' (तै. ब्र. ६-१) इत्यादि निन्दाविरोधात्। 'अस्तीत्येवोपलब्धव्यः' (क. ६-१३) इत्यवधारणविरोधात्। सर्ववेदान्तव्याकोपप्रसङ्गाच्च]॥

२. तदव्यक्तमाह हि ३-२-२३

तत् अव्यक्तं— अनिन्द्रियग्राह्यं, सर्वदृश्यसाक्षित्वात्। 'न चक्षुषा गृह्यते नापि वाचा' (मु. ३-१-८) इत्यादिश्रुतिः यत इममर्थमाह॥ २॥

३. अपि संराधने प्रत्यक्षानुमानाभ्याम् ३-२-२४

अपि च ध्यानप्रणिधानादिसंराधनकाले योगिनः निरस्तसमस्तप्रपञ्चं आत्मानं पश्यन्ति। कुतः? 'प्रत्यक्षानुमानाभ्यां'—श्रुतिस्मृतिभ्यामित्यर्थः। 'पराञ्चि खानि व्यतृणत् स्वयंभूः तस्मात्पराङ्पश्यति नान्तरात्मन्। कश्चिद्धीरः प्रत्यगात्मानमैक्षत्' (क. ३-१-१) इति। स्मृतिरपि—'यं विनिद्रा

---

* मातृकायां गलितः अयं भागः सूत्रभाष्यात् संयोजितः॥

जितश्वासाः सन्तुष्टाः संयतेन्द्रियाः । ज्योतिः पश्यन्ति युञ्जानाः तस्मै योगात्मने नमः ' इत्याद्या ॥ ३ ॥

ननु संराध्यसंराधकभावे जीवेश्वरयोर्भेदः स्या*दिति । नेत्युच्यते—

४. प्रकाशादिवच्चावैशेष्यं प्रकाशश्च कर्मण्यभ्यासात् ३-२-२५

आदिशब्देन आकाशसवितृप्रभृतयो गृह्यन्ते । ते यथा विशेषरहिता अपि उपाधियोगात्सविशेषा इव भासन्ते] एवमुपाधिनिमित्त एवात्मभेदः, स्वतश्चैकात्म्यमेव । ' च ' शब्दः चोदिताशङ्कां निराकरोति । प्रकाशादेः स .... णीति चशब्दश्चाकाशादिसमुच्चये । प्रकाशादयः अङ्गुलीकरकोदकप्रभृतिकर्मसूपाधिभूतेषु विशेषा इव....सादपि जीवप्राज्ञयोरभेद एव ॥ ४ ॥

५. अतोऽनन्तेन तथा हि लिङ्गम् ३-२-२६

अतः—अभेदस्य स्वाभाविकतया, भेदस्याविद्याकृतत्वाच्च जीवः प्राज्ञेन अनन्तेन—आत्मना ऐक्यं गच्छति । तथाहि लिङ्गम्— ' स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति '—(मु. ३-२-९) ' ब्रह्मैव सन् ब्रह्माप्येति ' (बृ. ४-४-६) इत्यादि ॥ ५ ॥

६. उभयव्यपदेशात्त्वहिकुण्डलवत् ३-२-२६

दूषयितुं मतान्तरमनेनोच्यते । ' ततस्तु तं पश्यते ' (मु. ३-१-८) इत्यादौ भेदव्यपदेशात् , ' तत्त्वमसि ' (छा. ६-८-७) इत्याद्यभेदव्यपदेशाच्च अहिकुण्डलयोरिव भेदाभेद एव जीवब्रह्मणोर्भवितुमर्हति । अहिरित्यभेदः कुण्डलात्मना च भेदः । एवमिहापि ॥ १ ॥

---

* मातृकायां त्रुटितो भागः संपादकेन पूरितः ॥

पुनः सिद्धान्त्याह—

४. पूर्वं तु बादरायणो हेतुव्यपदेशात् ३–२–४१

बादरायणस्त्वाचार्यः पूर्वं उक्तमेवेश्वरं फलहेतुं मन्यते। केवलात् कर्मणः, अपूर्वाद्वा केवलात् फलमित्ययं पक्षः 'तु' शब्देन व्यावर्त्यते। कर्मापेक्षात्, अपूर्वापेक्षाद्वा, यथा तथाऽस्तु; ईश्वरात्फलमिति सिद्धान्तः॥

'एष उ एव' इत्यादौ धर्मादिकारयितृत्वेन च फलदातृत्वेन च व्यपदेशात् ब्रह्मणः कर्मानुरूपेण फलहेतुत्वान्नोक्तदोषः॥ ४॥

[इति फलाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वर गजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्र ह्म सू त्र वृ त्तौ

तृतीयाध्यायस्य

द्वितीयः पादः

————

तृतीयाध्यायस्य

तृतीयः पादः

[४. सर्ववेदान्तप्रत्ययाधिकरणम्]

१. सर्ववेदान्तप्रत्ययं चोदनाद्यविशेषात् ३-३-१

*व्याख्यातं विज्ञेयस्य ब्रह्मणस्तत्त्वम् । इदानीं तु प्रतिवेदान्तं विज्ञानानि भिन्नानि ? न वा ? इति चिन्त्यते ॥ न चेहपूर्वापरादिभेदरहितस्य ब्रह्मण एकत्वादेकरूपत्वाच्च तद्विषयविज्ञानस्यापि तद्रूपत्वात् विज्ञानभेदाभेदचिन्ता क्रियते । किन्तर्हि ? सगुणब्रह्मविषया प्राणादिविषया चेयं चिन्ता ॥

तत्र प्रतिवेदान्तं भिन्नानि विज्ञानानि, नामरूपधर्मविशेषपुनरुक्त्यादीनां शाखान्तराधिकरणपूर्वपक्षहेतूनां संभवादिति प्राप्तम्—

तत्रेदमुच्यते—सर्ववेदान्तप्रत्ययमेकं विज्ञानं भवितुमर्हति । कुतः ? 'चोदनाद्यविशेषात्'। आदिशब्देन संयोगरूपाख्याः संगृह्यन्ते । चोदनाशब्देनात्र चोद्यत इति पुरुषप्रयत्न उच्यते । स यथा शाखाभेदेऽपि तादृश एव चोद्यते 'जुहुयात्' इति, एवमिहापि प्राणज्येष्ठत्ववेदनविषयः पुरुषप्रयत्नः । स एव शाखान्तरेष्वपीति ॥

इत्थं पूर्वपादे वाक्यार्थज्ञानकारणभूततत्त्वंपदार्थनिरूपणमकारि ; अधुना वाक्यार्थो निर्धार्यत इति हेतुहेतुमद्भावसंगत्याऽयं तृतीयपाद आरभ्यते । सगुणविद्यायाश्चित्तैकाग्र्यद्वारा निर्गुणवाक्यार्थज्ञानोपयोगित्वात् तद्वाक्यार्थचिन्ता क्रियत इति मन्तव्यम्—स. शि. वृ.

एवं फलसंयोगोऽपि ज्येष्ठत्वश्रेष्ठत्वभवनलक्षणः। यथा यागस्य यदेकस्यां शाखायां रूपद्रव्यदेवतादि, तदेव शाखान्तरेष्वपीति। एवं वेदनस्यापि यदेकत्वप्राणज्येष्ठत्वादिरूपविषयः तथा शाखान्तरेष्वपीति ॥

समाख्याऽपि सैव प्राणविद्येति। तस्मात् सर्ववेदान्तप्रमाणानि विज्ञानानि यान्येकस्मिन् वेदान्ते, तान्येव वेदान्तान्तरेष्वपीति सिद्धम् ॥

न च कठादिनामभेदाद्विद्याभेदः। तेषां काठकादिप्रवचनयोगात् पौरुषेयत्वेन उपासनाविषयत्वाभावात् ॥ १ ॥

इदानीं रूपभेदाद्विद्याभेदमाशङ्क्य निराकरोति—

२. भेदान्नेति चेन्नैकस्यामपि ३-३-२

'तस्याग्निरेवाग्निर्भवति' (बृ. ६-२-१४) इति वाजसनेयिनः षष्ठमग्निमामनन्ति। 'अथ ह य एतानेवं पञ्चाग्नीन् वेद' (छा. ५-१०-१०) इति छन्दोगाः पञ्चैव। अतो रूपभेदात्—पञ्चाग्निरूपरूपभेदात् विद्ययोर्भेद इति चेत्—न—यत एकस्यामप्येवंविधो रूपभेद उपपद्यते। संपादिकानामग्नीनां उभयत्र समत्वात्। षष्ठस्तूपास्यव्यतिरेकाय ॥ २ ॥

३. स्वाध्यायस्य तथात्वेन हि समाचारेऽधिकाराच्च सववच्च तन्नियमः ३-३-३

यत्तु शिरोव्रतादिधर्मविशेषात् विद्याभेद इति, तत् प्रत्युच्यते—शिरोव्रतादिः स्वाध्यायधर्मः, न विद्यायाः। कुतः? तथात्वेन हि समाचारे; आम्नानादिति शेषः। तथात्वेन—स्वाध्यायधर्मत्वेन। समाचारे—वेदव्रतोपदेशग्रन्थे ॥

किञ्च 'नैतदचीर्णव्रतोऽधीते' (मु. ३-२-११) इत्यधिकारात्—अधिकृतविषयात् एतच्छब्दात् अध्ययनधर्म एषः। 'सववच्च तन्नियमः' इति निदर्शनम्। यथा च सवाः सप्तसौर्यादयो होमाः शतौदनपर्यन्ताः आथर्वणिकानां मते एकस्मिन्नेव आथर्वणिकेऽग्नौ क्रियन्ते, न त्रेताग्नौ ; तथैवायमपि स्वाध्यायविशेषसम्बन्धात् तत्रैव नियम्यते। तस्मात् न धर्मविशेषो विद्याभेदकः ॥ ३ ॥

४. दर्शयति च ३-३-४

दर्शयति वेदो विद्यैकत्वम्, सर्ववेदान्तेषु विद्यैकत्वोपदेशात् 'सर्वे वेदा यत्पदमामनन्ति' (क. १-२-१५) इत्यादिषु। यद्यप्यत्र निर्गुण ब्रह्मज्ञानैक्यमवगतम्, तथापि तत्सन्निधिपाठात् सगुणविद्यानामप्यैक्यं सिद्ध्यति ॥ ४ ॥

[इति सर्ववेदान्तप्रत्ययाधिकरणम्]

[२. उपसंहाराधिकरणम्]

१. उपसंहारोऽर्थाभेदाद्विधिशेषवत्समाने च ३-३-५

* अस्मिन्नधिकरणे विद्यैकत्वफलमुच्यते। अन्यत्रोदितानां विद्यागुणानामन्यत्र समाने विज्ञाने उपसंहारो भवति। कुतः? 'अर्थाभेदात्'

---

* एवं सर्वशाखासु विद्यैक्यमवादि। अधुना तत्फलमुच्यते—स.शि.वृ.

—'विधिशेषवत्' इति निदर्शनम्। यथा विधिशेषाणामग्निहोत्रादिधर्माणां तदेकमग्निहोत्रादिकं कर्म सर्वत्रेत्यस्मादभेदादुपसंहारः एवमिहापीति ॥ २ ॥

[इति उपसंहाराधिकरणम्]

[३. अन्यथात्वाधिकरणम्]

१. अन्यथात्वं शब्दादिति चेन्नाविशेषात् ३-३-६

चोदनाद्यविशेषस्यापवादार्थमिदमधिकरणम्॥ 'तेभ्य एष प्राण उदगायत्' (बृ. १-३-७) इति वाजसनेयके पठ्यते। 'य एवायं मुख्यः प्राणस्तमुद्गीथमुपासांचक्रिरे' (छा. १-२-७) इति छान्दोग्ये। अत्र—किं विद्यैक्यम्? उत विद्याभेदः? इति संशये—विद्यैक्यवादी सिद्धान्तबीजमाशङ्क्य निराकरोति—अन्यथात्वमिति॥

एकत्र प्राणस्योद्गीथकर्तृत्वम्, अन्यत्रोद्गीथत्वमित्येवंविधभेदात् न विद्यैकत्वमिति चेत्—न। कुतः? 'अविशेषात्'—मुख्यप्राणव्यपाश्रयः, तद्वीर्याच्चासुरविध्वंसनाद्यविशेषस्यापि बहुलमुपलंभात्॥ १॥

एवं पूर्ववादिनोक्ते सिद्धान्त्याह—

२. न वा प्रकरणविरोधात्परोवरीयस्त्वादिवत् ३-३-७

विद्याभेद एवात्र न्याय्यः। कुतः? 'प्रकरणभेदात'—छान्दोग्ये तावत् 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा-१-१-१) इत्येवमुद्गीथावयवस्योंकारस्य प्रस्तुतत्वात्, तदधीनतया उद्गीथावयव ओंकारे प्राणदृष्टिरुपदिश्यते॥

वाजसनेयके तु तादृशकारणाभावत् उद्गीथशब्देन सकलैव भक्ति रुच्यते । 'परोवरीयस्त्वादिवत्' इति निदर्शनम् । यथा उपासनासाम्येऽप्यादित्यादिगतहिरण्यश्मश्रुत्वादिगुणविशिष्टोद्गीथोपासनातः परोवरीयस्त्वगुणविशिष्टोद्गीथोपासाना भिन्ना, तद्वदिहापीति ॥ २ ॥

३. संज्ञातश्चेत्तदुक्तमस्ति तु तदपि ३-३-८

संज्ञैकत्वाद्विद्यैकत्वमिति चेत्—न । कुतः? यतः तदपि नोपपद्यते । तदुक्तं अतीतसूत्रे ॥

किञ्च श्रुत्यक्षरपर्यालोचनया भेदप्रत्ययोऽन्तरङ्गम् । संज्ञैकत्वं तु व्यवहर्तृपुरुषकल्पितत्वात् श्रुतिग्राह्यतया बहिरङ्गम्, पौरुषेयतया च सापेक्षं च ॥

अस्ति त्ववयवत्वेन प्रसिद्धभेदेष्वपि परोवरीयस्त्वाद्युपासनेपु संज्ञैकत्वं विद्यमानमप्यप्रयोजकमित्युक्तम् ॥ ३ ॥

[इति अन्यथात्वाधिकरणम्]

[४. व्याप्त्यधिकरणम्]

१. व्याप्तेश्च समञ्जसम् ३-३-९

ओंकारस्योद्गीथेन विशेषणं सिद्धवत्कृत्य प्रक्रमसामर्थ्याद्विद्याभेदः साधितः । इदानीं तस्य सिद्धिमाह*—व्याप्तेश्चेति ॥

*तथाचाक्षेपिकी संगतिः ॥

'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा-१-१-१) इत्यत्र अध्यासादिपक्षाणां प्रतीतेर्न विशेषणत्वमिति पूर्वपक्षे प्राप्ते—

सिद्धान्तः — प्रत्यनुवाकं प्रत्यृचं ओंकारव्याप्तेर्दर्शनात् — कस्य ओंकारस्य ग्रहणम्? इत्यपेक्षायां 'उद्गीथ' इति विशेष्यते। तस्मात् उद्गीथमित्येतत्समञ्जसम् ॥ १ ॥

[इति व्याप्त्यधिकरणम्]

———

[५. सर्वाभेदाधिकरणम्]

१. सर्वाभेदादन्यत्रेमे ३–३–१०

* वाजिनां छन्दोगानां च 'यद्वा अहं वासिष्ठाऽस्मि' इत्यादिप्राणसंवादे वसिष्ठत्वादिगुणा उक्ताः। ते किं 'अहं श्रेयसे विवदमानाः' (बृ-६-१-८) इत्यादिषु कौषीतकिनां प्राणसंवादेपूपसंह्रियन्ते? न वा? इति संशये—एवंशब्दयोगात् प्रकृतसम्बन्धप्रतीतेः नोपसंह्रियन्त इति पूर्वपक्षे प्राप्ते—

राद्धान्तः—अस्येरन्निमे गुणाः क्वचिदुक्तवसिष्ठत्वादयोऽन्यत्रापि। कुतः? 'सर्वाभेदात्'—सर्वत्र ह्रीदमेवैकं प्राणविज्ञानमभिन्नं प्रत्यभिज्ञायते, प्राणसंवादादिसारूप्यात्। न च 'अथ य एवं विद्वान्' इति अत्रैवंकारो न शब्दमात्रं सन्निहितं परामृशति; अपि तु यच्छब्दाभिहितनान्तरीयकम्। तदपि यथा 'यस्य पर्णमयी जुहूर्भवति'..................इत्यव्यभिचरित-

---

*पूर्वं उद्गीथत्वविशेषणात् ओंकारस्य सर्ववेदव्याप्तिव्यावृत्तिवत् 'एवंविद्वान्' इति प्रकृतगुणमात्रग्राहकैवंशब्दात् शाखान्तरगुणव्यावृत्तिरिति दृष्टान्तसंगत्येदमाह —स. शि. वृ.

क्रतुसम्बद्धया जुह्वा बुद्धिसन्निधापितः क्रतुरुपस्थापितः। तस्मादुपास्यफल-प्रत्यभिज्ञानादव्यभिचारिणः प्रकारभेदस्येहानुक्तास्यापि सन्निधानम् ॥ १ ॥

[इति सर्वाभेदाधिकरणम्]

——o——

[६. आनन्दाद्यधिकरणम्]

१. आनन्दादयः प्रधानस्य ३-३-११

* सत्यज्ञानानन्दत्वादयो ये क्वचित् क्वचिच्छ्रूयन्ते, किं ते तत्र तत्र प्रतिपत्तव्याः ? किं वा सर्वे सर्वत्र ? इति संशये—विशेषवत्प्राणस्येव न निर्विशेषब्रह्मणः शाखान्तरोक्तगुणसम्बन्ध इति चोद्यस्योत्तरमिदम् ॥

आनन्दादयः सर्वे सर्वत्र प्रधानस्य ब्रह्मणो धर्माः प्रतिपत्तव्याः। कस्मात् ? सर्वाभेदादेव। सर्वत्र हि प्रधानं विशेष्यं ब्रह्म न भिद्यते। न च निर्विशेषस्य ब्रह्मणः कथं शाखान्तरोक्तगुणसम्बन्ध इति वाच्यम् ; सत्य-ज्ञानानन्दादिपदानां अनृतजडदुःखात्मकताभ्रान्तिव्यावर्तकत्वेन एकरसाखण्ड-ब्रह्मप्रतिपादकत्वात् ॥ १ ॥

तर्हि प्रियशिरस्त्वादयोऽपि ब्रह्मणि प्रसज्येरन्—नेत्याह—

---

*ननु प्राणस्य सविशेषत्वात् भवतु शाखान्तरीयवासिष्ठत्वाद्युपसंहारः ; ब्रह्मणस्तु निर्विशेषत्वात् स्वशाखागतधर्मैरेव प्रमितिसिद्धेः न शाखान्तरगतानन्दाद्युप-संहार इति प्रत्युदाहरणसंगत्येदमाह – स. शि. वृ.

२. प्रियशिरस्त्वाद्यप्राप्तिरुपचयापचयौ हि भेदे ३-३-१२

न ह्यानन्दमयाधिकरणपठितानां प्रियशिरस्त्वादीनां ब्रह्मणि प्राप्तिरस्ति; यस्मात् 'प्रियं' 'मोदः' 'प्रमोदः' 'आनन्दः' इत्येते परस्परापेक्षयोपचितापचितरूपा उपलभ्यन्ते। उपचयापचयौ च भेदे संभवतः। निर्भेदं च ब्रह्म; 'एकमेवाद्वितीयं ब्रह्म' (छा. ६-२-१) इत्यादिश्रुतिभ्यः। न च ते ब्रह्मणो धर्मा इति 'आनन्दमयोऽभ्यासात्' इत्यत्रोक्तम्॥ २॥

३. इतरे त्वर्थसामान्यात् ३-३-१३

इतरे त्वानन्दादयो धर्मा ब्रह्मस्वरूपप्रतिपादनायार्थसामान्याद्धर्मिण एकत्वात् सर्वत्र सर्वे सम्बध्येरन्॥ ३॥

[इति आनन्दाद्यधिकरणम्]

——o——

[७. आध्यानाधिकरणम्]

१. आध्यानाय प्रयोजनाभावात् ३-३-१४

* 'इन्द्रियेभ्यः परा ह्यर्थाः' (क. १-३-१०) इत्यादि काठके पठ्यते। किमत्र अर्थादिपरत्वमपि विवक्षितम्? कुत पुरुषपरत्वम्? इति संशये—विद्याभेदवत् वाक्यभेदबलात् अर्थादिपरत्वमपि— इति चोद्यस्योत्तरमिदम्॥

---

* पूर्वत्र ब्रह्मस्वरूपाणामानन्दादीनामुपसंहार्याणां ब्रह्मज्ञानोपायत्वमभिहितम्। अधुना तु अब्रह्मस्वरूपस्यानुसंहार्यस्यार्थादिपरत्वरूपधर्मस्य प्रज्ञानोपायत्वमभिधीयत इत्येकफलसंगत्येदमाह—स· शि. वृ.

पुरुषस्यैवात्र परत्वम् । कुतः ? अर्थादिपरत्वज्ञाने प्रयोजनाभावात् । पुरुषपरत्वज्ञाने प्रयोजनं 'निचाय्य तं मृत्युमुखात् प्रमुच्यते' (क. १-३-१५) इति मोक्षः श्रूयते । काष्ठादिदर्शनात् पुरुषपरत्वमेवेत्याह—आध्यानायेति। आध्यानाय—ध्यानपूर्वकं सम्यग्दर्शनाय ॥ १ ॥

२. आत्मशब्दाच्च ३-३-१६

'एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते' (क. १-३-१२) इत्यात्मशब्दाच्च पुरुषस्यैव परत्वप्रतिपत्त्यर्थं इन्द्रियादिपरत्वोक्तिरिति ॥ २ ॥

[इति आध्यानाधिकरणम्]

[८. आत्मगृहीत्यधिकरणम्]

१. आत्मगृहीतिरितरवदुत्तरात् ३-३-१६

* 'आत्मा वा इदमेक एवाग्र आसीत्' (ऐ. १-१) इत्यैतरेयके पठ्यते । किं विशेषवानात्मा इहात्मशब्दः ? उतान्यः ? इति संशये वाक्यान्वयदर्शनात् विशेषवानात्मेहोक्त इति प्राप्ते—

उच्यते—परमात्मैवात्मशब्देन गृह्यते । 'इतरवत्'—यथेतरेषु सृष्टिश्रवणेषु 'तस्माद्वा एतस्मादात्मनः' (तै. ब्र. १) परमात्मोच्यते,

---

*पूर्वं वाक्यभेदमभिधाय, अर्थादीनां पृथक्प्रतिपाद्यत्वं नास्तीत्यभिहितम् । तद्वत् 'प्रजापते रेतोदेवाः' इति पूर्ववाक्ये हिरण्यगर्भस्य प्रकृतत्वात् वाक्यभेदमिया स एवात्मशब्देनाभिधीयत इति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

तथेहापि 'स ईक्षत लोकान्नु सृजा इति' (ऐ. १-१) इत्युत्तरवाक्यमात्मपक्ष एवानुगुणम् ।। १ ।।

२. अन्वयादिति चेत् स्यादवधारणात् ३-३-१७

काठकवाक्यवत् इहापि वाक्यान्वयलाभात् नात्मनो ग्रहणमिति चेत् —न—यस्मात्? 'अवधारणात्'—परमात्मन एव ग्रहणं स्यात्; अन्यथा 'आत्मैव' इत्यवधारणं नोपपद्येत, तस्मात् 'स इमान् लोकानसृजत' (ऐ १-२) इत्यादिवाक्यमवधारणानुगुणं योज्यम्। श्रुत्यन्तरप्रसिद्धमहाभूतसृष्ट्यनन्तरं लोकसृष्टिसंभवपरम् ।। २ ।।

[वर्णकान्तरम्]

* अपरा योजना—वाजसनेयके 'कतम आत्मा' (बृ. ४-३-७) इत्युपक्रमे आत्मशब्दश्रवणात् 'सदेव सौम्य' (छा. ६-२-१) इत्यादिछान्दोग्यवाक्ये तददर्शनात् न तत्रात्मशब्दश्रवणमिति चोद्यस्योत्तरमिदं सूत्रम्।।

आत्मगृहीतिः 'सदेव सौम्य' इत्यत्र छन्दोगानामपि भवितुमर्हति। 'इतरवत्'—यथा वाजसनेयके 'कतम आत्मा' इत्यत्र, तथेहापि। कस्मात्? 'उत्तरात्'—तादात्म्योपदेशात् ।। १ ।।

'अन्वयादिति चेत् स्यादवधारणात्'—उपसंहारस्योपक्रमान्वययोग्यत्वात्, उपक्रमे चात्मशब्दश्रवणात् नात्मगृहीतिरिति चेत—न—'येनाश्रुतम्'

---

* पूर्वत्र वाक्यैक्यबलात् अर्थादिपरत्वं परित्यज्य विद्यैक्यमवादि। इह तूपक्रमभेदेन वाक्यभेदात् विद्यैक्यं न स्यादिति प्रत्युदाहरणसंगत्येदमाह —स शि.वृ.

(छा. ६-१-१) इत्यात्मविज्ञानात् सर्वविज्ञानावधारणात् सत्पदेनात्मगृहीतिः । सदात्मपदयोरेकार्थत्वादुपक्रमोपसंहारयोरानुगुण्यं घटते ।। २ ।।

[इति आत्मगृहीत्यधिकरणम्]

[९. कार्याख्यानाधिकरणम्]

१. कार्याख्यानादपूर्वम् ३-३-१८

* 'तस्मादेवंविदशिष्यन्नाचामेदशित्वा चाचामेदेतमेव तदनमनग्नं कुरुते' (बृ. ६-१-१४) इत्यादिश्रुतौ किमाचमनमनग्नताचिन्तनमुभयमपि विधीयते ? उताचमनमेव ? किं वाऽनग्नताचिन्तनमेव ? इति संशये तावत्—उभयं विधीयत इति प्राप्ते—उभयोरप्यभ्युपगमात् उभयं, स्पष्टं विधिदर्शनादाचमनमेवैकं विधीयताम्—इतीमां शङ्कां निराकरोति—कार्येति ।।

प्रायत्यार्थं, कार्यस्यैवाचमनस्याख्यानात्, तदनूद्यानग्नताकरणसंकल्पः प्राणविद्यासंबन्धित्वेनापूर्वत्वाद्विधीयते । आचमनस्य पुरुषमात्रसंबन्धित्वात्, श्रुतेश्च प्राणविद्याविषयत्वात्, भिन्नविषयत्वेनास्याः स्मृतेः नेयं श्रुतिः मूलं भवितुमर्हति ।। १ ।।

[इति कार्याख्यानाधिकरणम्]

---

* पूर्वत्र संदिग्धसदुपक्रमस्य वाक्यशेषान्निर्णयवत् 'आचामन्ति' इतिवर्तमानापदेशस्य विधित्वसंदेहे—, 'आचामेत्' इति वाक्यशेषात् विधित्वनिर्णय इति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

[१०. समानाधिकरणम्]

१. समान एवञ्चाभेदात् ३–३–१९

* वाजसनेयकेऽग्निरहस्ये शाण्डिल्यविद्यायां 'आत्मानमुपासीत मनोमयम्' इत्यादि पठित्वा, पुनरस्मिन्नेव बृहदारण्यके पठ्यते 'मनोमयोऽयं पुरुषः' (बृ. ५-६-१) इति। किमुभयोर्विद्ययोर्भेदः, गुणानुपसंहारश्च? उताभेदः, गुणोपसंहारश्च? इति संशये— विद्याभेदः, गुणानुपसंहारश्चेति प्राप्तम्; पौनरुक्त्यात्, गुणानां समत्वाच्चेतीमांशङ्कां निराकरोति—समान इति॥

समानेऽपि—एकस्यां शाखायामपि न विद्याभेदः; गुणोपसंहारश्च भवति। कुतः? 'अभेदात्'—उपास्याभेदादित्यर्थः। एकत्र विद्याविधिः, अन्यत्र गुणविधिरिति न पौनरुक्त्यं च। समानगुणाम्नानमपि विद्याप्रत्यभिज्ञानाय॥ १॥

[इति समानाधिकरणम्]

———

[११. सम्बन्धाधिकरणम्]

१. संबन्धादेवमन्यत्रापि ३–३–२०

† सत्यविद्यायां 'तस्योपनिषदहः' (बृ. ५-५-३) इत्यधिदैवतम्, 'तस्योपनिषदहम्' (बृ. ५-५-४) इत्यध्यात्मम् इति—श्रूयते। किमेतावु-

---

* पूर्वत्र प्राप्ताचमनानुवादेनानग्नताचिन्तनं विधेयमित्युक्तम्। इह तु एकशाखायां विप्रकृष्टदेशस्थवाक्ययोः एकस्यानुवादकत्वं, अन्यस्य विधायकत्वमिति अनिश्चयादुभयोरपि स्वनिकटस्थगुणविशिष्टविद्याविधायकत्वमिति प्रत्युदाहरणसंगत्येदमाह—स·शि·वृ.

† पूर्वेण दृष्टान्तसंगत्येदमाह—स·शि·वृ.

पनिषदौ स्थानद्वयेऽप्यविभागेन ध्येये ? उत स्थानभेदात् व्यवस्थया ? इति संशये—पूर्वपक्ष्याह—सम्बन्धादिति ।।

शाण्डिल्यविद्यायामिव एकविद्यासम्बन्धादन्यत्रापि एवञ्जातीयके विषये गुणोपसंहारो भवितुमर्हतीति ।। १ ।।

सिद्धान्त्याह—

२. न वा विशेषात् ३-३-२१

न वा उभयोरुभयत्र प्राप्तिः । कुतः ? 'विशेषात्'—उपासनास्थानविशेषोपसंबन्धादित्यर्थः । 'य एष एतस्मिन् मण्डले पुरुषः' (बृ. ५-५-३) इत्यादित्यपुरुषस्य रहस्यं नाम 'तस्योपनिषदहः' इति । 'योऽयं दक्षिणेऽक्षन् पुरुषः' (बृ. ५-५-४) इत्यध्यात्क्षिपुरुषस्य रहस्यं नाम 'तस्योपनिषदहम्' इति । प्रत्यगात्मेति यावत् । एवमुपनिषदोः स्थानविशेषः स्पष्टः ।। २ ।।

३. दर्शयति च ३-३-२२

'तस्यैतस्य तदेवरूपम्' (छा. १-७-५) इत्यादिवाक्ये रूपाद्यतिदेशाख्यं लिङ्गं च दर्शयति श्रुतिर्विद्याभेदे । अन्यथातिदेशानर्थक्यं स्यात् ।। ३ ।।

[इति सम्बन्धाधिकरणम्]

——o——

[१२. संभृत्यधिकरणम्]

१. संभृतिद्युव्याप्त्यपि चातः ३-३-२३

* ' ब्रह्मज्येष्ठा वीर्या संभृतानि ' (खिलश्रुतिः) राणायनीयपठिता वीर्यसंभृत्यादयः शाण्डिल्यविद्यादिषूपसह्रियन्ते ? न वा ? इति संशये— ब्रह्मसंबन्धादुपसंहार्यत्वप्राप्तौ—

सिद्धान्तः—संभृतिद्युव्याप्तिप्रभृतयो नोपसंहर्तव्याः शाण्डिल्यविद्यादिषु । कुतः ? अत एव—आयतनविशेषप्रयोगात् । ' एष म आत्माऽन्तर्हृदये ' (छा. ३-१४-३) इति शाण्डिल्यविद्यायां हृदयस्थानत्वम् । आधिदैविक्यो विभूतयः संभृतयः ।। १ ।।

[इति संभृत्यधिकरणम्]

[१३. पुरुषविद्याधिकरणम्]

१. पुरुषविद्यायामिव चेतरेषामनाम्नात् ३-३-२४

† ' पुरुषो वा व यज्ञः ' (पैङ्गिरहस्ये) इत्यादिभि शाण्डिल्यादिशाखाविहितगुणानां किं तैत्तरीयकपुरुषविद्यायां संबन्धोऽस्ति ? न वा ? इति संशयः । पुरुषयज्ञत्वाविशेषादुपसंहारप्राप्तौ—आचक्ष्महे—

---

* पूर्वोक्तन्यायमतिदिशति—स·शि·बृ.

† पूर्वत्रासाधारणगुणप्रत्यभिज्ञानाभावात् संभृत्यादिगुणविशिष्टविद्याभेद उक्तः। इह त्वसाधारणमरणावभृथगुणाविशिष्टपुरुषयज्ञरूपैक्यप्रत्यभिज्ञानात् विद्यैक्यमिति प्रत्युदाहरणसंगत्येदमाह—स·शि·बृ.

नोपसंहर्तव्या इति । कुतः ? तद्रूपप्रत्यभिज्ञानाभावात् । तदिद- मुक्तं—'पुरुषविद्यायामिव चेतरेषामनाम्नात्' इति । यथैकेषां शाखिना- पैङ्गिनां शाण्डिल्यानां च पुरुषविद्याम्नानं, नैवमितरेषां तैत्तरीयके च विद्वानेव वयो यज्ञादिति न सामानाधिकरण्यसंभवः । विदुषो यज्ञस्तस्येति वैयधिकरण्यस्य विवक्षितत्वात् । ताण्ड्यादिशाखासु 'विद्वानेव पुरुषो यो यज्ञस्तस्य' इति सामानाधिकरण्यस्य विवक्षितत्वात् ।। १ ।।

[इति पुरुषविद्याधिकरणम्]

[१४. वेधाद्यधिकरणम्]

१. वेधाद्यर्थभेदात् ३-३-२५

*'सर्वं प्रविध्य' इत्येवमादय आथर्वणोपनिषदारंभे पठ्यन्ते । कौषीतक्याद्युपनिषदारम्भे प्रवर्ग्याग्निष्टोमादीनि पठ्यन्ते । किं ते विद्या- भिस्सहोपसंह्रियेरन् ? न वा ? इति संशये—आत्मविद्यासंबन्धिपठितपुरुषयज्ञ- वत् प्रवर्ग्यादीनामपि विद्याप्रधानोपनिषद्ग्रन्थानां सन्निधौ पाठादुपसंहार इति प्राप्तम् ।।

तत्र सिद्धान्तः—नैषामुपसंहारो भवतीति । कुतः ? 'वेधाद्यर्थ- भेदात्'—'हृदयं प्रविध्य धमनीः प्रवृज्य' इत्येवंजातीयकोऽर्थो ब्रह्मविद्यायां न संबध्यते, तस्याभिचारकर्मणा संबन्धात् । तथा प्रवर्ग्यादीनां च विद्यादिभिः सहैकार्थ्यानुपलंभात् न विद्यासम्बन्धः । तत्र तेषां सन्निधेः

---

* पूर्वं यथा पुरुषयज्ञस्यात्मविद्यासन्निधानात् तच्छेषत्वम्, तथा मन्त्राणां कर्मणां च तत्तद्विद्यासन्निधानात् तच्छेषत्वमस्त्विति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

श्रुत्यादिभ्यो दुर्बलत्वात् तद्विहितकर्मशेषत्वभञ्जकत्वम्। तदुक्तं—'श्रुतिलिङ्गवाक्यप्रकरणस्थानसमाख्यानां समवाये पारदौर्बल्यमर्थविप्रकर्षात्' (जै. सू. ३-३-१३) इति ॥ १ ॥

[इति वेधाद्यधिकरणम्]

[१५. हान्यधिकरणम्]

१ हानौ तूपायनशब्दशेषत्वात् कुशाच्छन्दस्तुत्युपगानवत्तदुक्तम् ३-३-२६

* 'अश्व इव रोमाणि विधूय पापं चन्द्र इव राहोर्मुखात्प्रमुच्य धूत्वा शरीरमकृतं कृतात्मा ब्रह्मलोकमभिसंभवामि' (छा. ८-१३-१) इति ताण्डिशाखायां श्रूयते। अत्र किं कौषीतकिशाखायामिव ब्रह्मविदुषा त्यक्तं पुण्यं प्रिया ज्ञातय उपयन्ति, अप्रियाश्च किं दुष्कृतम्? इति संशये तावत्—अश्रवणान्नोपयन्तीति प्राप्ते—

राद्धान्तः—हानाविति। हानौ त्वेकस्यां केवलायामपि श्रूयमाणायां उपायन—सुहृदः प्रति पुण्यगमनं, द्विषदः प्रति पापगमनं च भवितुमर्हति। कुतः? तच्छेषत्वात्। इममेव हेतुमुपपादयति—उपायनशब्दशेषत्वादिति। हानशब्दशेषो ह्ययमुपायनशब्दः समधिगतः कौषीतकिरहस्ये। तस्मादन्यत्र केवलहानिश्रवणेऽप्युपायनानुवृत्तिः॥

---

* यथा पूर्वं विद्यासन्निधौ श्रुतस्यापि मन्त्रादेः विद्यायामनावश्यकत्वात् अनुपसंहार उक्तः, तथा क्वचिद्धानसन्निधौ श्रुतस्याप्युपादानस्यान्तरेणाप्युपादानं तूष्णीं हानसंभवेनानावश्यकत्वात् अनुपसंहार इति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

यदुक्तं अश्रवणान्नोपयन्तीति—तदयुक्तम्—यद्यनुष्ठेयं किञ्चित् अन्यत्र श्रुतं तदन्यत्र न नीयेत । विद्यास्तुत्यर्थत्वेनानयोः संकीर्तनमिति उपायन-शेषभूतकेवलहानश्रवणेऽपि उपायनमवश्यमानेतुमर्हति प्रकर्षलाभाय यथा 'त्रिष्टुभौ भवतः सेन्द्रियत्वाय' इति वाक्ये इन्द्रियेषु 'त्रिष्टुप् ' इत्यर्थवादापेक्षा स्तुत्यर्था, तद्वदिहापि ॥

' कुशाच्छन्दस्तुत्युपगानवत् ' इत्युपमोपादानम् । भाल्लविशाखायां ' कुशा वानस्पत्याः ' इत्यविशेषेण वनस्पतियोनित्वश्रवणे, शाट्यायनिनां ' औदुम्बराः ' इति विशेषणात् औदुम्बर्यः कुशा इति निश्चीयन्ते ॥

यथा च क्वचिद्देवासुरच्छन्दसामविशेषेण पौर्वापर्यप्रसङ्गे ' देवच्छन्दांसि पूर्वाणि ' इति पैङ्ग्याम्नानान्निश्चीयते ॥

यथा च षोडशिस्तोत्रे क्वचित्कालविशेषेण प्राप्तो ' समयाध्युषिते सूर्ये ' इति कालप्रतीतिः ॥

यथा चाविशेषेणोपगानं केचित्पठन्ति, विशेषेण भाल्लविनः ॥

एवं कुशादिषु विशेषान्वयवत् इह हानावप्युपायनान्वयः । श्रुत्यन्तर-गतं विशेषं श्रुत्यन्तरेऽनभ्युपगच्छतः सर्वत्र विकल्पः स्यात् । स चान्याय्यः । तदुक्तं द्वादशलक्षण्यां—' अपि तु वाक्यशेषः स्यात् अबाध्यत्वाद्विकल्पस्य विधानमेकदेशः स्यात् ' (जै. सू. १०-८-१) इति । अस्य सूत्रस्याय-मर्थः—' सप्तदश प्रजापतिर्यज्ञेऽन्वायत्तः ' इति । ततो नानुयाजेषु येयजामहं करोतीति । अत्रानुयाजेषु यजतिषु येयजामहकरणनिषेधः षोडशिग्रहणाग्रहणवत् शास्त्रीयविधिनिषेधयोर्विकल्प इति पक्षो न घटते । अष्टदोषदुष्टोऽपि षोडशिग्रहणे भवतु विकल्प इत्येतत् ' अपि तु ' इति सूत्रावयवेनोक्तम् । प्रकृते तु वाक्यशेषः स्यात् पर्युदासः स्यात्

गत्यन्तरं नानुयाजेषु—अनुयाजवर्जितेषु येयजामहः कर्तव्य इति । ततोऽन्याय्यत्वाद्विकल्पस्यासंभवः । ततश्चैतद्वाक्यमपरिपूर्णं साकाङ्क्षं पूर्ववाक्यैकदेशेन सम्बध्यत इति अनुयाजवर्जितेषु येयजामहविधानमिति सिद्धान्तः ॥

तस्मात् केवलहानश्रवणेऽपि पुण्यपापयोरुपायनमवश्यं भवति ॥

असौ च सूत्रस्यापरा व्याख्या—'अश्व इव रोमाणि विधूय पापं' (छा. ८-१३-१) इति विधूननं किं चालनं स्यात्? उत हानम्? इति संशये—'दोधूयन्ते ध्वजाग्राणि' इत्यादाविव चालनमर्थः, न परित्याग इति प्राप्ते—

सिद्धान्तः—हानाविति । हानावेव विधूननशब्दः । कुतः? 'उपायनशब्दशेषत्वात्'—न हि परमपरिग्रहणभूतयोः सुकृतदुष्कृतयोः अप्रहीणयोः परैरुपायनं संपद्यते । अनेकार्थत्वाच्च धातूनां न स्मरणविरोधः । क्वचिच्चेदमुपायनसन्निधावुपायनं श्रूयमाणं कुशाच्छन्दस्तुत्युपगानवत् विधूननश्रुत्या सर्वत्रापेक्षमाणं सार्वत्रिकं निर्णयकारणं संपद्यते । 'तदुक्त' इत्येतस्य पूर्ववद्व्याख्यानम् ॥ १ ॥

[इति हान्यधिकरणम्]

[१६. सांपरायाधिकरणम्]

१. सांपराये तर्तव्याभावात्तथा ह्यन्ये ३-३-२७

* देवयानमार्गमास्थितस्य किं मार्गमध्ये पुण्यपापत्यागः ? उत देहत्यागसमये ? इति संशये—'असावागच्छति विरजां नदीं मनसैवात्येति तत्सुकृतदुष्कृते विधूनुते' (कौ. १-४) इति श्रुतिप्रामाण्यात् मार्गमध्य इति प्राप्ते—

सिद्धान्तः—सांपराय इति। सांपराये—गमनसमये—देहादपसर्पणे इदं विद्यासामर्थ्यात् सुकृतदुष्कृतहानं भवति। कुतः ? 'तर्तव्याभावात्'—न हि सांपराये विद्यया ब्रह्म प्रेप्सतः तस्य सुकृतदुष्कृताभ्यां किञ्चित् तर्तव्यं—प्राप्तव्यमस्ति। तस्मात् 'पाठक्रमादर्थक्रमो बलवान्' इति गमनकाल एव सुकृतदुष्कृतक्षयः। तथा ह्यन्ये शाखिनः शाट्यायनिनः ताण्डिनश्च प्रागवस्थायामेव 'अश्व इव रोमाणि' (छा. ८-१३-१) इत्यादौ पुण्यपापत्यागमामनन्ति ॥ १ ॥

२. छन्दत उभयाविरोधात् ३-३-२८

साधकावस्थायामेव छन्दतः—इच्छातः यमनियमाद्यनुष्ठानसंभवात्, पतिते तदनुपपत्तेः गमनसमय एव निमित्तनैमित्तिकयोरविरोधः ॥ २ ॥

[इति सांपरायाधिकरणम्]

---

* पूर्वं विद्यायाः कर्महानिहेतुत्वं सिद्धं कृत्वा केवलहानश्रवणे उपायनोपसंहार उक्तः। संप्रति विद्यायाः कर्महानिहेतुत्वं नास्तीत्याक्षेपसंगत्येदमाह—स. शि. वृ.

[१७. गतेरर्थवत्त्वाधिकरणम्]

१. गतेरर्थवत्त्वमुभयथाऽन्यथा हि विरोधः ३-३-२९

* हानावुपायनकल्पनवत् किमविशेषेणैव देवयानः पन्थाः निपतेत् ? उत विभागेन क्वचित्सन्निपतेत् , क्वचिन्न ? इति संशये—हानावुपायनवत् अविशेषेण सन्निपतेदिति प्राप्ते—

आह—गतेरर्थवत्त्वं उभयथा—विभागेन भवितुमर्हतीति । क्वचिद्भवति, क्वचिन्नेति । अन्यथा हि—अविशेषेण गतौ कल्प्यमानायां विरोधः स्यात् ; 'निरञ्जनः परमं साम्यमुपैति' (मु. ३-१-३) इत्यत्र निरञ्जनस्य गमनानुपपत्तेः ।। १ ।।

२. उपपन्नस्तल्लक्षणार्थोपलब्धेर्लोकवत् ३-३-३०

उपपन्नश्चायमुभयथाभावः । कुतः ? 'तल्लक्षणार्थोपलब्धेः'—तच्छब्देन गतिरुच्यते । तस्या गतेः उक्तलक्षणप्रयोजनोपलब्धेरित्यर्थः । सगुणासु विद्यासु गतिकारणभूतार्थप्रतिपत्तिरस्ति, न तु सम्यग्दर्शने तल्लक्षणार्थोपलब्धिरस्ति । 'लोकवत्' इति निदर्शनम् । यथा ग्रामप्राप्तौ मार्गापेक्षा, नारोग्यप्राप्तौ । एवमिहापि ।। २ ।।

[इति गतेरर्थवत्त्वाधिकरणम्]

———

* इत्थं प्रासङ्गिकं विद्योदयानन्तरमेव कर्महानमित्यभिधाय, यथा हानसन्निधौ क्वचिच्छ्रूयमाणमुपायनं सर्वत्रोपसंह्रियते, तथा हानसन्निधौ क्वचिच्छ्रूयमाणो देवयानः पन्थाः सर्वत्रोपसंहर्तव्य इति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

[१८· अनियमाधिकरणम्]

१. अनियमस्सर्वेषामविरोधः शब्दानुमानाभ्याम् ३-३-३१

* निर्गुणब्रह्मविद्यायां गतिर्नार्थवतीत्युक्ता। सगुणासु सार्थवती। किं पर्यङ्कविद्याप्रभृतिषु श्रूयमाणा मधुविद्यादिषु गतिश्रवणरहितासु सम्बध्यते? उत न? इति संशये, प्रकरणबलात् यत्र श्रुता सा तत्रैवास्त्विति प्राप्तौ—

राद्धान्तः—सर्वेषामुपासनानां देवयानः पन्था यत्र श्रुतः, स तत्रैवास्तु, नान्यत्रेति नियमो न ॥

नन्वेवमनियमाभ्युपगमे प्रकरणविरोध उक्तः—नैषोऽस्ति विरोधः। 'शब्दानुमानाभ्यां'—श्रुतिस्मृतिभ्यामित्यर्थः। 'तद्य इत्थं विदुर्ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' तेऽर्चिषमभिसंभवन्ति' (छा. ५-१०-१) इति श्रुतिः। अस्याः श्रुतेरयमर्थः—उपासका ये इत्थं पञ्चाग्नीनुपासते, ये चान्ये श्रद्धा तप इत्येवमादिधर्मयुक्ता उपासनान्तरेषु वर्तन्ते ते सर्वेऽपि अर्चिरादिमार्गं प्राप्नुवन्तीति। ततश्च मार्गप्रतिपादकवाक्येन प्रकरणं बाधितव्यम् ॥

स्मृतिरपि—'शुक्लकृष्णे गती ह्येते जगतः शाश्वते मते। एकया यात्यनावृत्तिमन्ययाऽऽवर्तते पुनः' (गी. ८-२६) इति नियमेन मार्गप्राप्तिं दर्शयति ॥ १ ॥

[इति अनियमाधिकरणम्]

---

* पूर्वं सगुणनिर्गुणविद्यासु मार्गस्य भावाभावव्यवस्था यथा उक्ता, तथा सगुणविद्यास्वपि व्यवस्थाऽस्त्विति दृष्टान्तसंगत्येदमाह—स· शि. वृ.

[१९. यावदधिकाराधिकरणम्]

१. यावदधिकारमवस्थितिराधिकारिकाणाम् ३-२-११

*सगुणायां विद्यायां चिन्तां कृत्वा निर्गुणायां चिन्तयति। ब्रह्मात्मैकविदुषां मुक्तिः किं पाक्षिकी? उत न इति संशयः। अपान्तरतमा नाम वेदप्रवर्तकाचार्यः व्यासरूपेण, सनत्कुमारः कार्तिकेयरूपेण जात इति ब्रह्मविदुषां पुनर्जननश्रवणात् पाक्षिकी मुक्तिरिति प्राप्ते—

अभिधीयते—न....यावदिति। न पाक्षिकी तेषामपान्तरतमप्रभृतीनां आधिकारिकाणां वेदप्रवर्तनादिस्थितिहेतुषु अधिकारेषु नियुक्तानां अधिकारतन्त्रा ह्यवस्थितिः। ते हि सत्यपि सम्यग्दर्शने कैवल्यहेतौ अक्षीणकर्माणो यावदधिकारमवतिष्ठन्ते। 'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' (छा. ६.१४-२) इति श्रुतेः। 'विद्याकर्मस्वनुष्ठानतोषितेश्वरचोदितम्। अधिकारं समाप्यैते प्रविशन्ति परं पदम्' इति ॥ १ ॥

[इति यावदधिकाराधिकरणम्]

—o—

* पूर्वं मुक्तिफलत्वान्निर्गुणविद्यायां मार्गो निरर्थकः, ब्रह्मलोकप्राप्तिफलत्वात् सुगुणविद्यायां मार्गः सर्वत्रार्थवानिति व्यवस्था कृता। सा न युक्ता। निर्गुणविदामपीतिहासादौ पुनर्जन्मदर्शनेन निर्गुणविद्यायाः मुक्तिसाधनत्वासंभवादित्याक्षेपसंगत्येदमाह—स. शि. वृ.

[२०. अक्षरध्यधिकरणम्]

१. अक्षरधियां त्ववरोधः सामान्यतद्भावाभ्यामौपसदव-त्तदुक्तम् ३-३-३३

* 'अस्थूलमनणु' (बृ. ३-८-८) इत्यादिनिषेधानां गार्गिब्राह्मणे ब्रह्मावबोधायाधीतानां, 'अशब्दमस्पर्शं' (क. ३-१५) इत्यादीनां कठवल्या-मधीतानां, किमुपसंहारः ? उत न ? इति संशये, श्रुतिविभागात् व्यवस्था प्राप्तौ—

उच्यते—अक्षरधियामिति । अक्षरविषया विशेषप्रतिषेधबुद्धयः सर्वत्रोपसंहर्तव्याः । कुतः ? 'सामान्यतद्भावाभ्यां'— समानो हि सर्वत्र विशेषनिराकरणरूपो ब्रह्मप्रतिपादनप्रकारः । 'तद्भावः'— तस्य ब्रह्मणः प्रतिपाद्यस्य भावः —स्वरूपमपि सर्वत्र एकरूपं प्रत्यभिज्ञायते । 'औप-सदवत्' इति निदर्शनम् । यथा जामदग्न्यहीनेषु पौरोडाशिनीषु उपस-न्नामधेयास्विष्टिषु पुरोडाशप्रदानमन्त्राणां 'अग्नेर्वैहोत्रं वेरध्वरम्' इत्यादी-नामुद्गातृवेदपठितानां अध्वर्युभिरभिसम्बन्धो भवति, एवमिहापीति ॥ १ ॥

[इति अक्षरध्यधिकरणम्]

---

* पूर्वं यथाऽऽधिकारिकपुरुषाणां आरब्धकर्मवशादेव देहान्तरारम्भसिद्धिः न सञ्चितकर्मान्तरस्य तद्धेतुत्वमित्युक्तम् ; तथेहापि तत्तद्वाक्योक्तैरेव निषेधैरुपलक्षणतया सर्वद्वैतनिषेधसिद्धिः न शाखान्तरीयनिषेधानां ब्रह्मधीहेतुत्वमिति दृष्टान्तसंगत्येदमाह
— स. सि. वृ.

[२१. इयदधिकरणम्]

१. इयदामननात् ३-३-३४

*'ऋतं पिबन्तौ' (क. १-३-१) इत्यत्र, 'द्वासुपर्णा सयुजा' (मु. ३-१-१) इत्यत्र च किं विद्ययोर्भेदः? उताभेदः? इति संशये—द्विवचनेन 'पिबन्तौ' इति जीवब्रह्मणोर्भोक्तृत्वस्यैकत्रावगमात्, अन्यत्र 'अनश्नन्नन्यो अभिचाकशीति' (मु. ३-१-१) इत्यभोक्तृत्वावगमाद्विद्याभेद इति प्राप्ते—

ब्रूमः—विद्यैकत्वमिति। कुतः? 'इयदामननात्'—इयत्ता परिच्छिन्नवेद्यस्यामननात् इत्यर्थः। उभयोरप्याम्नातयोः इयत्तापरिच्छिन्न-द्वित्वोपेतं वेद्यरूपमामनन्ति। 'द्वा सुपर्णौ' इति मन्त्रे तावत् 'अनश्न-न्नन्यो अभिचाकशीति' इति सोपाधिकमेवात्मनोऽन्तःकरणगतं भोक्तृत्वं निराक्रियते। ऋतपानमन्त्रेऽपि परमात्मनो बुध्युपाधिसम्बन्धात् जीवभाव-मापन्नस्य यत् कल्पितं भोक्तृत्वं, तत् परमात्मनोऽपि छत्रिन्यायेनोपचर्यत इति द्विवचनोपपत्तिः ॥ १ ॥

[इति इयदधिकरणम्]

---

* पूर्वं वेद्यस्याक्षरस्यैक्ये विद्यैक्यात् अक्षरधियामुपसंहार उक्तः। तर्हीह 'द्वासुपर्णौ' इति वाक्ये एकस्यैव भोक्तृत्वं, 'ऋतं पिबन्तौ' इति वाक्ये उभयो-रपीत्युभयत्र वेद्याभेदाद्विद्याभेद इति प्रत्युदाहरणसंगत्येदमाह—स.शि.वृ.

[२२. अन्तराधिकरणम्]

१. अन्तरा भूतग्रामवत् ३-३-३५

* 'यत् साक्षादपरोक्षाद्ब्रह्म' (बृ. ३-४-१, ३-५-१) इत्युषस्ति-ब्राह्मणे पठितं वाजसनेयिशाखायाम्। तस्यामेव कहोलब्राह्मणे 'य आत्मा सर्वान्तरः' (बृ. ३-४-१, ३-५-१) इतिपठितम्। तत्र किं विद्यैकत्वम्? उत विद्यानानात्वम्? इति संशये—पौनरुक्त्यपरिहाराय विद्याभेद इति प्राप्ते—

अभिधीयते—अन्तराम्नानाविशेषात् विद्यैकत्वमिति। सर्वान्तरो हि स्वात्मा सर्वत्राविशिष्टः। न ह्येकस्मिन् देहे द्वौ सर्वान्तरौ संभवतः। 'भूतग्रामवत्' इति निदर्शनम्। यथा 'एको देवः सर्वभूतेषु गूढः' (श्वे. ६-११) इति मन्त्रे एक एव सर्वभूतान्तरात्मा आम्नायते। एवमनयोरपि वाक्ययोरिति ॥ १ ॥

२. अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत् ३-३-३६

विद्यैकत्वे आम्नानभेदानुपपत्तिरिति चेत्—नैष दोषः—उपदेशान्तरवत् उपपत्तेः। यथा 'तत्त्वमसि' (छा. ६-८-७) इति नवकृत्वोऽभ्यासेऽपि न विद्याभेदः, तद्वदिहापि न विद्याभेदः ॥ २ ॥

[इति अन्तराधिकरणम्]

---

* पूर्वं पिबन्ताविति पदस्य लक्षणिकत्वेन वेद्यैक्याद्विद्यैक्यमभाणि। इह तु वेद्याभेदेऽपि न विद्याभेदः। 'समिधो यजति' इत्यादौ यजत्यभ्यासवत् आम्नाभ्यासादिति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

[२३. व्यतिहाराधिकरणम्]

१. व्यतिहारो विंशिषन्ति हीतरवत् ३-३-३७

* 'तद्योऽहं सोऽसौ योऽहम्' (ऐतरेय) इत्यैतरेयके श्रूयमाणवाक्ये देहेन्द्रियादिसाक्षी जीवो योऽहं, असौ रविमण्डलवर्ती परमात्मा, योऽसौ रविमण्डलवर्ती स एवाहं—इति किं व्यतिहारेणोभयरूपा मतिः कर्तव्या? उतैकरूपा? इति संशये—जीवस्येश्वरात्मत्वमस्तु, जीवस्योत्कृष्टतालाभात्; नेश्वरस्य जीवात्मत्वम्; निकृष्टताप्रसङ्गादिति प्राप्ते—

राद्धान्तः—व्यतिहारोऽयमाध्यानायाम्नायते। इतरवत्—यथेतरे गुणाः सर्वात्मत्वप्रभृतय आध्यानायाम्नायन्ते तद्वत्। तथाहि विंशिषन्ति समाम्नातारः। उभयोच्चारणेन त्वमहमस्मि, अहं त्वमसि—इति। तच्चोभयरूपायां मतौ कर्तव्यायामर्थवद्भवति। अन्यथैकेन कृतत्वादुभयाम्नानमनर्थकं स्यात्। यथा च देहादिरहितस्यापि परमेश्वरस्य हिरण्यश्मश्रुत्वादिगुणोपदेशेऽपि नापकर्षः, एवं वचनबलात्संसारित्वभावेऽपि न दोषः। यदि च व्यतिहारोपासनाबलात् जीवब्रह्मणोरेकत्वं दृढीभवेत्, तन्न निवार्यते॥ २॥

[इति व्यतिहाराधिकरणम्]

---

* पूर्वं—यथा अभ्यासस्यादरार्थत्वेन मतेरैक्यमवादि तथा व्यतिहारोपदेशस्यापि आदारार्थत्वात् मतेरेकरूपत्वमस्त्विति दृष्टान्तसंगत्येदमाह—स॰ वि॰ सु॰

[२४. सत्याद्यधिकरणम्]

१. सैव हि सत्यादयः ३-३-३८

*वाजसनेयके 'स यो हैतं महद्यक्षं प्रथमजं वेद सत्यं ब्रह्मेति स जयतीमान् लोकान्' (बृ. ५-४-१) इति पठित्वा पश्चात्पठ्यते 'तद्यत्सत्यमसौ स आदित्यः' (बृ. ५-५-२) इत्यादि। यक्षं—पूज्यं हिरण्यगर्भमित्यर्थः। तत्र किमेते द्वे विद्ये? उतैका? इतिसंशये—यक्षवाक्ये लोकजयस्य फलत्वात्, आदित्यवाक्ये 'पाप्मानं जहाति' (बृ. ५-५-३) इति पापक्षयस्य फलत्वात् विद्याभेद इति प्राप्ते—

सिद्धान्तः—सैवेति। एकैवेयं सत्यविद्या। कुतः? 'तत्सत्यं' इति प्रकृताकर्षणात्। 'हि' शब्देनायं हेतुस्सूचितः। पूर्वविद्यासम्बद्धमेव सत्यं उत्तरत्राकृष्यते ब्रह्मादित्यरूपेणेति सत्यविद्यैकत्वात् सर्व एव सत्यादयो गुणा एकस्मिन् प्रयोग उपसंहर्तव्याः॥

न च फलभेदो विद्याभेदकः; 'तस्योपनिषदहः' (बृ. ५-५-३) इत्यङ्गोपदेशस्याङ्गान्तरसूचकत्वात् पाप्मप्रहाणस्य॥ १॥

[इति सत्याद्यधिकरणम्]

---

* पूर्वं जीवब्रह्मणोर्व्यतिहारोक्तिभेदात् विद्याद्वैरूप्यं यथाऽभ्यधायि, तथैहापि सत्यविद्यायां 'लोकान् जयति' इति, तदनन्तरविद्यायां 'हन्ति पाप्मानं' इति उभयत्र लोकजयपापनिवृत्तिरूपफलोक्तिभेदात् विद्याभेद इति दृष्टान्तसंगत्येदमाह —स. शि. वृ.

[२५. कामाद्यधिकरणम्]

१. कामादीतरत्र तत्र चायतनादिभ्यः ३-३-३९

*छान्दोग्ये 'दहरोऽस्मिन्नन्तर आकाशः' (छा. ८-१-१) इति दहरगुणाः सत्यकामत्वादयो गुणाश्च श्रुताः। वाजसनेयके तु 'य एषोऽन्तर्हृदय आकाशः' (बृ. ४-४-२२) इत्यारभ्य हृदयाकाशगुणा उक्ताः। किमेते परस्परमुपसंह्रियन्ते? न वा? इति संशये साम्यबाहुल्येऽपि दहराकाशस्योपास्यत्वेन ज्ञेयत्वेन च हार्दाकाशस्योपदेशाद्विद्याभेदान्नोपसंहार इति प्राप्तौ—

आह—कामादीति। सत्यकामादिगुणजातं कामादीत्युच्यते। यथा सत्यभामा भामेति तद्वदयं निर्देशः। छान्दोग्ये श्रुतं सत्यकामादिगुणजातं इतरत्र—वाजसनेयके 'य एषोऽन्तर्हृदय आकाशः' इति योऽयं महानज आत्मा इति वेदितः, तेन सम्बध्यते। वाजसनेयकोक्तवशित्वादयः, तत्रैव दहराकाशे सम्बध्यन्ते। कुतः? आयतनादिभ्यो हेतुभ्यः। आयतनादीनामुभयत्र साम्यादित्यर्थः। उभयत्राकाशशब्दवाच्यस्यात्मन एकत्वात्। दहराकाशस्यात्मत्वं दहराधिकरणे साधितम्। हार्दाकाशस्य च 'स वा एष महानज आत्मा' (बृ. ४-४-२२) इत्युपक्रमवशादात्मत्वसंभवात् सगुणनिर्गुणत्वेन विद्याभेदेऽपि हार्दाकाशस्तुत्यर्थं सत्यकामत्वादिसम्बन्धः दहराकाशस्योपास्त्यै भविष्यति॥ १॥

[इति कामाद्यधिकरणम्]

---

*पूर्वं वेद्याभेदेन विद्यैक्यात् गुणोपसंहार इत्यभाणि। तद्वत्रापि छान्दोग्ये दहराकाशस्यैवोपास्यत्वात्, वाजसनेयके तु आकाशविशिष्टस्यात्मनः ज्ञेयत्वात् वेद्यभेदेन सगुणनिर्गुणविद्ययोर्भेदान्नोपसंहार इति प्रत्युदाहरणसंगत्येदमाह—स·शि·वृ.

[२६. आदराधिकरणम्]

१. आदरादलोपः ३-३-४०

* छान्दोग्ये वैश्वानरवाक्यशेषे 'स यां प्रथमामाहुतिं जुहुयात्तां जुहुयात् प्राणाय स्वाहा' (छा. ५-१९-१) इत्याहुतयः पठ्यन्ते। तत्र केनचिन्निमित्तेन प्राणाग्निहोत्रोपासकस्य भोजनलोपे प्राणाहुतिर्लुप्यते? न वा? इति संशये—

पूर्ववाद्याह—आदरादिति। अलोपः प्राणाहुतेः; कुतः? 'आदरात्'—'पूर्वोऽतिथिभ्योऽश्नीयात्' इत्यतिथिभोजनात्पूर्वं उपासकस्य भोजनं प्रतिपादयन्त्यां श्रुतौ प्राणाहुत्यादरदर्शनात्—इत्यर्थः ॥ १ ॥

सिद्धान्त्याह—

२. उपस्थितेऽतस्तद्वचनात् ३-३-४१

उपस्थिते भोजने, अतः—उपस्थितात् भोजनद्रव्यात् प्रथमोपनीतात् प्राणाग्निहोत्रं निर्वर्तयितव्यम्। कस्मात्? 'तद्वचनात्'—'तद्यद्भक्तं प्रथममागच्छेत्तद्धोमीयम्' (छा. ५-१९-१) इति हि भोजनार्थान्नस्य होमद्रव्यत्ववचनात्। भोजनलोपे द्रव्याभावादाहुतिलोपः। आदरस्तु भोजनपक्षे प्राथम्यविधानाय भविष्यति। तस्मात् भोजनलोपे प्राणाहुतिलोपः ॥ २ ॥

[इति आदराधिकरणम्]

———o———

* पूर्वं विद्याभेदेऽपि स्तुत्यर्थत्वेन गुणोपसंहारो यथाऽभ्यधायि, तथा भोजनलोपेऽपि पूर्वभोजनस्तुत्युपपत्त्यर्थं प्राणाग्निहोत्रलोप इति दृष्टान्तसंगत्येदमाह
—स. शि. वृ.

[२७. तन्निर्धारणाधिकरणम्]

१. तन्निर्धारणानियमस्तद्दृष्टेः पृथग्ध्यप्रतिबन्धःफलम् ३–३–४२

* 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा. १-१-१) इत्यादीनि यानि उद्गीथादिकर्माङ्गेषु प्रतिमादिवत् प्रतीकभूतेषु विधीयमानानि देवतोपासनानि कर्माङ्गोपासननियतानि स्युः? उत कर्मस्वनियतानि? इति संशये—

'यस्य पर्णमयी' इत्याद्यनारभ्याधीतजुह्वादेरिव 'य एवं विद्वानुद्गायति' 'य एवं विद्वान् साम गायति' (छा. १-७-७) इत्युद्गीथादिद्वारा क्रतुसम्बन्धोपपत्तेः कर्मसु नियतानीति प्राप्तौ—

आह—तन्निर्धारणानियम इति । तेषामुपासनानां कर्मस्वनियमः तन्निर्धारणानियमः । कुतः? 'तद्दृष्टेः'—तथा ह्यनियतत्वमेवैवंजातीयकानां दर्शयति श्रुतिः—'तेनोभौ कुरुतो यश्चैतदेवं वेद यश्च न वेद' (छा. १-१-१०) इति वाक्यशेषे उपास्त्यनाधारभूतेनाङ्गेन कर्मानुष्ठानं स्फुटतरं प्रतीयते ॥

किञ्चैवंजातीयकोपासनानां पृथगेव हि कर्मणः फलमुपलभ्यते । किं तत्? इत्यत आह—अप्रतिबन्धः—कर्मफलसिद्ध्यप्रतिबन्धः फलसमृद्ध्यतिशयः कश्चित्—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरम्' (छा. १-१-१०) इति तरप्प्रयोगात् विद्याविहीनस्यापि

---

* पूर्वमनित्यभोजनाश्रितप्राणाग्निहोत्रस्यानित्यत्वं यथा, तद्वन्नित्यकर्माङ्गाश्रितोपासनानां नित्यत्वमिति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

कर्मणो वीर्यवत्त्वावगमात् विद्यायुक्तस्य कर्मणः फलातिशयोऽस्तीति गम्यते। न चोपासनानां श्रुतं फलं परित्यज्य जुह्वादिवत् क्रत्वर्थता न्याय्या। अव्यापाररूपस्य फलसाधनत्वाभावात् व्यापारस्यैवोत्पत्तिमतः फलदर्शनादिति वचनात् फलसाधनत्वे सिद्धे जुह्वादीनां अव्यापारवतां फलाय क्रत्वर्थताऽन्याय्या। उपासनानां तु व्यापारात्मत्वेन स्वत एव फलसम्बन्धोपपत्तेः। 'चमसेनापः प्रणयेत्' इति विहिताप्प्रणयनाख्यकर्माङ्गमाश्रित्य विधीयमानगोदोहनाप्प्रणयनवत् पुरुषार्थत्वमुपपद्यते। ततश्च गोदोहनादिकं पुरुषार्थत्वादनियतम्। तथा कर्माङ्गान्याश्रित्य विधीयमानान्युपासनानि न नित्यनीति सिद्धम्॥ १॥

[इति तन्निर्धारणाधिकरणम्]

[२८. प्रदानाधिकरणम्]

१. प्रदानवदेव तदुक्तम् ३-२-४३

* छान्दोग्ये संवर्गविद्यायां अधिदैवं वायुरुपास्यत्वेन श्रुतः, अध्यात्मं प्राणः। तत्र संशयः—किं वायुप्राणानुचिन्तनमेकीकृत्य? उत पृथक्? इति॥

तत्र प्राणस्य वायुकार्यत्वे भेदाभावात् उभयोरेकीकरणेन चिन्तनमिति प्राप्ते—

पूर्वं फलभेदात् कर्माङ्गानां तदाश्रितोपासनानां च नित्यत्वानित्यत्वलक्षणः प्रयोगभेदोऽभाणि। तद्वदत्र वायुप्राप्तिलक्षणफलैक्यात् वायुप्राणयोः स्वरूपाभेदात् ध्यानप्रयोगाभेद इति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

उच्यते—प्रदानवदिति । पृथगेव वायुप्राणावुपगन्तव्यौ । प्रदानवदेव तदवगन्तव्यम् । यथा 'इन्द्राय राज्ञे पुरोडाशमेकादशकपालं, इन्द्रायाधिराज्ञे इन्द्राय स्वराज्ञे' इत्येतस्यां त्रिपुरोडाशिन्यामिष्टौ इन्द्रस्यैकत्वेऽपि राज्यादिगुणभेदात् पृथक् पुरोडाशप्रदानं क्रियते, एवं पृथगुपदेशात् अभेदेऽपि वायुप्राणयोः कार्यत्वेन कारणत्वेन वाऽवस्थाभेदात् पृथक्चिन्तनमेव न्याय्यम् । तदुक्तं मध्यममीमांसासङ्कर्षकाण्डे 'नाना वा देवतापृथग्भावात्' (जै सू.) इति ॥ १ ॥

[इति प्रदानाधिकरणम्]

[२९. लिङ्गभूयस्त्वाधिकरणम्]

१. लिङ्गभूयस्त्वात्तद्धि बलीयस्तदपि ३-३-४४

* 'षट्त्रिंशत्सहस्राण्यपश्यदात्मनोऽग्नीनर्कान् मनोमयान् मनश्चित्तः' (अग्निरहस्ये) इति वाजसनेयिनामग्निरहस्ये श्रूयते । अस्याश्चायमर्थः— 'शतायुर्वै पुरुषः' इति शतसंवत्सर आयुषि षट्त्रिंशत्सहस्रदिनानि भवन्ति । तत्र एकैकस्मिन् दिवसे या मनोवृत्तिः, तस्या एकैकाग्नित्वेन ध्याने सति ध्यातव्या अग्नयः षट्त्रिंशत्सहस्राणि संपद्यन्ते । ते च प्रत्यगात्मत्वेन ध्येया इति ॥

किमेते मनश्चिदादयः क्रियानुप्रवेशिनः ? उत स्वतन्त्रविद्यात्मकाः इति संशये, प्रकरणात् क्रियाऽनुप्रवेशे प्राप्ते—

---

* पूर्वं एकप्रयोगायोगात् वायुप्राणयोः प्रयोगभेदो गदितः; तर्हि मनश्चिदादीनां प्रकरणात् कर्माङ्गत्वेन एकप्रयोगसंभवात् प्रयोगभेद इति प्रत्युदाहरणसंगत्येदमाह —स. शि. वृ.

सिद्धान्तः—स्वतन्त्रविद्यात्मका इति । कुतः ? 'लिङ्गभूयस्त्वात्' । मनश्चिदादीनां स्वतन्त्रविद्यात्मकत्व एव—लिङ्गानां भूयस्त्वं—बाहुल्यं उपलभ्यते । 'तान् हैतानेवविदः सर्वदा सर्वाणि भूतानि विचिन्वन्त्यपि स्वपते' (अग्निरहस्ये) इत्येवंजातीयकानि । एवंविदे स्वपते चितानेनानग्नीन् सर्वदा सर्वाणि भूतानि विचिन्वन्तमपि यावज्जीवमविच्छेदेन नैरन्तर्यमत्र प्रतीयमानं विद्यास्वातन्त्र्ये लिङ्गम् । कर्मण्यपि यावज्जीवनैरन्तर्याभावात् । तच्छेषत्वे मनश्चिदादीनां नैरन्तर्यं न स्यात्, न तु प्रकरणात् कर्मशेषत्वं युक्तमिति—नेत्याह—तद्धि बलीय इति । तद्धि लिङ्गं प्रकरणाद्बलीयः । कथमेतदवगतमिति—तत्राह–तदपीति । तदप्युक्तं पूर्वस्मिन् काण्डे—'श्रुतिलिङ्गवाक्य—' (जै. सू. ३-३-१३) इत्यादिसूत्रे ।। १ ।।

पूर्ववाद्याह—

२. पूर्वविकल्पः प्रकरणात् स्यात् क्रियामानसवत् ३-३-४५

पूर्वस्य क्रियामयस्याग्नेः विकल्पः—विशेषोपदेश एवायं, न स्वतन्त्रा अग्नयोऽनन्यशेषभूताः । कुतः ? 'प्रकरणात्'—क्रियाप्रकरणात् प्रमाणात् क्रियाऽनुप्रवेशिता एव स्युः । लिङ्गन्तूदाहृतं संपादिकाग्निप्रशंसार्थत्वात् गुणवादेनाप्युपपद्यमानं प्रकरणं बाधितुं न समर्थम् । 'मानसवत्' इति निदर्शनम् । यथा समुद्रस्य सोमस्य प्रजापतये देवतायै गृह्यमाणस्य ग्रहणासादनादिकं मानसमाम्नातं प्रकरणात् क्रियाशेषमेव भवति तद्वत् ।। २ ।।

३. अतिदेशाच्च ३-३-४६

अतिदेशश्चायमग्नीनां क्रियाऽनुप्रवेशमेवोपोद्बलयति–' षट्त्रिंशत्सहस्राण्यग्नयोऽर्कास्तेषामेकैक एव तावान् यावानसौ पूर्वः' (अग्निरहस्ये)

इति । अत्र पूर्वेणेष्टकाग्निना सांपादिकानग्नीनुपदिशन् क्रियाऽनुप्रवेशमेषां दर्शयति ।। ३ ।।

सिद्धान्त्याह—

४. विद्यैव तु निर्धारणात् ३-३-४७

'तु' शब्दः पक्षं व्यावर्तयति । विद्यात्मका एवैते मनश्चिदादयोऽग्नयः स्युः, न क्रियाशेषभूताः । कुतः—'निर्धारणात्'। तथा हि निर्धारयति 'ते हैते विद्याचित एव' इति । 'विद्यया ह वै एवंविदश्चिता भवन्तीत्यर्थः ।। ४ ।।

५. दर्शनाच्च ३-३-४८

दृश्यते चैषां लिङ्गम् । तच्च 'लिङ्गभूयस्त्वात्' इत्यत्र-दर्शितम् ।। ५ ।।

ननु श्रुत्याद्यभावे लिङ्गमसमर्थमिति—तत्राह—

६. श्रुत्यादिबलीयस्त्वाच्च न बाधः ३-३-४९

श्रुतिलिङ्गवाक्यानां प्रकरणात् बलीयस्त्वात् ; अत्र च तेषां संभवात् विद्यात्मकत्वेन स्वातन्त्र्यपक्षस्य न बाधः । श्रुतिस्तावत् 'ते हैते विद्याचित एव' इति । लिङ्गं 'सर्वदा सर्वाणि भूतानि विचिन्वन्त्यपि स्वपते' इति । वाक्यमपि 'विद्यया है वैत एवं विदश्चिता भवन्ति' इति । श्रुतिलिङ्गवाक्यैः प्रकरणस्य बाधितत्वात् स्वतन्त्रविद्यात्मकत्वं मनश्चिदादीनाम् ।।

यत्तु लिङ्गस्य गुणवादत्वमुक्तम्—तदयुक्तम्—शब्दस्य विधेयभावेन कस्यचिद्विहितस्य प्रशंसायोगात्। अर्थवादसामर्थ्याद्विध्यनुमानपक्षे फलप्रतिपादकस्तावकवाक्यानां रात्रिसत्रन्यायेनाधिकारिसमर्पणपर्यवसानात् अशेषमप्येतद्ब्राह्मणं विधिरूपं भविष्यति। तदा विध्युद्देशगतत्वेन लिङ्गस्य प्राबल्यम् ॥ ६ ॥

७. अनुबन्धादिभ्यः प्रज्ञान्तरपृथक्त्ववद्दृष्टश्च तदुक्तम् ३-३-५०

अनुबन्धादिभ्यश्च हेतुभ्योऽपि प्रकरणमुपमृद्य स्वातन्त्र्यं मनश्चित्तादादीनां प्रतिपत्तव्यम्। अनुबध्यत इत्यनुबन्धः—अध्ययनग्रहग्रहणस्तवनशंसनादिक्रियाऽवयवसमूहस्य मनना दिव्यापारेष्वनुबन्धदर्शनात्—इत्यर्थः। 'मनसा वाऽऽधीयन्त मनसैव ग्रहा अगृह्यन्त मनसैवाशूयन्त' इत्यादिवाक्येषु हि सुमहाननुबन्धो दृश्यते ॥

किञ्च उद्गीथादिवत् क्रियाङ्गं किञ्चिदाश्रित्य तस्मिन्नदोनामाध्यासितव्यमिति वचनाभावात् क्रियाऽनुप्रवेशो न शक्यः कल्पयितुमित्याद्यनुबन्धादिहेतुभिर्मनश्चिदादीनां स्वातन्त्र्यं द्रष्टव्यम् ॥

यत्तूक्तमतिदेशात् इति—तदप्ययुक्तम्—'तेषामेकैक एव तावान् यावानसौ पूर्वः' इति क्रियाङ्गस्याग्नेर्माहात्म्यस्य ज्ञानमयानामग्नीनां एकैकस्यातिदेशात् ॥

मनश्चिदादीनां स्वातन्त्र्ये निदर्शनं—प्रज्ञान्तरपृथक्त्ववदिति। यथा प्रज्ञान्तराणि शाण्डिल्यविद्याप्रभृतीनि स्वेन स्वेनानुबन्धेनानुबध्यमानानि पृथगेव कर्मान्तरेभ्यः प्रज्ञान्तरेभ्यश्च स्वतन्त्राणि भवन्ति, एवमिहापि। दृष्टश्च राजसूयप्रकरणात् अवेष्टे उत्कर्षः। तदुक्तं प्रथमे काण्डे—'क्रत्वर्थायामिति चेन्न वर्णसंयोगात्' (जै. सू. ११-४-७) इति ॥ ७ ॥

८. न सामान्यादप्युपलब्धेर्मृत्युवन्न हि लोकापत्तिः ३-३-५१

यदुक्तं मानसवदिति तदयुक्तम्—कुतः ? 'न सामान्यादप्युपलब्धेः' —न मानसग्रहणसामान्यादपि मनश्चिदादीनां—क्रियाशेषत्वं कल्प्यम् ; पूर्वोक्तश्रुत्यादिभ्यः केवलपुरुषार्थोपलब्धेः । न हि मानसत्वसामान्यात् बहुतरवैषम्यं निवर्तते 'मृत्युवत्'—'यथा स एवायं मृत्युः य एतस्मिन्नन्तरे पुरुषः' इति 'अग्निर्वै मृत्युः' (बृ. ३-२-१०) इति चाग्न्यादित्यपुरुषयोः समानेऽपि मृत्युशब्दप्रयोगे नात्यन्तसाम्यापत्तिः ॥

यथा च 'असौ वाव लोको गौतमाग्निस्तस्यादित्य एव समित्' (छा. ५-४-१) इत्यत्र समिदादिसामान्यान्न लोकस्याग्निभावापत्तिः । तस्मान्मानसत्वेऽपि मनश्चिदादीनां मानससमुद्ग्रहसाम्याभावात् केवलविद्यात्मकत्वं, न क्रियाशेषत्वमिति सिद्धम् ॥ ८ ॥

* पूर्वोत्तरब्राह्मणयोः स्वतन्त्रविद्याविधानात् मध्यस्थस्यापि ब्राह्मणस्यास्य स्वतन्त्रविद्याविधिपरत्वमाह—

९. परेण च शब्दस्य ताद्विध्यं भूयस्त्वात्त्वनुबन्धः ३-३-५२

मानसिकाग्निब्राह्मणात् परेण ब्राह्मणेन शब्दस्य ताद्विध्यं चित्याग्नौ लोकदृष्टिरूपस्वतन्त्रविद्याविधित्वमेव प्रतीयते । चकारात् पूर्वेणापि ब्राह्मणेन मण्डलपुरुषोपास्तिरूपस्वतन्त्रविद्याविधित्वमेव दृश्यते । तत्सान्निध्यात् मध्यस्थेनापि ब्राह्मणेन मानसाग्नीनां स्वतन्त्रविद्यात्वं बोध्यम् । ननु तर्हि कस्मात् क्रियाग्निना सहपाठ इत्यत आह— भूयस्त्वात्त्वनुबन्धः । तुः शङ्का-

---

* कुण्डलितो भागः मातृकायामनुपलभ्यमानः, औचित्यात् सदाशिवब्रह्मेन्द्रवृत्तेः संयोजितः.

निरासार्थः । कर्माङ्गानां मानसाग्निविद्यायां संपाद्यानां बहुत्वात् विद्यायाः क्रियाग्निनाऽनुबन्धः—सहपाठः । तस्मादियं मानसाग्निविद्या स्वतन्त्र-पुरुषार्थहेतुरिति सिद्धम् ।। ९ ।।

[इति लिङ्गभूयस्त्वाधिकरणम्]

[३०. ऐकात्म्याधिकरणम्]

१. एक आत्मनः शरीरे भावात् ३-२-५३

* मनश्चिदादीनां क्रत्वर्थत्वं निराकृत्य पुरुषार्थत्वमुक्तम् । तत्र कोऽसौ पुरुषः ? इत्यपेक्षायां इदमधिकरणम् ।।

तत्र किं चैतन्यविशिष्टो देह आत्मा ? उत देहव्यतिरिक्तः कश्चित् ? इति संशये—पूर्ववादिनश्चार्वाका आहुः—एक आत्मन इति । एते—लोकायतिकाः देहव्यतिरिक्तस्यात्मनोऽभावं मन्यन्ते, तदुपलंभकप्रमाणाभावात् । अभावाख्यप्रमाणस्यैवात्माभावसाधकत्वमिति प्रतिज्ञैव हेतुगर्भा । शरीरे भावादित्यपरो हेतुः । चेष्टाप्राणचैतन्यस्मृत्यादीनां शरीरे सति भावात्, शरीरे चासत्यभावादित्यर्थः । चेष्टाया हिताहितव्यापारलक्षणायाः शरीराधीनतया दृश्यमानत्वात् तद्धर्मत्वं सिद्धम् । प्राणेऽपि श्वासप्रश्वासादिरूपः शरीरधर्मः ।।

यद्यपीच्छादीनामान्तरत्वम्, तथापि शरीरव्यतिरिक्ताश्रयस्यानुपलंभात्, सति शरीरे भावादेवान्तरशरीरात्मनि ते वेदितव्याः । अत्यन्ता-

---

* ननु विद्यायाः पुरुषार्थहेतुत्वमयुक्तम् : देहादिव्यतिरिक्तस्य पुरुषस्याभावादित्याक्षेपसंगत्येदमाह—स. शि. वृ.

प्रमितात्मकल्पनातः शरीरात्माभ्यन्तरप्रदेश एवेच्छादयः सन्तीति कल्पनस्यो-चितत्वात् । समस्तव्यस्तेषु पृथिव्यप्तेजोवायुषु चैतन्यादर्शनेऽपि शरीरा-कारपरिणतेषु चैतन्यमुपपद्यते, क्रमुकनागवल्लीचूर्णानां मेलनेन मदशक्तिवत् । 'अहं' इति चानुभवेऽपि देह एव गौराद्याकारः प्रथते । तस्मात् देह एवात्मेति प्राप्ते—

सिद्धान्त्याह—

२. व्यतिरेकस्तद्भावाभावित्वान्न तूपलब्धिवत् ३-३-५४

न त्वव्यतिरिक्तः, किन्तु व्यतिरिक्त एवात्मा देहात् । कुतः ? 'तद्भावभावित्वात्'—चेष्टादीनां शरिरगतरूपादिवत् मृतावस्थायां शरीर-भावेऽप्यभावित्वात् । न हि संख्यापरिमाणादिवत्—इच्छादयः सामान्य-गुणाः, येन यावद्देहभाविनोऽपि संयोगादेरिव देहधर्मत्वनियमः स्यात् । ततश्च रूपादिवच्चैतन्यादिर्यदि विशेषगुणः शरीरे स्यात्, तर्हि एते भूत-विशेषगुणाः रूपादयः यथा यावद्भूतभाविनः, तथैवेच्छादयो यावद्भूत-भाविनो भवेयुः ; न चैवमुपलभ्यन्ते । तस्माद्यस्यैते अधिष्ठानात् देहधर्मा इवाभान्ति, स देहातिरिक्त आत्मा । चेष्टाप्राणचैतन्येच्छादीनां अदृष्टा-धीनत्वे, तस्यापि विशेषगुणत्वात् यावदाश्रयसत्त्वमनुवर्तेतेति मृतावस्थायामपि भावात् न प्राणाद्यभावोपपादकं स्यादिति अदृष्टव्यपाश्रयभूतो देहव्यतिरिक्तो बुद्ध्याद्युपाधिकः प्रत्यगात्मैवाश्रयः स्यात् ॥

'उपलब्धिवत्' इति दृष्टान्तोपादानम् । उपलब्धिग्राहिण एव प्रमाणादुपलब्धिरूपस्यात्मनोऽपि शरीरव्यतिरेको गम्यते । तस्यास्तु स्वयं प्रकाशप्रत्ययेन भूतधर्मेभ्यो वैलक्षण्येन व्यतिरेकनिश्चयात् कथं स्वयंप्रकाशत्वं प्रत्यय उच्यते । भूतधर्मा रूपादयो विषयत्वाज्जडा एव दृष्टाः, न तु विषयिणः । न च केषांचिद्विषयाणां विषयित्वं भविष्यतीति वाच्यम्,

स्वात्मनि वृत्तिविरोधात् । सर्वेषां जडत्वे जगदान्ध्यप्रसङ्गात् । तस्मा-द्विषयिण उपलब्धेर्ज्ञानरूपत्वात् स्वयंप्रकाशत्वमङ्गीकर्तव्यम् । उपलब्धि-स्वरूपश्च न आत्मा, 'विज्ञानमानन्दं' (बृ. ३-९-२८) इत्यादिश्रुतेः । न चाप्रत्यक्षप्रमाणत्वमिति वक्तुं युक्तम्, विकल्पासहत्वात् । किमनुमाना-दीनामप्रामाण्यं प्रत्यक्षेणावगम्यते? अनुमानाद्वा । नाद्यः; यस्मादिदं प्रत्यक्षं इयतो लिङ्गस्वरूपतद्व्यभिचारतदप्रामाण्यादिपरिच्छेदात् कर्तुं न समर्थम् । द्वितीये, प्रमाणान्तराभ्युपगमेन तदप्रामाण्योक्तिर्विरुद्धा स्यात् । पशुरपि तृणादीनामिष्टानिष्टसाधनत्वमनुमाय प्रवर्तते—इत्यनुमानमनङ्गीकुर्वन् पशोरपि पशुश्चार्वाकः । शब्दप्रामाण्यानङ्गीकारे च मूकत्वं चार्वाकस्य स्यात् ॥

किञ्चायं न प्रत्यक्षेण योगव्याघ्रवदन्वयव्यतिरेकाभ्यां देहादव्यतिरेक आत्मनोऽवगम्यते । चार्वाकोदाहृतं तु प्रत्यक्षं भ्रान्तम्; मम देह इत्यादिप्रत्ययेन बाधितत्वात्, देहोऽहमिति प्रत्यक्षाभावाच्च । तस्मात् स्वर्गापवर्गसिद्ध्यर्थं काण्डद्वयोक्तधर्मज्ञानयोः त्तिसिद्धये च देहव्यतिरिक्त आत्मा सिद्धः ॥ २ ॥

[इति ऐकात्म्याधिकरणम्]

——o——

[३१. अङ्गावबद्धाधिकरणम्]

१. अङ्गावबद्धास्तु न शाखासु हि प्रतिवेदम् ३–३–५५

* 'ओमित्येतदक्षरमुद्गीथमुपासीत' (छा. १-१-१) इत्युद्गीथा-दीनां शाखान्तरपठितानां स्वरभेदात् वेदे, 'लोकेषु पञ्चविधं सामोपासीत'

* पूर्वं यथाशरीरात्मनोर्भेदात् आत्मधर्मस्य शरीरे न संभवः, तद्वत् एक-शाखागतोद्गीथाद्यपेक्षया शाखान्तरगतोद्गीथादेः स्वरभेदेन भेदादेकशाखागतोद्गीथादि-धर्माणां शाखान्तरगतोद्गीथादौ न संभव इतिदृष्टान्तसंगत्येदमाह—स. शि. वृ.

इति पृथिव्यादिषु लोकेषु पृथिव्यादिदृष्ट्या 'पृथिवी हिंकारोऽग्निः प्रस्तावोऽन्तरिक्षमुद्गीथ आदित्यः प्रतिहारो द्यौर्निधनम्' इति कर्माङ्गोद्गीथादित्यादिप्रत्यया यत्र श्रुतास्तत्र भवेयुः ? किं वा शाखान्तरोक्तोद्गीथादिष्वपीति संशयः। तत्र यथा शरीरात्मनोर्भेदात् आत्मधर्माणां शरीरे न संभवः एवमेकशाखागतोद्गीथादिधर्माणां न भिन्नान्यशाखागतोद्गीदौ प्राप्तिः। सन्निधिबलात् स्वशाखागतोद्गीथादिष्वेवादित्यादिप्रत्ययसंभवात् ॥

तथैवैतरेयकगतोक्थ्यशस्त्रे पृथिवीदृष्टिरपि तत्रैव पर्यवस्यति, न कौपीतकीशाखागतोक्थ्यशस्त्रे पृथिवीदृष्टिर्न गच्छतीति प्राप्ते—

राद्धान्तः—अङ्गावबद्धास्त्विति। 'तु'शब्दः पक्षं व्यावर्तयति। नैते अङ्गावबद्धाः प्रत्ययाः प्रतिवेदं स्वशाखास्वेव व्यवतिष्ठेरन्, अपि तु सर्वशाखास्वनुवर्तेरन्। कुतः ? उद्गीथादिश्रुत्यविशेषात्। स्वशाखाव्यवस्थायां 'उद्गीथमुपासीत' इति सामान्यश्रुतिरविशेषप्रवृत्ता सती तद्विशेषे प्रवृत्ता बाधिता स्यात्। न चैतन्न्याय्यम्, सन्निधेः श्रुतिर्बलीयसीति ॥ १ ॥

२. मन्त्रादिवद्वाऽविरोधः ३-३-५६

मन्त्राणां गुणानां कर्मणां च शाखान्तरोत्पन्नानामपि यथा शाखान्तरोपसंहारो दृश्यते, तथोद्गीथादिष्वन्यत्र विहिताः प्रत्यया भवन्तीति नात्र विरोध आशङ्कयितव्यः। येषां 'कुटरुदसि' इत्ययं मन्त्रो नाम्नातः, तेषामपि 'कुक्कुटोऽसीत्यश्मानमादत्ते कुटरुदसीति वा' इति विनियोगः पठ्यते। येषां प्रयाजा नाम्नाताः, तेषामपि गुणविधिराम्नायते—'ऋतवो

वै प्रयाजाः समानत्र होतव्याः ' इति । तस्मादेवमादिकर्माङ्गानुवृत्तिवत् कर्माश्रितप्रत्ययानामनुवृत्तिरिति सिद्धम् ।। २ ।।

[इति अङ्गावबद्धाधिकरणम्]

[१२· भूमज्यायस्त्वाधिकरणम्]

१. भूम्नः क्रतुवज्ज्यायस्त्वं तथाहि दर्शयति ३-३-५७

* वैश्वानरविद्यायां वैश्वानरस्य विराट्पुरुषस्य द्युलोकसूर्यवाय्वाकाशोदकपृथिव्यो मूर्धचक्षुःप्राणमध्यशरीरमूत्रस्थानरूपेषु ध्यातव्या अवयवा निरूपिताः ' तस्य ह वा एतस्य ' (छा. ५-१८-२) इत्यादिना समस्तमपि रूपमुक्तम् । तत्र किं व्यस्तोपासनं समस्तोपासनं च कर्तव्यम्? किं समस्तोपासनमेव? इति संशये—' दिवमेव भगवो राजन्नुवाच ' (छा. ५-१२-१) इति प्रत्येकमुपासनाश्रुतेः, प्रत्येकं फलवत्त्वाम्नानाच्च, समस्तोपासने च फलवत्त्वश्रुतेरुभयोपासनाप्राप्तौ—

सिद्धान्तः—भूम्न इति । भूम्नः सकलावयवोपचयात्मकस्य सर्वस्य वैश्वानरोपासनस्य ज्यायस्त्वं भवितुमर्हति, न प्रत्येकमवयवोपासनानामपि । ' क्रतुवत् '—यथा क्रतुषु दर्शपूर्णमासप्रभृतिषु सामस्त्येन साङ्गप्रधानप्रयोग एवैको विवक्ष्यते, न व्यस्तानामपि प्रयाजादीनाम्, नाप्येकदेशाङ्गयुक्तस्य

---

* पूर्वं यथा उद्गीथादिश्रुत्या सन्निधिप्राप्तव्यवस्थां बाधित्वोद्गीथाद्युपास्तीनां सर्वशाखासु व्यवस्थास्थापिता, तद्वदिहापि व्यवस्था व्यस्तोपास्तीनां विधिश्रुत्या समस्तोपास्तिसन्निधिप्राप्तस्तुत्यर्थत्वं बाधित्वेति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

प्रधानस्य, तद्वत् । कुत एतत् भूमैव ज्यायानिति ? तत्राह—तथाहि-दर्शयतीति । श्रुतिः भूम्नो ज्यायस्त्वं दर्शयति, उपक्रमोपसंहाराभ्यामेकत् वाक्यत्वावगमात् । उपक्रमे तावत् 'को नु आत्मा किं ब्रह्म' (छा. ५-११-१) इति कृत्स्नमेवोपास्यत्वेन विचारयितुं प्रकृतम् । उपसंहारेऽपि 'तस्य ह वा' (छा. ५-१८-२) इत्यादिना समस्तोपासनं विस्पष्टं प्रतीयते । ततश्चावयवोपासनाङ्गीकारे वाक्यभेदः प्रसज्येत ॥

यत्तु अवयवोपासनाफलश्रवणं तस्माच्तव सुतं प्रसुतमासुतं कुलमित्यादिवत् कैमुतिकन्यायेनावयवोपासनं स्तुत्यर्थं भविष्यति । 'मूर्धा ते व्यपतेत्' (छा. ५-१२-२) इत्याद्यवयवोपासनानिन्दाश्रवणानर्थक्यप्रसङ्गात् विरूपाख्तिफलाय वाक्यभेदः सुतरां न युक्तः । तस्मात् वैश्वानरविद्यायां समस्तोपासनं सिद्धम् ॥ १ ॥

[इति भूमज्यायस्त्वाधिकरणम्]

[३३. शब्दादिभेदाधिकरणम्]

१. नाना शब्दादिभेदात् ३-३-५८

* छान्दोग्योदितदहरविद्या शाखान्तरपठिताशाण्डिल्यविद्यामधुविद्यादयः किं समस्तोपासनार्हा ? न वा ? इति संशये—वेद्यस्य ब्रह्मण एकत्वात् विद्यैक्येन समस्तोपासनप्राप्तौ—

---

* पूर्वं यथा व्यस्तोपास्तिषु विधिश्रुतीनां सत्त्वेऽपि समस्तोपास्तेरेव ज्यायस्त्वमुक्तं, तथैकोपास्यकोपास्तिषु प्रत्येकं विधीनां सत्त्वेऽपि समस्तोपास्तेरेव ज्यायस्त्वमिति नास्ति विद्यानां भेद इति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

राद्धान्तः—नानेति। वेद्याभेदेऽपि एवंजातीयका विद्या नाना भवितुमर्हति इति एतान्युपासनानि न समस्योपासिष्यन्ते, किन्तु प्रत्येकम्। कुतः? 'शब्दादिभेदात्'—भवति हि शब्दभेदः—'वेद' 'उपासीत' 'क्रतुं कुर्वीत' इत्यादिशब्दभेदो हि पुरस्तात् कर्मभेदहेतुरधिगतः—'शब्दान्तरे कर्मभेदः कृतानुबन्धत्वात्' इति। एवमिहापि विद्याभेदहेतुर्भवति॥

आदिग्रहणात् गुणादयोऽपि यथासंभवं भेदहेतवोऽवगन्तव्याः॥

ननु 'यजति' 'ददाति' इत्यादौ यथाऽर्थभेदेनानुबन्धभेदात् शब्दभेदोपपत्तिः कर्मभेदहेतुर्भवति। 'वेद' 'उपासीत' इत्यादौ शब्दभेद एवावगम्यते, न त्वर्थभेदः—नैष दोषः—मनोवृत्त्यर्थाभेदेऽप्यनुबन्धभेदात् वेद्यभेदे सति विद्याभेदोपपत्तेः। गुणभेदेन वेद्यब्रह्मभेदोपपत्तेः न विद्यैक्यं समस्योपासनाकारणम्॥ १॥

[इति शब्दादिभेदाधिकरणम्]

[३४. विकल्पाधिकरणम्]

२. विकल्पोऽविशिष्टफलत्वात् ३-३-५९

* स्थिते विद्याभेदे विचार्यते—शाण्डिल्याद्युपासनेषु किमनियमः? विकल्पनियमो वा? इति संशये—समानफलेषु स्वर्गादिसाधनेषु कर्मस्विव अनियमप्राप्तौ—

---

* पूर्वत्र विद्यानानात्वे सिद्धे किलायं विचारः प्रवर्तत इति हेतुहेतुमद्भाव संगत्येदमाह—स. शि. वृ.

राद्धान्तः—विकल्प इति । विकल्पनियम एवासां भवितुमर्हति, न तु यथा काम्यानुष्ठानम् । कस्मात्? 'अविशिष्टफलत्वात्'—शाण्डिल्यादिविद्यायां उपास्यसाक्षात्करणस्य फलस्य अविशिष्टत्वात्—एकत्वात् ईश्वरसाक्षात्कारस्यैकेन कृतत्वात् अन्यानर्थक्यात् एकमुपासनं परित्यज्योपासनान्तरे प्रवर्तमानस्य चित्तविक्षेपेनात्मतत्वभावायोगाच्च विकल्पनियामकात्मानर्थक्यविक्षेपावेवेति तात्पर्यार्थः ॥ १ ॥

[इति विकल्पाधिकरणम्]

[३५. काम्याधिकरणम्]

१. काम्यास्तु यथाकामं समुच्चीयेरन्न वा पूर्वहेत्वभावात् ३-३-६०

* अहंग्रहोपासनेषु शाण्डिल्यविद्यादिष्विव 'स यो नाम ब्रह्मेत्युपास्ते' (छा. ८-१-५) इत्यादिकाम्यासु प्रतीकोपासनासु किं विकल्पः स्यात्? उत यथाकाम्यम्? इति संशये—पूर्वन्यायेन विकल्पप्राप्तौ—

राद्धान्तः—काम्यास्त्विति । 'तु' शब्दः पक्षं व्यावर्तयति । काम्याः—प्रतीकोपासनाः यथाकामं समुच्चीयेरन् । बहूनि समुच्चित्य यथाकाम्येन प्रतीकमुपासितव्यं, न वा समुच्चीयेरन्—विकल्पेनैकमेवोपासितव्यम् । कुतः? 'पूर्वहेत्वभावात्'—ब्रह्मसाक्षात्कारस्य फलस्या-

---

* पूर्वं अहंग्रहोपास्तीनां विकल्पेनैवानुष्ठेयत्वमभाणि, तद्वदुपास्तित्वाविशेषात् प्रतीकोपास्तीनामपि विकल्पेनैवानुष्ठेयत्वं स्यादिति दृष्टान्तसंगत्येदमाह—स·शि·वृ.

भावादित्यर्थः । 'देवो भूत्वा देवानप्येति' (बृ. ४-१-२) इति जीवः देवताभावनाप्रकर्षवशात् देवताभावसाक्षात्कारं प्राप्य मृतः देवत्वमुपेत्य 'यावन्न मनोगतं तत्रास्य यथाकामचारो भवति' (छा. ७-१-५) इति नामब्रह्मोपासनाफलभोगश्रवणात् । किं यस्य स्यादद्धा न विचिकित्साऽस्ति (छा. ३-१४-४) इत्यादिशाण्डिल्यविद्यादिषु साक्षात्कारफले यथा प्रमाणं, न तथा प्रतीकोपासनानां ब्रह्मसाक्षात्कारफलत्वे प्रमाणमस्ति । तस्मान्नान्यानर्थक्यविक्षेपप्रसङ्गाभावात् यथाकाम्यानुष्ठानं सिध्यति ।। १ ।।

[इति काम्याधिकरणम्]

———

[३६. यथाश्रयभावाधिकरणम्]

१. अङ्गेषु यथाऽऽश्रयभावः ३-३-६१

* लौकिकेषु प्रतीकेषु निर्णयमुक्त्वा इदानीं कर्माङ्गावबद्धेषु निर्णयः क्रियते ।।

उद्गीथाश्रयाः प्रत्ययाः किं समुच्चीयेरन् ? किं वा यथाकामं स्युः ? इति संशये—पूर्ववाद्याह—अङ्गेष्विति । अङ्गेषु—उद्गीथादिषु यथैषामाश्रयभूतेषु भावः, आश्रयस्य भावः, भवनं—भावः ; यथैषामाश्रयाः स्तोत्रादयः संभूय भवन्ति, एवं प्रत्यया अपि, आश्रयतन्त्रत्वाच्चेषाम् ।। १ ।।

---

* पूर्वं यथा प्रतीकोपास्तीनां स्वतन्त्रत्वाद्यथाकाममनुष्ठानं, न तथेहाङ्गाश्रितोपास्तीनां अङ्गतन्त्रत्वादिति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

२. शिष्टेश्च ३-३-३२

यथा स्तोत्रशास्त्रादयः त्रिषुवेदेषु शिष्यन्ते, तथा प्रत्यया अपि, नैषां कश्चिद्विशेषोऽस्ति ।। २ ।।

३. समाहारात् ३-३-६३

किञ्च यस्मात् सर्ववेदोदितप्रत्ययोपसंहारः श्रुत्या सूचितः, तस्मात् समाहर उपसंहारमादधातीति किं तदित्यत आह—दुरुक्तमपि वेदान्तरोदितो-द्गीथौद्गात्रकर्मण्युत्पन्नं क्षतमिति अस्मिन् वाक्ये वेदान्तरोदितप्रत्ययसमाहार दर्शनात् सूत्रोक्तमुपपन्नम् ।। ३ ।।

४. गुणसाधारण्यश्रुतेश्च ३-३-६४

यदीमे कर्मगुणा उद्गीथादयः सर्वे सर्वप्रयोगसाधारणा न स्युः, तस्मात् तदाश्रयाणां प्रत्ययानां सहभावः । ते तूद्गीथादयः सर्वाङ्गग्राहिणा प्रयोगवचनेन सर्वप्रयोगसाधारणा इति आश्रयः सहभावः ।। ४ ।।

एवं पूर्वपक्षे प्राप्ते सिद्धान्त्याह—

५. न वा तत्सहभावाश्रुतेः ३-३-६५

'वा' इति पक्षान्तरं व्यावर्तनम् । यथाश्रयभावः आश्रितानां उपासनानां भवितुमर्हति । कुतः? 'तत्सहभावाश्रुतेः'—यथा हि त्रिवेदविहि-तानां अङ्गानां स्तोत्रादीनां सहभावः श्रूयते—'ग्रहं वा गृहीत्वा चमसं-वोन्नीय स्तोत्रमुपाकरोति स्तोत्रमनुशंसति प्रस्तोतः साम गाय होतरेतद्यज' इत्यादौ, नैवमुपासनानां समुच्चयो विकल्पो वेति सिद्धम् ।। ५ ।।

६. दर्शनाच्च ३–३–६६

दर्शयति च श्रुतिः असहभावं प्रत्ययानाम्—'एवं विद्ध वै ब्रह्म यज्ञं यजमानः सर्वांश्चर्त्विजोऽभिरक्षति' (छा.४-१७.१०) इति श्रुतौ सर्वप्रत्ययोपसंहारे हि सर्वे सर्वविद इति न ब्रह्मणा परिपाल्यत्वं यजमानादीनामयुक्तं स्यात् ॥ ६ ॥

[इति यथाश्रयभावाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

तृतीयाध्यायस्य

तृतीयः पादः

तृतीयाध्यायस्य

चतुर्थः पादः

[१. पुरुषार्थाधिकरणम्]

१. पुरुषार्थोऽतश्शब्दादिति बादरायणः ३-४-१

पूर्वं परापरब्रह्मविद्यानां गुणोपसंहारनिरूपणेन परिमाणं निरूपितम्। संप्रति कर्मनिरपेक्षाणामेव तासां पुरुषार्थे साधनत्वं निरूप्यते* ॥

किं आत्मविज्ञानं क्रत्वर्थम्? उत पुरुषार्थम्? इति संशये—सिद्धान्तेनारभते—पुरुषार्थोऽत इति। 'अतः'—वेदान्तविहितादेवात्मविज्ञानात् स्वतन्त्रात् पुरुषार्थः सिद्ध्यतीति बादरायण आचार्यो मन्यते। कुतः? 'शब्दात्' इत्याह। तथा हि—'तरति शोकमात्मवित्' (छा. ७ १-३) 'स यो ह वैतत्परमं ब्रह्म वेद ब्रह्मैव भवति। (मु. ३-२-९) इत्येवजातीयका श्रुतिः केवलाया विद्यायाः पुरुषार्थहेतुत्वं दर्शयति ॥ २ ॥

अत्राह पूर्ववादी—

२. शेषत्वात्पुरुषार्थवादो यथाऽन्येष्विति जैमिनिः ३-३-२

कर्तृत्वेनात्मनः कर्मशेषत्वात् तद्विज्ञानमपि व्रीहिप्रोक्षणादिवत् विषयद्वारेण कर्मसम्बन्ध्येवेत्यतः पुरुषस्यात्मविज्ञाने शोकनिवृत्त्यादिः फलं सोऽर्थ-

---

*कर्मनिरपेक्षाणामेव तासां विद्यानां पुरुषार्थसाधनत्वं वक्तुं, यज्ञादीनि बहिरङ्गानि शमादीन्यन्तरङ्गानि च निरूप्यन्त इति शेषः॥ पूर्वाधिकरणेन च प्रसङ्गसंगतिर्बोध्या ॥

वाद इति जैमिनिराचार्यो मन्यते। यथा अन्येषु—द्रव्यसंस्कारकर्मसु 'यस्य पर्णमयी जुहूर्भवति' इत्येवमादिषु फलश्रुतिरर्थवादः तद्वत् ॥ २ ॥

३. अचारदर्शनात् ३-४-३

सनकादीनां ब्रह्मविदामपि कर्मानुष्ठानपुत्राद्यनुशासनाद्याचरदर्शनात् आत्मज्ञानं कर्मशेषभूतमिति गम्यते ॥ ३ ॥

४. तच्छ्रुतेः ३-४-४

'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा. १-१-१०) इति कर्मशेषत्वं ज्ञानस्य श्रूयते ॥ ४ ॥

५. समन्वारंभणात् ३-४-५

'तं विद्याकर्मणी समन्वारभेते' (बृ ४-४-२) इति फलारंभे विद्याकर्मणोः साहित्यदर्शनाच्च न विद्यायाः स्वातन्त्र्यम् ॥ ५ ॥

६. तद्वतो विधानात् ३-४-६

'आचार्यकुलाद्वेदमधीत्य यथाविधानं गुरोः कर्मातिशेषेणाभिसमावृत्य कुटुम्बे शुचौ देशे स्वाध्यायमधीयानः' छा. ८-१५-१) इति समस्तवेदार्थविज्ञानवतः कर्मानुष्ठानविधानाच्च न स्वातन्त्र्यं विद्यायाः ॥ ६ ॥

७. नियमाच्च ३-४-७

*['कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः' (ई. २) इत्यादिकात् यावज्जीवं कर्माचारनियमाच्च ब्रह्मविद्यायाः कर्मशेषत्वमेवेत्यर्थः] ॥६॥

---

* कुण्डलितो भागः मातृकायां गलितः सदाशिववृत्तेः पूरितः ।

*[एवं प्राप्ते सिद्धान्तः]—

८. अधिकोपदेशात्तु बादरायणस्यैवं तद्दर्शनात् ३-४-७

'तु'शब्दात् पक्षो विपरिवर्तते । यदुक्तं शेषत्वादर्थवाद इति ।—तन्नोपपद्यते । कस्मात्? 'अधिकोपदेशात्'—कर्तुर्भोक्तुः देहव्यतिरिक्तस्यात्मनो ज्ञानं वेदान्तेषूपदिश्येत, ततः विद्यायाः कर्मशेषत्वं स्यात् । न चैवमस्ति । किं तर्हि? अधिकोपदेश एव दृश्यते । जीवस्य कर्तृत्वादिकं निरस्यापेतब्रह्मक्षत्रादिकं रूपं परमेश्वरस्वरूपाधिकरूपब्रह्मभावोपदेशात् तज्ज्ञानं कर्मणां निवर्तकमेव, न प्रवर्तकम्—इत्येवं ज्ञानस्य स्वातन्त्र्यं सिद्धमिति अधिकरणारम्भोक्तं भगवतो बादरायणस्य यन्मतं तत्तत्रैवावतिष्ठते ॥

ननु शेषत्वादिभिः पारतन्त्र्यमस्तीति—नेत्याह—तद्दर्शनादिति । वेदान्तेषु जीवस्य कूटस्थस्याविकारिणो विज्ञानानन्दब्रह्मात्मत्वमेव, उपक्रमादितात्पर्यलिङ्गसद्भावात्, तात्पर्येणोपदिश्यमानं दृश्यत इत्यर्थः । अतः आत्मनः कर्तृत्वभावात् ज्ञानस्य क्रियाशेषत्वाभावात् शेषत्वादयो हेत्वाभासाः ॥ ८ ॥

९. तुल्यं तु दर्शनम् ३-४-९

यदुक्तं आचारदर्शनात् कर्मशेषो विद्येति, तस्योत्तरमिदम् । तुल्यमाचारदर्शनम्, अकर्मशेषत्वेऽपि विद्यायाः; 'एतावद् खल्वमृतत्वम्' (बृ. ४-५-१५) इत्युक्त्वा याज्ञवल्क्यः प्रवव्राज । 'एतं वैतमात्मानं विदित्वा ब्राह्मणः पुत्रैषणायाश्च वित्तैषणायाश्च लोकैषणायाश्च व्युत्थायाथ

---

* कुण्डलितो भागः संपादकेन पूरितः ।

भिक्षाचर्यं चरन्ति ' (बृ. ३-५-१) इत्यादौ न विद्यायाः कर्मशेषत्वविनियोजकं प्रकरणादिकमस्ति ॥ ९ ॥

ननु यदेवेत्यादिवाक्यं विनियोजकं—नेत्याह—

१०. असार्वत्रिकी ३-४-१०

' यदेव विद्यया करोति ' (छा. १-१-१०) इति श्रुतिः न सार्वत्रिकी —न सर्वविद्याविषया, प्रकृतोद्गीथविद्याविषयत्वात् ॥ २० ॥

११. विभागः शतवत् ३-४-११

नापि विद्याकर्मणोः साहित्यदर्शनात् अस्वातन्त्र्यं विद्यायाः । कुतः ? यतो विभागस्तत्रापि भवति; विद्या अन्यं पुरुषमारभते, कर्म अन्यमिति । ' शतवत् '—यथा ' शतमाभ्यां दीयताम् ' इत्युक्ते विभज्य दीयते—पञ्चाशदस्मै, अन्यस्मै पञ्चाशदिति, तद्वत् ॥ २२ ॥

१२. अध्ययनमात्रवतः ३-४-१२

' आचार्यकुलात् वेदमधीत्य ' (छा. ८-१५-१) इत्यध्ययनमात्रश्रवणात् अध्ययनमात्रवत एव कर्मविधिः, न तूपनिषदध्ययनवतः । कर्मावबोधपर्यन्तं यदध्ययनं, तत् कर्मसूपयुज्यते, नोपनिषदध्ययनम् , तदध्ययनस्य कर्मस्वनुपयोगादिति तात्पर्यार्थः ॥ २२ ॥

१३. नाविशेषात् ३-४-१३

' कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः ' (ई २) इत्यादिवाक्येषु विदुष इति विशेषाभावात् अविद्यावद्विषयं तद्वाक्यम् ॥ २३ ॥

यदि विद्वद्विषयं, तत्राह—

१४. स्तुतयेऽनुमतिर्वा ३-४-१४

यद्यपि प्रकरणसामर्थ्यात् विद्वद्विषयं 'कुर्वन्नेव' इत्यादिवाक्यम्, तथापि विद्यास्तुतये कर्मानुज्ञानमेव द्रष्टव्यम्, 'न कर्म लिप्यते नरे' (ई. २) —इति । अस्याः श्रुतेरयमर्थः—यावज्जीवं कर्म कुर्वत्यपि विदुपि कर्मलेपो न भवतीति ॥ २४ ॥

१५. कामकारेणचैके ३-४-१५

किञ्च ब्रह्मात्मैकत्वविद्यायाः प्रत्यक्षफलत्वात् कर्मणः स्वकालान्तरफलत्वात् न क्रियाशेषत्वं विद्यायाः । यत् एके—विद्वांसः कर्मकारेण—इच्छया प्रत्यक्षीकृतविद्याफलावष्टंभेन फलान्तरसाधनप्रजादिकं परित्यक्तवन्तः । तथा च श्रुतिः—'एतद्ध स्म वैतत्पूर्वे विद्वांसः प्रजां न कामयन्ते किं प्रजया करिष्यामो येषां नोऽयमात्माऽयं लोकः' (बृ. ४-४-२२) इति । अस्याः श्रुतेरयमर्थः—तदेतद्ब्रह्मविद्वांसः प्रजा न कामयन्ते । कुत इत्यपेक्षायामाह—किं प्रजयेति । येषां नः—अस्माकं अयं—अपरोक्ष आत्मा, अयं लोकः प्रत्यक्षफलं, ते वयं किं प्रजया करिष्याम इति निश्चित्य अग्निहोत्रं न हुतवन्त इति ॥ १५ ॥

१६. उपमर्दं च ३-४-१६

किञ्च ब्रह्मविद्यायां समस्तक्रियाकारकफलविभागोपमर्दमामनन्ति—'यत्र त्वस्य सर्वमात्मैवाभूत्' (बृ. २-४-१४) इत्यादिषु । तस्मात् ब्रह्मात्मैक्यज्ञानस्य क्रियाशेषत्वे कर्मणामुच्छित्तिरेव स्यात् ॥ १६ ॥

१७ ऊर्ध्वरेतस्सु च शब्दे हि ३-४-१७

ऊर्ध्वरेतस्सु चाश्रमेषु हि ब्रह्मविद्या श्रूयते । न च तत्र कर्माङ्गत्वम्, परमहंसाश्रमाणां कर्माभावात् । ननु ऊर्ध्वरेतस आश्रमा न श्रूयन्त इति— नेत्याह—'शब्दे हि' इति । ऊर्ध्वरेतस आश्रमाः शब्देऽवगम्यन्ते— 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' (बृ. ४-४-२२) इत्यादौ । तस्मात् न ब्रह्मज्ञानं कर्माङ्गमिति सिद्धम् ।। १७ ।।

[इति पुरुषार्थाधिकरणम्]

[२. परामर्शाधिकरणम्]

१. परामर्शं जैमिनिरचोदना चापवदति हि ३-४-१८

* अस्याधिकरणस्य पूर्वाधिकरणान्तरसूत्रेणाक्षेपलक्षणा सङ्गतिः ।।

'त्रयो धर्मस्कन्धाः' (छा. २-२३ १) 'ये चेमेऽरण्ये श्रद्धा तप इत्युपासते' (छा. ५-१०-१) 'सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति' (छा. २-२३-१) 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' (बृ. ४-४-२२) इत्यादिषु वेदान्तेषु संशयो भवति—किमूर्ध्वरेतसां परमहंसाश्रमाणां प्रतीतिरस्ति? उत न? इति ।

पूर्ववाद्याह—परामर्शं जैमिनिरिति । न ह्येते वेदान्ताः ऊर्ध्वरेतसामाश्रमाणां सद्भावं प्रतिपादयन्ति । कुतः? यतः परामर्शेषु शब्देषु

---

* पूर्वं त्रयो धर्मस्कन्धाः इत्यादिश्रुतिः यत्याश्रमसद्भावे प्रमाणमित्यभाणि; तदसंभवीत्याक्षेपसंगत्येदमाह—स शि.वृ

आश्रमाणां जैमिनिराचार्यो मन्यते, न विधिम्। प्रणवाख्यस्य ब्रह्मणः प्रस्तुतत्वात् तत्स्थत्वप्रशंसार्थोऽयमाश्रमान्तराणां परामर्शः 'सर्व एते पुण्यलोका भवन्ति ब्रह्मसंस्थोऽमृतत्वमेति' (छा. २-२३-१) इति ॥

किञ्च नात्र लिङ्गादीनां अन्यतमश्चोदनाशब्दोऽस्तीत्याह—अचोदना चेति। स्मृत्याचारप्रसिद्धिश्च तेषां प्रत्यक्षश्रुतिविरोधादप्रमाणमित्याह—अपवदतीति। 'वीरहा वा एष देवानां योऽग्निमुद्वासयते' (तै. सं. १-५-२) इति सन्यासः प्रत्यक्षश्रुत्या विरुध्यते। श्रुतिविरोधे च स्मृत्याचारयोः 'विरोधे त्वनपेक्षं स्यात्' (जै. सू. १-३-३) इत्यप्रामाण्यमुपपादितम्। 'एतमेव प्रव्राजिनो लोकमिच्छन्तः प्रव्रजन्ति' (बृ. ४-४-२२) इति लोकसंस्तवोऽयं. न पारिव्राज्यविधिः। 'ब्रह्मचर्यादेव प्रव्रजेत्' (जा. ८) इत्यादि कर्मानधिकृतान्धपङ्ग्वादिविषयं वेदितव्यम्। तस्मान्नान्तराश्रमाणां परिव्राजकानां प्राप्तिः ॥ १ ॥

इति प्राप्ते—सिद्धान्त्याह—

२. अनुष्ठेयं बादरायणः साम्यश्रुतेः ३-४-१९

अनुष्ठेयमाश्रमान्तरं परमहंसपरिव्राजकाभिधेयमिति बादरायण आचार्यो मन्यते, वेदे श्रवणात्। अग्निहोत्रादीनां चावश्यानुष्ठेयत्वात् तदनधिकृतान्धपङ्ग्वाद्यनुष्ठेयमितीमां मतिं निराकरोति गार्हस्थ्यवदेवाश्रमान्तरमिच्छता प्रतिपत्तव्यमिति मन्यमानः। कुतः? 'साम्यश्रुतेः'—समा हि गार्हस्थ्येनाश्रमान्तरपरामर्शश्रुतिर्दृश्यते। 'त्रयो धर्मस्कन्धाः' (छा. २-२३-१) इत्यादिश्रुतौ यज्ञादिलिङ्गको गृहस्थाश्रम एकः धर्मस्कन्धः प्रतीयते। 'तपः' इति तपः प्रधानो वानप्रस्थाश्रमो द्वितीयः। 'ब्रह्मचार्याचार्यकुलवासी' इति तृतीयः। 'ब्रह्मसंस्थोऽमृतत्वमेति' इति परिशेषात् ब्रह्मसंस्थः परि-

त्राडेव प्रतीयत इति वक्ष्यते। ततश्चान्यपरादपि गृहस्थादिवत् भिक्षुरपि देवताधिकरणन्यायेन प्रतीयत एव ॥

न च प्रत्यक्षश्रुतिविरोधः ; 'वीरहा वा' इत्यादेः प्रतिपन्नगार्हस्थ्यं प्रमादादज्ञानाद्वा अकुर्वन्तं प्रत्युपपत्तेः। एवञ्च विरोधे सिद्धे तत्परामर्शादाश्रमाणां शास्त्रान्तरविधिं कल्पयिष्यामः। यथा उपवीतविधिपरे वाक्ये 'उपव्ययते देवलक्ष्ममेव तत्कुरुते' इत्यत्र, 'निवीतं मनुष्याणां प्राचीनावीतं पितृणाम्' इति शास्त्रान्तरसिद्धयोर्निवीतप्राचीनावीतयोः परामर्शः ॥

न चान्धाद्यनधिकृतविषयः सन्न्यास इति युक्तं वक्तुम् ; 'पुनरव्रती वा व्रती वा स्नातकोवाऽस्नातको वोत्सन्नाग्निरनग्निको वा यदहरेव विरजेत्तदहरेव प्रव्रजेत्' (जाबाः ४) इति गार्हस्थ्याधिकृतानां पृथक् सन्न्यासविधानात् ॥ २ ॥

एवं तावत् 'त्रयो धर्मस्कन्धाः' (छा. २-२३-१) इत्यादीनामनुवादत्वमङ्गीकृत्यानुवादसामर्थ्यात् शास्त्रान्तरं परिकल्प्य तस्मादाश्रमान्तरसिद्धिमुपपाद्येदानीं, एषां नानुवादकत्वं, किं तर्हि ? अपूर्वार्थप्रतिपादकत्वाद्विधायकत्वमेवेत्याह—

३. विधिर्वा धारणात् ३-४-२०

विधिर्वाऽयमाश्रमान्तरस्य, न परामर्शमात्रम्। यद्यपि पुण्यलोकफलास्त्रयो धर्मस्कन्धाः, ब्रह्मसंस्थता त्वमृतत्वफलेति ब्रह्मसंस्थत्वश्रुतिविषयतयैकवाक्यत्वं न परिव्राजकाश्रमान्तरविधित्वम्—तथापि स्वाश्रमान्तराणां पूर्वसिद्धेरभावेन परामर्शानुपपत्तेः, अपरामर्शे च स्तुतेरसंभवेनैकवाक्यत्वस्यैवायोगादपूर्वत्वाद्विध्यन्तरस्य चादर्शनात् विस्पष्टानाश्रमान्तरप्रत्ययाच्च गुणवादकल्पनायोगात् विधायकत्वमेव ॥

'धारणवत्' इति निदर्शनोपन्यासः। यथा महापितृपक्षे 'अधस्तात्समिधं धारयन्ननुद्रवेदुपरि हि देवेभ्यो धारयति' इत्यत्र सत्यामप्यधोधारणेनैकवाक्यताप्रतीतौ विधेयान्तरमुपरिधारणं, अपूर्वत्वात्। तदुक्तं—'विधिस्तु धारणेऽपूर्वत्वात्' (जै. सू. ३-४-१५) इति—तद्वत् इहाप्याश्रमपरामर्शश्रुतेर्विधिरेवेति कल्प्यते ॥ ३ ॥

[वर्णकान्तरम्]

अथवा एतदधिकरणमन्यथा योज्यते। प्रथमे वर्णके चतुर्णामाश्रमाणां 'त्रयो धर्मस्कन्धाः' (छा. २-२३-१) इत्यत्रानुवादः। तत्सामर्थ्यादन्यत्र विधिः, इहैव वा विधिरित्युक्तम्। इदानीमाश्रमान्तराणां वाक्यान्तरप्राप्तानामनुवादेन ब्रह्मसंस्थता श्रूयते, श्रुतिसामर्थ्याच्च सैव विधीयत इति प्रतिपाद्यते ॥

तत्र किं प्रकृतानां गृहस्थादीनां मध्ये कश्चित् ब्रह्मसंस्थ इत्युच्यते? उताप्रकृतपरिव्राट् ब्रह्मसंस्थः? इति संशये, पूर्ववाद्याह—

१. परामर्शं जैमिनिराचोदना चापवदति हि ३—४—१७

तपश्शब्देन वैखानसग्राहिणा परिव्राजकस्य परामर्शं जैमिनिराचार्यो मन्यते। भिक्षुरपि शौचाष्टग्रासादिभोजननियमाद्वानप्रस्थवत्तपःप्रधानः। तपश्शब्देन परिव्राजकस्यापि ग्रहणेन चतुर्णामाश्रमाणां प्रकृतत्वेऽपि 'त्रयः' इति निर्देशोऽपि घटते। तपश्शब्देन वानप्रस्थसन्यासिनोरेकीकरणेन त्रित्वस्यापि संभवात्। एवञ्च सति त्रयोऽप्याश्रमा अब्रह्मसंस्थाः सन्तः पुण्यलोकभाजो भवन्ति। यः पुनरेतेषु ब्रह्मसंस्थः, सोऽमृतत्वमेतीति जैमिनिमते श्रुत्यक्षरान्वयः ॥

न च गृहस्थादीनां ब्रह्मसंस्थत्वनिषेधोऽप्यस्तीत्याह— अचोदना चेति। किञ्च 'ब्रह्मणि संस्था अस्य' इति सर्वनामश्रुतिः प्रकृतस्य सर्वस्य ब्रह्मसंस्थत्वं वदति, अप्रकृतस्य परिव्राजकस्य ग्रहणमपवदति। तस्मान्नाप्रकृतः परिव्राट् ब्रह्मसंस्थः ॥ १ ॥

इति पूर्वपक्षे प्राप्ते सिद्धान्त्याह—

२. अनुष्ठेयं बादरायणः साम्यश्रुतेः ३-४-१९

न गृहस्थादीनां ब्रह्मसंस्थता संभवति, यतस्तैः प्रत्येकमसाधारणत्वेन विहितं कर्मजातमेवानुष्ठेयमिति बादरायण आचार्यो मन्यते। 'यज्ञोऽध्ययनं दानं' इति गृहस्थः परामृष्टः। 'तपः' इति वनस्थानां, 'आचार्यकुलवासी' इति ब्रह्मचारिणां परामर्शः। एवञ्च सत्यसाधारणधर्मेणोपसंहारेऽपि ब्रह्मसंस्थत्वलक्षणासाधारणधर्मसाम्यश्रुतेः ब्रह्मसंस्थत्वेनैवासाधरणधर्मेण यतीनामेव ग्रहणं युक्तम्। असाधारणेन यज्ञादिनोपक्रमः, साधारणेन तपसोपसंहारश्चेति न तपः सन्यासिवनस्थयोः साधारणम्। तत्तु वनस्थस्यैवासाधारणो धर्मः। 'ग्रीष्मे पञ्चाग्निमध्यस्थः' इत्यादिना हि तपो नामस्मृतिप्रसिद्धं वानप्रस्थस्यैव विहितम्। नचाष्टग्रासनियमादिकं तपः, तथा सति द्वात्रिंशद्ग्रासादिनियमेन गृहस्थादेरपि तपस्वित्वं प्रसज्येत। न चाष्टग्रासादिकमपि तपः, वृद्धैः शौचादीनां तपसो भेदेन निर्देशात् 'शौचसन्तोषतपःस्वाध्यायेश्वरप्रणिधानानि नियमः' इति। तस्मात् न 'त्रयो धर्मस्कन्धाः' इत्यत्र परिव्राजकतापरामर्शः ॥

यस्तु पूर्वपक्षिणा श्रुत्यक्षरान्वय उक्तः—सोऽपि वैरूप्यप्रसङ्गान्नोपपद्यते। तथा हि—'तत्र यः' इति भिक्षुं विहाय यदा गृहस्थादय उच्यन्ते, तदा वक्तव्यं—तपश्शब्देन भिक्षुर्गृह्यते? न वा? इति ॥

यदि गृह्यते—ततस्तापसेन सह भिक्षोरेतदपि ग्रहणात् 'एते' इत्यस्यापि परामृष्टत्वात् 'त्रयः' इतिशब्देन भिक्षुं वर्जयित्वा ते न गृहीतुं शक्यन्ते ।।

अथ न तपश्शब्देन भिक्षुः संगृह्यते ; 'त्रयः' इति शब्देन भिक्षुसहिता निर्दिश्यन्ते—तदा ह्येतच्छब्दपरामृष्टानां त्रयाणां पुण्यलोकभाक्त्वाभिधानादपि पुण्यलोकभाक्त्वं स्यात् । तच्चायुक्तम्, तस्य ब्रह्मसंस्थत्वनियमात् ।।

अथ मतं ब्रह्मसंस्थस्यैव पुण्यलोकभाक्त्वमपि स्यादिति—तन्न—वैरूप्यप्रसङ्गात् । गृहस्थादीनां विहितकर्मानुष्ठानासक्त्या ब्रह्मसंस्थायाः कादाचित्कत्वात् । यदा ब्रह्मसंस्था, तदाऽमृतत्वं यान्तीति योजनीयम् । भिक्षोस्तु स्वाश्रमव्यवधायकमिति श्रवणाद्यासक्तानामपि तेषां ब्रह्मसंस्थत्वहेतुत्वान्नित्यत्वेन ब्रह्मसंस्थायाः सदा ब्रह्मसंस्थोऽमृतत्वमेतीति योजनीयमिति । ततश्च न भिक्षोरप्रकृतत्वेन परामर्शायोगात् । गृहस्थादीनां विहितकर्माकरणे प्रायश्चित्तस्मरणात् ब्रह्मसंस्थत्वायोगात् । परिशेषप्रमाणादप्रकृतः परिव्राट् ब्रह्मसंस्थ इति लभ्यते ।।

यत्तु गृहस्थादीनां निषेधाभावात् ब्रह्मसंस्थत्वसंभव इति—तदयुक्तम्—निषेधाभावेऽपि कालासंभवात् । कादाचित्कब्रह्मसंस्थयाऽमृतत्वासंभवाच्च । परिव्राजकस्य ब्रह्मसंस्थताव्यतिरेकेण कर्तव्यान्तराभावात् । स्वाङ्गश्रवणादीनां तदव्यवधायकत्वात् सर्वदा ब्रह्मसंस्थता संभवति । 'अरुन्मुखान् यतीन् सालावृकेभ्यः प्रायच्छम्' (कौ. ३-१) इति विपर्ययनिन्दाश्रवणाच्च । 'ग्रन्थमभ्यस्य मेधावी ज्ञानविज्ञानतत्परः । पलालमिव धान्यार्थी ग्रन्थमशेषतः' इति व्यापारान्तरनिवारणाच्च ।।

यत्तु ब्रह्मणि संस्था अस्येत्यत्र सर्वनामश्रुतिरप्रकृतपरिव्राजकस्य ब्रह्मसंस्थत्वं वारयतीति—तदयुक्तम् – सत्ययौगिकः शब्दः सति प्रकृतिसंभवे न तदतिक्रम्याप्रकृते वर्तितुमर्हति । असति तु संभवे मा भूत् प्रमादपाठ इत्यप्रकृते वर्तयितव्यः । दर्शितश्चात्र संभवोऽधस्तात् । पूर्वस्तिष्ठतिरपि समाप्तिवचनः । अन्यनिष्ठतया हि ब्रह्मणि समाप्तिर्न स्यात्, अन्यत्रापि व्यासक्तत्वादिति । इह च ब्रह्मसंस्थशब्दो भिक्षौ पङ्कजादिशब्दवत् योगरूढः । अश्वकर्णादिशब्दवत् केवलरूढत्वे सन्यासाश्रमप्राप्तिमात्रेणामृतीभाव इति न तद्भावाय ब्रह्मज्ञानमपेक्षेत । तदनपेक्षायां च 'नान्यः पन्था विद्यते' (श्वे. ३-८) इत्यादिवचनविरोधः ।। २ ।।

नन्वेवमपि यज्ञोपवीतशिखापरित्यागो न घटते, तद्धारणस्य विहितत्वादिति नैकदण्डपरमहंसपरिव्राजकाश्रमसिद्धिरिति—नेत्याह—

३. विधिर्वा धारणवत् ३-४-२०

यथा यज्ञोपवीतादीनां श्रौतस्मार्तकर्मानुष्ठानाङ्गभूतानां धारणे विधिः, एवं कर्मसन्याससमये यज्ञोपवीतादिपरित्यागेऽपि विधिरस्त्येव । 'वा' शब्द एवकारार्थः । तथा च आथर्वणिकाः पठन्ति 'सशिखं वपनं कृत्वा बहिस्सूत्रं त्यजेद्बुधः' इति । न चात्र शिखासहितं यथा भवति तथा मुण्डनमिति शिखारक्षणं कर्तुं वाक्यम्; 'अग्नेरिव शिखा नान्या यस्य ज्ञानमयी शिखा । स शिखीत्युच्यते विद्वान् नेतरे केशधारिणः । ज्ञानमेव परं तेषां पवित्रं' इत्यादिवाक्यशेषे शिखां व्यावर्त्य ज्ञानस्यैव शिखात्वादिसंपादनात् ।।

त्रिदण्डादीनामपि कर्माङ्गानां गायत्रीजपादिकर्माङ्गत्वात् तत्त्यागेनैव सह त्यागस्मरणात् न त्रिदण्डसन्यासिनां ब्रह्मसंस्थत्वं भवति । 'त्रिदण्डं कुण्डिकां चैव सूत्रं चाथ कपालिकाम् । जन्तूनां वारणं वस्त्रं सर्वं भिक्षुः

परित्यजेत् ।। कौपीनाच्छादनार्थं तु वासोऽस्य परिग्रहम् । कुर्यात् परमहंसस्तु दण्डमेकं तथैव च ' इति काण्वायनस्मृतावपि ब्रह्मसंस्थत्वोपयोगिशौचमन्तोषस्वशरीरोपभोगश्रवणादिव्यतिरिक्तसर्वपरित्यागिनां परमहंसभिक्षूणां 'काममेकं वैणवं दण्डं ' इत्यादिश्रुतिप्रामाण्यात् ब्रह्मसंस्थत्वसंभव उक्तः ।।

'परमहंसा नाम त्रिदण्डकमण्डलुशिक्यजलपवित्रपादुकासनशिखायज्ञोपवीतकपालानां त्यागिनः ' । 'तेषां न धर्माधर्मौ वा न सत्यं नापि चानृतम् । सर्वसहाः सर्वसमाः समलोष्टाश्मकाञ्चनाः । ' 'यथोपपन्नभैक्षाहाराः चातुर्वर्ण्यं भैक्षाचर्यं चरन्त आत्मानं मोक्षयन्ते ' इति विष्णुकाण्वायनस्मृत्योश्च शिष्टपरिगृहीतयोः अनाप्तप्राणीतत्वं शङ्कमानस्य भास्करस्य क्षपणकपादावनतशिरोबिम्बस्य सर्वसंकरवादिनः स्वकीयब्राह्मणत्वेऽप्यनीशः स्यात् ।।

व्यासस्मृतावप्येतदुक्तम्—'यज्ञोपवीतं कर्माङ्गं वदन्त्युत्तमबुद्धयः । उपकुर्वाणकात्पूर्वं यतो लोके न दृश्यते । यावत्कर्माणि कुरुते तावदस्यैव धारणम् । तस्मादस्य परित्यागं क्रियते कर्मभिस्सह । अग्निहोत्रविनाशे तु जुह्वादीनि यथा त्यजेत् । यथा च मेखलादीनि गृहस्थाश्रमवाञ्छया । पत्नीयोक्त्रं नरेष्टयन्ते सोमान्ते च यथा ग्रहाः । तद्वद्यज्ञोपवीतस्य त्यागमिच्छन्ति योगिनः ' इति ।।

कल्पसूत्रकारैरपि सन्यासकल्पप्रकरणे—यज्ञोपवीतादिपरित्यागो मन्त्रोच्चारणपूर्वक उक्तः ।।

लैङ्गपुराणेऽपि 'निकृत्य सशिखान् केशान् उपवीतं विसृज्य च । पञ्चभिर्जुहुयादप्सु भूःस्वाहेति च वा क्रमात् ' इति ।।

'अथ परिवाट् विवर्णवासा मुण्डोऽममोऽपरिग्रहः शुचिरद्रोही भैक्षाणो ब्रह्मभूयाय भवति' इत्यादिश्रुतिरपि परमहंसपरिव्राजकस्य ब्रह्मसंस्थत्वं दर्शयति ।।

तस्मात् सिद्धा ऊर्ध्वरेतस आश्रमाः ; सिद्धं चोर्ध्वरेतस्सु विधानात् विद्यायाः स्वातन्त्र्यमिति ।। ३ ।।

[इति परामर्शाधिकरणम्]

[३. स्तुतिमात्राधिकरणम्]

१. स्तुतिमात्रमुपादानादिति चेन्नापूर्वत्वात् ३-४-२१

* 'स एष रसानां रसतमः' (छा. १-१-३) इत्यादिषु उद्गीथावयवस्योङ्कारस्य रसतमत्वादयो गुणाः श्रूयन्ते । किमिदं रसतमत्वादिकं स्तुतिः? उत विधेयम्? इति संशयः ।।

पूर्वाधिकरणे साम्यश्रुतेराश्रमान्तस्य विधेयत्वमङ्गीक्रियते । न तथेह रसतमत्वादिकं विधेयम्, उद्गीथादिकर्माङ्गमुपादाय श्रवणादिति चेत्—न—कुतः? 'अपूर्वत्वात्'—विध्यर्थतायां ह्यपूर्वोऽर्थो विहितो भवति । स्तुत्यर्थतायां चानर्थक्यमेव स्यात् । स्तुतित्वे च प्रकरणादिनैकवाक्यत्वं प्रयोजकम् । यथाऽऽहुः—'विधिना त्वेकवाक्यत्वात् स्तुत्यर्थेन विधीनां स्युः'

---

* पूर्वं यथाऽनुष्ठेयाश्रमसाम्यश्रुतेः परिव्राजस्यानुष्ठेयत्वं प्रतिष्ठापितम्, तद्वत् 'इयमेव जुहूरादित्यः' इत्यादिकर्माङ्गस्तुत्या रसतमत्वादिवाक्यस्य साम्यात् स्तुतिमात्रत्वमिति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

इति । न च कर्मप्रकरणपठितोद्गीथादिना उपनिषदि पठितानां रसतमादीनामेकवाक्यत्वम् ।। १ ।।

२. भावशब्दाच्च ३-४-२२

'उद्गीथमुपासीत' (छा. १-१-१) 'अहमुक्थमस्मीति विद्यात्' इत्यादिभावशब्दात्—विधिशब्दादप्युद्गीथाद्युपासनाविध्यर्था उद्गीथादिश्रुतयः ।। २ ।।

[इति स्तुतिमात्राधिकरणम्]

[४. पारिप्लवाधिकरणम्]

१. पारिप्लवार्था इति चेन्न विशेषितत्वात् ३-४-२३

* पूर्वाधिकरणे रसतमत्वादिकमङ्गनिष्ठमपि न स्तुतिः किमङ्ग वक्तव्यम् अनङ्गस्माविद्ययोस्तुतयोरित्युक्तम् (?) । तद्वन्निष्ठानां विद्याशेषत्वं विहाय पारिप्लवप्रयोगशेषत्वं असङ्गतमित्याशङ्क्यास्मिन्नधिकरणे निराक्रियते ।।

'जनको ह वैदेह आसाचक्रे' (बृ. ४-१-१) इत्याद्याख्यानविशेषाः किं पारिप्लवार्थाः? उत ब्रह्मविद्यास्तुत्यर्थाः? इति संशयः । तत्र अश्वमेधे रात्रिषु राजानं शकटमारोप्य तस्याग्रे वैदिकानामाख्यानानामध्वर्युणो-

---

* पूर्वं यथा रसतमत्वादेरुद्गीथादिस्तुत्यर्थत्वापेक्षयोपास्यविषयसमर्पकत्वस्य ज्यायस्त्वं, तथाऽऽख्यायिकानामपि विद्यास्तुत्यर्थत्वापेक्षया पारिप्लवशेषत्वस्य ज्यायस्त्वमस्त्विति दृष्टान्तसंगत्येदमाह —स. शि. वृ.

दीरणं पारिप्लवः । तदर्थाः सर्वा आख्यायिकाः इति चेत्—न—कुतः? 'विशेषितत्वात्'—अश्वमेधे प्रथमेऽहनि मनुर्वैवस्वतो राजेत्याह, द्वितीयेऽहनि यमो वैवस्वतो राजेत्याह तृतीयेऽहनि वरुण आदित्य इत्याह—इत्यादिवाक्यैराख्यानानि विशेष्यन्ते । आख्यानसामान्यत्वे सर्वगृहीतिः स्यात् इत्यनर्थकमेव विशेषणं स्यात् ॥

एवञ्च विधिश्रुत्याऽवच्छेदिकया सर्वश्रुतौ भग्नदर्पायां निर्णयः सन्निधिविद्यास्वौपनिषदाख्यानानि सन्नियुञ्जीतेत्याह—

२. तथा चैकवाक्यतोपबन्धात् ३–४–२४

असति पारिप्लवार्थत्वे आख्यानानां सन्निहितविद्याप्रतिपादनोपयोगितैव न्याय्या, एकवाक्यतोपबन्धादेव—एकवाक्यतयोपबन्धादित्यर्थः । कथाप्रतिपादकग्रन्थानामिव आख्यानानां प्ररोचनाहेतुत्वेन 'सोऽरोदीत्' (तै.सं. १-५) इत्यादीनामिव विधिशेषत्वं सिद्धम् ॥२॥

[इति पारिप्लवाधिकरणम्]

[५. अग्नीन्धनाद्यधिकरणम्]

१. अत एव चाग्नीन्धनाद्यनपेक्षा ३–४–२५

* किं ब्रह्मविद्यायाः मोक्षसाधनभूतायाः सहकारित्वेन कर्मापेक्षाऽस्ति? उत नास्ति? इति संशये—'यज्ञेन' (बृ. ४-४-२२) इति श्रुतविविदिषा-

* पूर्वं यद्वदाख्यायिकानां विद्याशेषत्वेनापेक्षा, तद्वद्यज्ञादिकर्मणामपि फले विद्याशेषत्वेनापेक्षाऽस्त्विति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

ङ्गत्वे पुरुषेच्छाविषयत्वायोगान्मोक्षस्य निर्मृष्टनिखिलदुःखरूपस्य तदिच्छाविषयत्वासंभवाच्च यज्ञादीनां साक्षान्मोक्षसाधनत्वेनान्वयसंभवात् ज्ञानस्य कर्मापेक्षाऽस्तीति प्राप्ते—

सिद्धान्तः—अत एवेति। यतो विद्यायाः पुरुषार्थत्वं, न कयाऽपि युक्त्या क्रतूपकारकत्वं च, अत एव अग्नीन्धनादीन्याश्रमकर्माणि विद्यायां स्वार्थसिद्धावपेक्ष्यन्ते। यदि कर्मणां साक्षान्मोक्षसाधनत्वं कल्प्यते, तदा ज्ञानेच्छां प्रति कारणत्वं वदता 'यज्ञेन' इति तृतीयाश्रुतिर्बाधिता स्यात्। इच्छायाश्च रुचिवत् पुरुषार्थत्वात् अन्तःकरणशुद्धिद्वारा यज्ञादीनां ज्ञानेच्छाहेतुत्वमपि घटत इति विविदिषाङ्गत्वस्यापि इच्छाविषयत्वं घटते। तस्मान्न कर्मणां मोक्षसाधनसहकारित्वमिति सिद्धम्॥ १॥

[इति अग्नीन्धनाद्यधिकरणम्]

———

[६. सर्वापेक्षाधिकरणम्]

१. सर्वापेक्षा च यज्ञादिश्रुतेरश्ववत् ३-४-२६

* 'तमेतं' (बृ. ४-४-२२) इत्यादिवाक्योक्तं यज्ञादीनां चित्तशुद्धिद्वारा ज्ञानसहकारित्वम्। तदुपपन्नं? न वा? इति संशये—यथा ब्रह्मविद्या न स्वफले कर्मापेक्षते, प्रमात्वात्; संमतवत्; तथा स्वोत्पत्तावपि न कर्मापेक्षते, तत एव—तद्वदेवेति प्राप्ते—

---

* यथा पूर्वं ब्रह्मविद्यायाः प्रमात्वाच्छुक्तिज्ञानस्येव स्वफले कर्मानपेक्षा, प्रमात्वे वेति दृष्टान्तसंगत्येदमाह—स. शि. बृ.

राद्धान्तः—सर्वापेक्षा चेति। उत्पन्नाया हि विद्यायाः स्वफलसिद्धिं प्रति न यज्ञाद्यपेक्षा। उत्पत्तिं प्रति तु चित्तशुद्धिद्वारा दूरतो यज्ञादिसर्वापेक्षाऽस्ति। कुतः? 'यज्ञादिश्रुतेः'—'तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति यज्ञेन दानेन तपसाऽनाशकेन' (बृ. ४-४-२२) इत्यादिश्रुतेः यज्ञानामन्तःकरणशुद्धिद्वारा ज्ञानेच्छाहेतुत्वावगमात्। 'अश्ववत्' इति योग्यतानिदर्शनम्। यथा च योग्यतावशेनाश्वो न लाङ्गलाकर्षणे विनियुज्यते, रथचर्यायां तु विनियुज्यते, एवं कर्माणि ज्ञानफलसिद्धावविनियुज्यमानान्यपि ज्ञानोत्पत्तौ दूरतो विनियुज्यन्ते॥

यत्तु प्रमितित्वादुत्पत्तौ कर्मापेक्षेति—तदयुक्तम्—आगमविरुद्धत्वात्॥ १॥

ननु 'विविदिषन्ति' इति वर्तमानापदेशेन विधित्वाभावात् न ज्ञानोत्पत्तौ यज्ञाद्यपेक्षा—इत्याशङ्क्य, शमादीनां साक्षात्साधनत्वं साधयन् तेषां बहिरङ्गत्वेन ज्ञानोत्पत्तिहेतुत्वमुपपादयति—

२. शमदमाद्युपेतः स्यात्तथापि तु तद्विधेस्तदङ्गतया तेषामवश्यानुष्ठेयत्वात् ३-४-२७

तथापि तु-शमाद्युपेतः स्यात् विद्यार्थी, कुतः? 'तद्विधेः—'तस्माच्छान्तो दान्त उपरतस्तितिक्षुः समाहितो भूत्वाऽऽत्मन्येवात्मानं पश्यति' (बृ. ४-४-२३) इति विद्यासाधनत्वेन शमादीनां विधानात् इत्यर्थः। 'तेषामवश्यानुष्ठेयत्वात्'—तेषां विहितानां शमादीनां च अवश्यानुष्ठेयत्वादित्यर्थः॥

नन्वत्रापि 'पश्यति' इति न विधिः—न—'तस्मात्' इति प्रकृतप्रशंसापरिग्रहात् विधित्वानुमानात्। 'पश्येत्' इति माध्यन्दिने-

विधिरेवाधीयते । एवञ्च विद्योत्पत्तौ अन्तरङ्गशमाद्यपेक्षावत् बहिरङ्गयज्ञाद्यपेक्षा युक्ता । यज्ञादीनां विविदिषासंयोगस्यापूर्वत्वेन 'विविदिषन्ति' इति वर्तमानापदेशेऽपि विध्यनुमानोपपत्तेः । 'तस्मात् पूषा प्रपिष्टभागोऽदन्तको हि सः' इत्यादावपूर्वत्वेन प्राच्यां मीमांसायां विध्यनुष्ठानस्य साधितत्वात् । न च कर्मणां यावज्ज्ञानोत्पत्तौ कर्मानुष्ठातव्यसन्यासो (?) न ज्ञानशेष इति वाच्यम्; दुग्धादौ धातुदोषोत्थारुचिनिवर्तकौषधादिवत् ब्रह्मज्ञानोत्पादकारुचिनिवर्तकत्वेन कर्मणां चित्तप्रत्यक्प्रावण्यफलं दृष्ट्वा कर्मत्यागस्योपपन्नत्वात् । तदुक्तं 'आरुरुक्षोर्मुनेर्योगं कर्म कारणमुच्यते । योगारूढस्य तस्यैव शमः कारणमुच्यते' (गी. ६-३) इति ॥

तस्मात् यज्ञादीनि शमादीनि च यथाऽऽश्रमं सर्वाण्येवाश्रमकर्माणि विद्योत्पत्तावपेक्षितव्यानि । तत्रापि 'एवंवित्' इति विद्यासंयोगात् प्रत्यासन्नानि विद्यासाधनानि शमादीनि, विविदिषासंयोगात्तु बाह्यतराणि यज्ञादीनीति विवेक्तव्यम् ॥ २ ॥

[इति सर्वापेक्षाधिकरणम्]

[७. सर्वान्नानुमत्यधिकरणम्]

१. सर्वान्नानुमतिश्च प्राणात्यये तद्दर्शनात् ३-४-२८

* प्राणसंवादे श्रूयते—'न ह वा एवंविदि किञ्चन नानन्नं भवति' (छा. ५-२-१) इति । प्राणोपासकेन भोक्तुमयोग्यं न किञ्चिदस्तीति

---

* पूर्वं यथा विद्यासन्निधानात् शमादिकं विद्याङ्गं विधीयत इत्यभिहितम्, तथा सर्वान्नानुमतिः विद्याङ्गमेव विधीयत इति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

श्रुत्यर्थः। किमिदं सर्वान्नानुज्ञानं शमादिवत् विद्याङ्गं विधीयते? उत स्तुत्यर्थम्? इति संशये—सर्वान्नभोज्यस्य प्रमाणान्तराप्राप्तत्वात् प्राणोपासकस्य सर्वान्नभोजनं विधीयते—इति प्राप्ते—

अभिधीयते—सर्वान्नेति। प्राणविज्ञानप्रशंसार्थोऽयमर्थवादः, न सर्वान्नानुज्ञानविधिः। तदेतदाह—सर्वान्नानुमतिश्च प्राणात्यय इति। प्राणात्यय एव हि परमापदि सर्वान्नमदनीयत्वेनाभ्यनुज्ञायते, न सर्वदा। कुतः? 'तद्दर्शनात्'—'मटचीहतेषु कुरुष्विभ्यग्रामे' (छा. १-१०-१) इत्यादिब्राह्मणे हि एकेनार्धभक्षितान् कुल्माषानापदि चाक्रायणोऽभक्षयदिति अभक्ष्यभक्षणदर्शनादित्यर्थः। अनापदि न भक्षणोऽयमित्यपि तत्रैवोक्तम्. उच्छिष्टत्वेनानुपानं दूषयित्वाऽऽह—'न वा अजीविष्यमिमानखादन्' (छा. १-१०-४) इति, 'कामो मे उदपानम्' (छा. १-१०-४) इति ॥२॥

न चाप्राप्तत्वात् प्रमाणान्तरेण विधिकल्पनावकाशः, भक्ष्याभक्ष्यशास्त्रविरोधात्—इत्याह—

२. अबाधाच्च ३–४–२९

सर्वान्नभोजनस्यार्थवादत्वे सति 'आहारशुद्धौ सत्त्वशुद्धिः' (छा. ७-२६-२) इत्यादिभक्ष्याभक्ष्यशास्त्रं बाधितं भविष्यति ॥ २ ॥

३. अपि च स्मर्यते ३–४–३०

अपि चापदि सर्वान्नभक्षणं स्मर्यते, अनापदि चाभक्षणीयत्वं च स्मर्यते—'जीवितात्ययमापन्नो योऽन्नमत्ति यतस्ततः। लिप्यते न स पापेन पद्मपत्रमिवाम्भसा' 'सुरापस्य ब्राह्मणस्योष्मा सिञ्चेयुः' इति च ॥ ३ ॥

४. शब्दश्चातोऽकामकारे ३-४-३१

शब्दश्चान्नस्य प्रतिषेधकः कामकारनिवृत्तिप्रयोजनः कठानां संहितायां श्रूयते—'तस्माद्ब्राह्मणः सुरां न पिबेत्' इति। तस्मात् अकामकारे आपद्विषयदेहस्य सर्वान्नमभ्यनुज्ञातमित्येवंजातीयको न विधिः, किन्त्वर्थवाद इति सिद्धम् ॥ ४ ॥

[इति सर्वान्नानुमत्यधिकरणम्]

[८. आश्रमकर्माधिकरणम्]

१. विहितत्वाच्चाश्रमकर्मापि ३-४-३२

* यज्ञादीनां विविदिषाङ्गत्वप्रतिपादकं वाक्यजातं किं विधिः? उत स्तुतिः? इति संशये—यथा शास्त्रान्तरविरोधात् सर्वान्नवचनं स्तुतिः, एवं यज्ञादीनां नित्यत्वश्रुतिविरोधात् विद्यार्थत्ववचनं स्तुतिरिति पूर्वपक्षे प्राप्ते—

राद्धान्तः—विहितत्वादिति। 'यावज्जीवमग्निहोत्रं जुहोति' इति विहितत्वात् नित्यकर्माग्निहोत्रादिकं यदाश्रमकर्म, तत् मुमुक्षुणाऽमुमुक्षुणा च कर्तव्यम् ॥ २ ॥

मुमुक्षुणा विद्यासाधनत्वेनाप्यनुष्ठेयमित्याह—

---

* पूर्वं यथा सर्वान्नानुमतेः शास्त्रान्तरविरोधात् स्तुतित्वमुक्तम्, तथा 'यावज्जीवमग्निहोत्रं जुहुयात्' इत्यादिकर्मनित्यत्वशास्त्रविरोधात् यज्ञादीनां ज्ञानसाधनत्वश्रुतेः स्तुतित्वमस्त्विति दृष्टान्तसंगत्येदमाह—स·शि·वृ.

२. सहकारित्वेन च ३-४-३३

विद्यासहकारित्वेनैतान्यनुष्ठेयानि, 'तमेतं' इत्यादिना विहितत्वात्। न च नित्यानित्यसंयोगविरोधात् विधित्वासंभवेन 'तमेतं' इत्यादेस्तुतित्वम्, कर्मभेदेऽपि संयोगाविरोधात्। नित्यस्य न विद्याफलसंयोगः, 'तमेतं' इत्यादिविहितस्य विद्याफलसंयोग इति संयोगपृथक्त्वेनाविरोधोपपत्तेः। यथैकस्यापि खादिरस्य नित्यसंयोगेन क्रत्वर्थस्याप्यनित्यसंयोगेन पुरुषार्थत्वम्। तदुक्तम्—'एकस्य तूभयार्थत्वे संयोगपृथक्त्वम्' (जै. सू.) इति ॥ २ ॥

३. सर्वथाऽपि त एवोभयलिङ्गात् ३-४-३४

सर्वथाऽप्याश्रमकर्मत्वपक्षे विद्यासहकारित्वपक्षे च त एवाग्निहोत्रादयो धर्मा अनुष्ठेयाः। एवकारेण नित्याग्निहोत्रमासाग्निहोत्रयोरिव भेदाभावः सूच्यते। कुतः? 'उभयलिङ्गात्'— श्रुतिलिङ्गात्, स्मृतिलिङ्गाच्चेति यावत्। 'तमेतं' इत्यादि सिद्धवदुपादानं यज्ञादीनां श्रुतिलिङ्गम्। 'अनाश्रितः कर्मफलं कार्यं कर्मकरोति यः' (गी. ६-१) इत्यादि स्मृतिलिङ्गम् ॥ ३ ॥

४. अनभिभवं च दर्शयति ३-४-३५

सहकारित्वस्यैवैतदुपोद्बलकं लिङ्गम्। अनभिभवं च दर्शयति श्रुतिः यं ब्रह्मचर्येणानुविन्दते' (छा. ८-५-६) इति। तस्मात् यज्ञादीन्याश्रमकर्माणि विद्यासहकारीणीति सिद्धम् ॥ ४ ॥

[इति आश्रमकर्माधिकरणम्]

[९. विधुराधिकरणम्]

१. अन्तरा चापि तु तद्दृष्टेः ३-४-३६

* स्नातकविधुरादीनां, द्रव्यरहितानां च केषाञ्चित् गृहस्थानां चित्त-शुद्ध्यङ्गकर्मानुष्ठानसंभवात् ब्रह्मविद्यायामधिकारोऽस्ति? उत नास्ति? इति संशये—तेषामाश्रमधर्माभावात् चित्तशुद्ध्यभावान्नाधिकार इति प्राप्ते—

सिद्धान्तः—अन्तरा चापि तु—अनाश्रमित्वेन वर्तमानोऽपि ब्रह्म-विद्यायामधिक्रियते। कुतः? 'तादृद्दृष्टेः'—रैक्ववाचक्नवीप्रभृतीनां एवं-विधानामपि ब्रह्मवित्त्वश्रुत्युपलब्धेः ॥ १ ॥

२. अपि च स्मर्यते ३-४-३७

अपि च रैक्वादीनामितिहासादिषु ब्रह्मवित्त्वं स्मर्यते ॥ २ ॥

३. विशेषानुग्रहश्च ३-४-३८

किञ्च विधुरादीनां जपोपवासादिधर्मविशेषैः ईश्वरार्पणबुध्याऽनुष्ठितैः ब्रह्मविद्यायां विशेषानुग्रहोऽपि संभवति। तथा च स्मृतिः 'जप्येनैव तु संसिध्येत् ब्राह्मणो नात्र संशयः। कुर्यादन्यन्न वा कुर्यात् मैत्रो ब्राह्मण उच्यते' (म स्मृ. २-८७) इते ॥ ३ ॥

४. अतस्त्वितरज्ज्यायो लिङ्गाच्च ३-४-३९

अतस्त्वन्तरालवर्तित्वादितराश्रमवर्तित्वं ज्यायो विद्यायाः साधनम्। कुतः? 'श्रुतिलिङ्गाच्च'; 'च'कारात् स्मृतेश्चेत्यर्थः। 'तेनैति

---

* पूर्वं यथा यज्ञादिश्रुत्या आश्रमकर्मणामेव ज्ञानसाधनत्वविधानात् आश्रमिणा-मधिकारः, न तथा विधुराणामधिकारः, तत्कृतकर्मणां ज्ञानसाधनत्वाभावादिति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

ब्रह्मवित् पुण्यकृत्तैजसश्च ' (बृ. ४-४-९) इति श्रुतिलिङ्गम् । 'अनाश्रमी न तिष्ठेत्तु क्षणमेकमपि द्विजः ' इति स्मृतिः ।। ४ ।।

[इति विधुराधिकरणम्]

[१०. तद्भूताधिकरणम्]

१. तद्भूतस्य तु नातद्भावः जैमिनेरपि नियमात्तद्रूपा-भावेभ्यः ३-४-४०

*आरोहवत् प्रत्यवरोहोऽपि कदाचिदूर्ध्वरेतसां स्यादितीमां शङ्कां निराकर्तुमिदमधिकरणम् ।।

किमाश्रमाणामवरोहोऽस्ति ? न वा ? इति संशये — ' ब्रह्मचर्यं समाप्य गृही भवेत् । गृहाद्वनीभूत्वा प्रव्रजेत् ' (जा. बा. ४) इति यथा पुरुषस्येच्छायां आरोहो भवति, तथाऽवरोहोऽपि क्वचिद्रागवशाद्भवति, पूर्वाश्रमश्रद्धावशाच्चेति प्राप्ते —

अभिधीयते — तद्भूतस्येति । तद्भूतस्य तु — प्रतिपन्नोर्ध्वरेतोभावस्य न कथञ्चिदपि अतद्भावः — न ततः प्रच्युतिः स्यात् । कुतः ? ' नियमात् ' तद्रूपाभावेभ्यः ' — ' यत्पदमाश्रमः तमियात् ततो न पुनरेयात् ' — ततो नावर्तेतेति श्रुत्यर्थः । एवञ्जातीयकान्नियमात् तद्रूपाभावानां — आश्रमप्रच्युत्यभावानां प्रतीयमानत्वात् । तेभ्यः — आश्रमप्रच्युत्यभावेभ्यो हेतुभ्यः

---

* पूर्वं यथाऽनाश्रमिणां कर्मणो विद्याहेतुत्वमुक्तम्, तथोत्तमाश्रमात् पूर्वाश्रमं प्राप्तस्य कर्मणां विद्याहेतुत्वमस्त्विति दृष्टान्तसंगत्येदमाह — स. शि. वृ.

आश्रमाणां प्रत्यवरोहो न संभवति । 'जैमिनेरपि' इत्यपिशब्दः जैमिनि-बादरायणयोरत्र संप्रतिपत्तिं शास्ति ॥

रागस्य मिथ्याज्ञानमूलत्वात् न तन्मूलेऽप्यवरोहः संभवति । न च पूर्वाश्रमश्रद्धापि युज्यते, उत्तराश्रमिणं प्रत्यविहितत्वेन धर्मत्वाभावात् ॥१॥

[इति तद्भूताधिकरणम्]

[११. आधिकाराधिकरणम्]

१. न चाधिकारिकमपि पतनानुमानात्तदयोगात् ३-४-४९

* प्रत्यवरोहो न शास्त्रीय इत्युक्तम् । स यदि क्रियते, तर्हि प्रायश्चित्तमस्ति ? न वा ? तति । 'ब्रह्मचार्यवकीर्णी नैर्ऋतं गर्दभमालभेत' इति प्रायश्चित्तं यदि नैष्ठिकोऽपि प्रमादादवकीर्येत तस्यापि भवतीति प्राप्ते—

राद्धान्तः—यदाधिकारिकमधिकारिलक्षणे नष्टे यत्—अवकीर्णी पशुश्च तद्वदाधानस्य प्राक्कालादिविहितं नैष्ठिकस्य न संभवति । कुतः ? 'पतनानुमानात्'— पतनप्रतिपादकस्मृतेरित्यर्थः । 'आरूढो नैष्ठिकं धर्मं यस्तु प्रच्यवते नरः । प्रायश्चित्तं न पश्यामि येन शुद्ध्येत् स आत्महा' (आग्नेय १६५-२३) इत्यप्रतिसमाधेयपतनस्मरणात् तदयोगात् ....च्छिन्नशिरस्क इव प्रतिक्रियाऽयोगादित्यर्थः । उपकुर्वाणस्य तु तद्भवति प्रायश्चित्तम् ॥ १ ॥

---

* यथा पूर्वं प्रच्युतस्य कर्म न विद्याहेतुरित्युक्तम् , तथा प्रच्युतस्यापि कृत-प्रायश्चित्तस्य कर्म न विद्याहेतुरिति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

अन्ये तु श्रुतेरविशेषप्रवृत्तेः ब्रह्मचारिनैष्ठिकस्य, उपकुर्वाणस्य वाऽविशेषेण प्रायश्चित्तं विधत्त इत्युपकुर्वाणवन्नैष्ठिकस्यापि तद्घटत इति मन्यन्त इत्याह—

२. उपपूर्वमपि त्वेके भावमशनवत्तदुक्तम् ३-४-४२

उपपूर्वमपि पातकं नैष्ठिकस्यावकीर्णित्वेन महापातकव्यतिरिक्तं गुरुदारादिभ्योऽन्यत्र ब्रह्मचर्यभङ्गं समुत्पन्नं यत्, तस्यैके प्रायश्चित्तमिच्छिन्ति, ब्रह्मचारित्वाविशेषात्, अवकीर्णित्वाविशेषाच्च । 'अशनवत्'—यथा मधुमासाशने ब्रह्मचारिणां व्रतलोपनिमित्तप्रायश्चित्तं पुनरुपनयनाख्यं, एवमिहापि । 'न पश्यामि' इत्येतत् प्रायश्चित्तगौरवसूचनार्थम् । तस्मात् प्रायश्चित्तसद्भावो युक्ततरः ।।

तदुक्तं प्रमाणलक्षणे—'समा विप्रतिपत्तिः स्यात्' (जै. सू. १-३-८) 'शास्त्रस्था वा तन्निमित्तत्वात्' (जै. सू १-३-९) इति । अस्यायमर्थः—आचार्याणां विप्रतिपत्तौ विशेषाभावात् साम्यं भवेत् । शास्त्रस्था या प्रसिद्धिः सैव वा ग्राह्या, शास्त्रमूलत्वादिति ।।

तथा वानप्रस्थपरिव्राजकयोर्भ्रंशे प्रायश्चित्तं स्मर्यते । 'वानप्रस्थो दीक्षाभेदे कृच्छ्रं द्वादशरात्रं चरित्वा महाकक्षं वर्धयेत्' 'भिक्षुर्वानप्रस्थवत् सोमवृद्धिवर्जम्' इति ।। २ ।।

[इति अधिकाराधिकरणम्]

—o—

[१२. बहिरधिकरणम्]

१. बहिस्तूभयथाऽपि स्मृतेराचाराच्च ३-४-४३

* नैष्ठिकानामस्ति प्रायश्चित्तमित्युक्तम् । कृतप्रायश्चित्तैरेतैः संव्यवहारः किं योग्यः ? किं वा न योग्यः ? इति संशये—प्रायश्चित्तेन दोषनिर्णेजनात् व्यवहारयोग्या इति प्राप्ते—

सिद्धान्तः—बहिरिति । ऊर्ध्वरेतसः स्वाश्रमेभ्यः प्रच्यवने, महापातकमुपपातकं वा भवतु न निमित्तं; उभयथाऽपि शिष्टैस्ते बहिष्कर्तव्याः । कुतः ? 'स्मृतेराचाराच्च'—'आरूढपतितं विप्रं मण्डलाच्च बहिष्कृतम् । उद्बद्धं कृमिदष्टं च स्पृष्ट्वा चान्द्रायणं चरेत्' इति । कृतप्रायश्चित्तैरपि तैः शिष्टाः सपङ्क्तिभोजनं नाचरन्ति ॥ १ ॥

[इति बहिरधिकरणम्]

[१३. स्वाम्यधिकरणम्]

१. स्वामिनः फलश्रुतेरित्यात्रेयः ३-४-४४

* अङ्गोपासनेषु संशयः—किं तानि यजमानकर्तृकाणि ? आहोस्वित् ऋत्विक्कर्तृकाणि ? इति । तत्र यथा कृतप्रायश्चित्तः संव्यवहार्य इत्युत्सर्गो

---

* पूर्वं यथा प्रच्युतस्य प्रायश्चित्तेनैव शुद्धत्वात् तत्कृतं कर्म विद्यासाधनमित्यवादि, तथा कृतप्रायश्चित्तेन सह शिष्टाचाररूपं कर्म विद्यासाधनं भवत्विति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

* पूर्वं यथा यः कृतप्रायश्चित्तः स संव्यवहार्य इत्युत्सर्गस्य निन्दातिशयस्मृत्या नैष्ठिकादिषु बाध इत्यभाणि । तथा यो यदङ्गकर्ता स तदाश्रितस्य कर्तेति उत्सर्गस्य कर्तुः फलश्रुत्या बाधो भवत्विति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

निन्दातिशयवचनेन बाध्यते, तथाऽश्रयाङ्गानुष्ठातुरेव आश्रितोपास्तिकर्तृक-त्वमित्युत्सर्गः 'वर्षति हास्मै उपास्ते' (छा २-३-२) इत्यादिवचनबलात् यजमानकर्तृत्वेन बाध्यत इत्याह पूर्ववादी स्वामिन इति। यागाङ्गावबद्धोद्गीथाद्युपासनेषु स्वामिनो यजमानस्य न्याय्यमिति याजमानमेवोपासनमित्यात्रेय आचार्यो मन्यते ।। १ ।।

२. आर्त्विज्यमौडुलोमिः तस्मै हि परिक्रीयते ३-४-४५

ऋत्विक्कर्माण्येतानि, न यजमानकर्माणीत्यौडुलोमिराचार्यो मन्यते। कुतः? 'तस्मै हि परिक्रीयते'—तस्मै हि साङ्गाय कर्मणे ऋत्विक् परिक्रीयते। तत्प्रयोगान्तःपातीनि चोद्गीथाद्युपासनानि, गोदोहनादिवदधिकृताधिकारत्वात् ।।

यत्तूक्तं फलश्रुतेर्यजमानस्यैव कर्तृत्वमिति—तन्न—परार्थत्वात् ऋत्विजां यजमानादन्यत्र फलसम्बन्धानुपपत्तेः ।। २ ।।

*किञ्च—

३. श्रुतेश्च ३-४-४६

'यां वै काञ्चन यज्ञे ऋत्विज आशिषमाशासते इति—यजमानायैव तमाशिषमाशासत इति होवाच' इतिश्रुतेः ऋत्विक्कर्तृकस्योपासनस्य यजमानगामिफलत्वमवगम्यत इत्युपासनानि ऋत्विक्कर्तृकाणीति सिद्धम् ।। ३ ।।

[इति स्वाम्यधिकरणम्]

—o—

---

* एतत्सूत्रव्याख्या मातृकायां न दृश्यते। रामानुजभाष्यमनुसृत्य न व्याख्यातं वा। परं तु सूत्रभाष्ये दर्शनात् सदाशिववृत्तेः संयोजिता ॥

[१४. सहकार्यन्तरविध्यधिकरणम्]

१. सहकार्यान्तरविधिः पक्षेण तृतीयं तद्वतो विध्यादिवत् ३-४-४६

* 'तस्माद्ब्राह्मणः पाण्डित्यं निर्विद्य बाल्येन तिष्ठासेत् बाल्यं च पाण्डित्यं च निर्विद्याथ मुनिः' (बृ. ३-५-१) इति कहोलब्राह्मणे श्रूयते। अस्यायमर्थः—यस्मात् ब्रह्मभावः परमः पुरुषार्थः, तस्मात् ब्रह्मबुभूषुः उपनिषत्तात्पर्यनिर्णयरूपं पाण्डित्यं निश्शेषेण संपाद्य बाल्यवत् नीरागद्वेषत्वेन संयुक्तोऽसंभावनानिराकरणाय युक्तीरनुचिन्तयन् अवस्थातुमिच्छेत्। ततः पाण्डित्यबाल्ये निश्शेषेण संपाद्याथ मुनिरिति॥

अत्र मौनं विधीयते? न वा? इति संशये—'तस्मादेवंविदुद्गाता ब्रूयात् कं ते काममयानि' इति वाक्यशेषबलात् उपासनमृत्विक्कर्तृकं यथेष्यते, तथा भवेदित्यादिविधिविधुरवाक्यशेषान्न विधिरिति प्राप्ते—

सिद्धान्तः—सहकार्यन्तरेति। विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवद्विधिरेवायमाश्रयितव्यः, अपूर्वत्वात्। न च 'मन ज्ञाने' इति मुनिशब्दस्य ज्ञानार्थकत्वात् पाण्डित्यपदेन गतत्वात् नापूर्वत्वमिति वाच्यम्; मुनिशब्दस्य ज्ञानातिशयवाचित्वात्, 'मननान्मुनिः' इति व्युत्पत्तिसंभवाच्च। ततश्च बाल्यपाण्डित्यापेक्षया तृतीयमिदं मौनं विधीयते। कस्मात्? 'तद्वतः'—विद्यावतः सन्यासिनः, आत्मानं विदित्वा पुत्राद्येषणाभ्यो व्युत्थाय भिक्षाचर्यं चरन्तीति सन्यासिनः प्रकृतत्वात्॥

---

* पूर्वं यथा 'यां काचन यज्ञे' इत्यादिवाक्यशेषादुद्गीथाद्युपासनास्वार्त्विज्यनिर्णयः, तद्वत् 'अथ मुनिः' 'अथ ब्राह्मणः' इति विधिविधुरवाक्यशेषात् मौनस्याविधेयत्वनिश्चय इति दृष्टान्तसंगत्येदमाह—स. शि. बु.

ननु विद्यावाक्येन ज्ञानातिशयः सिद्ध इति मौनविधिरनर्थक इति—नेत्याह—पक्षेणेति । यस्मिन् पक्षे कस्य चिच्छ्रवणबलात् प्राप्तापरोक्षज्ञानस्य विद्यावासनाजनितभेददर्शनप्राप्ताज्ञानात् विद्यातिशयो न लभ्यते तस्मिन्नेव विधिरिति 'विध्यादिवत्' इति निदर्शनम् । दर्शपूर्णमासविध्यादौ तत्सहकारित्वेन विधीयमानाग्न्याधानवत् विद्यासहकारित्वेन निदिध्यासनाख्यं मौनं विधीयते ।। १ ।।

ननु यदि बाल्यादिविशिष्टः सन्यासी चेदत्र श्रवणाद्यधिकारी प्रतीयते, छान्दोग्ये कथं गृहिणोपसंहारः ? तत्राह—

कृत्स्नभावात्तु गृहिणोपसंहारः ३–४–४८

'तु' शब्दो विशेषणार्थः । कृत्स्नानां यज्ञादीनां तस्मिन्नेव संभवात् आश्रमान्तरकर्मणां अहिंसेन्द्रियसंयमादीनां यथयोगं गृहिणोपसंहारः छान्दोग्ये क्रियते 'अभिसमावृत्त्य कुटुम्बे' (छा. ८·१५-१) इति ।।२।।

३· मौनवदितरेषामप्युपदेशात् ३–४–४९

यथा मौनं गार्हस्थ्यं चेत्येतावाश्रमौ श्रुतौ, एवं ब्रह्मचारिवानप्रस्थावपि पूर्वोदाहृतश्रुतिबलात् द्रष्टव्यौ । ततश्चतुर्णामाश्रमाणां उपदेशात् तुल्यवद्विकल्पसमुच्चयाभ्यां प्रतिपत्तिः इतरेषामपि द्वयोरपि बहुवचनम् ; गायत्रोपकुर्वाणकब्राह्मणनैष्ठिकत्वभेदेन ब्रह्मचारिणां बहुत्वात् , वैखानसादिभेदेन वानप्रस्थानां बहुत्वात् । अवान्तरभेदविवक्षया संभवति श्रवणमननयोरिव मौनस्य निदिध्यासनापरनामधेयस्य विध्यङ्गीकारात् । भाष्यकारेणापि विद्यासहकारिणो मौनस्य बाल्यपाण्डित्यवत् विधिरेवाश्रयितव्या इत्येतत्सूत्रव्याख्यानावसर एवोक्तत्वात् ।।

कैश्चिद्विद्वद्भिः श्रवणादिषु यत् विधित्वनिराकरणं कृतम्, तत् इदानीं सूत्रभाष्यविरोधादेव त्यक्तव्यम् ॥

ननु भाष्यकारेण एषां समन्वयसूत्रे विधित्वं निराकृतम्। 'आत्मा वा अरे द्रष्टव्यः' (बृ. २-४-५) इत्यादीनि विधिच्छायावचनानि उपलादिषु प्रयुक्तक्षुरतैक्ष्ण्यादिवत् कुण्ठीभवन्तीति—तन्न—न ह्येतद्भाष्यं श्रवणादिविधिनिषेधपरम्। 'आत्मा वा अरे द्रष्टव्यः' 'आत्मेत्येवोपासितव्यः' (बृ. १-४-७) 'आत्मानमेव लोकमुपासीत' (बृ. १-४-१५) इत्येवमादयो ये, ते विधयो न संभवन्ति, ज्ञानस्य प्रमाणाधीनत्वेन पुरुषाधीनत्वाभावात्। आत्मनो नित्यसिद्धस्य कूटस्थस्याविकारिणः शुद्धबुद्धस्वभावस्य प्रत्यग्ब्रह्मणो ज्ञानेन विकार्यत्वोत्पाद्यत्वप्राप्यत्वसंस्कार्यत्वासंभवेनापि ज्ञानविध्ययोगात्। 'तदेव ब्रह्म त्वं विद्धि नेदं यदिदमुपासते' (के. १-४) इति श्रुत्यैवोपासनानिषेधाच्च सगुणब्रह्मोपासनाविधिवत् न निर्गुणप्रत्यग्ब्रह्मोपासनाविधिः संभवति। तस्मात् समन्वयसूत्रस्थविधिच्छायानि वचनानि इति भाष्यार्थापरिज्ञानविलासोऽयं श्रवणादिविधिप्रतिषेधः ॥

यत्तु कैश्चित् भामतीदूषणं कृतं—न हि श्रवणादिष्वपूर्वविधिः संभवति, सामान्येन ज्ञानोपायत्वस्य श्रवणादिषु लोकसिद्धत्वात्। न हि नियमविधिः, परिसंख्याविधिर्वा श्रवणादिषु संभवति; सामान्योपायनः प्राप्तावपि ब्रह्मसाक्षात्कारे पाक्षिकयामप्राप्तायां तन्निराकरणेन नियमायोगात्। 'इमामगृभ्णन्' इत्यादाविव लिङ्गात् रशनाशब्दाच्च अश्वगर्दभरशनयोरुभयत्र प्राप्तेश्च 'अश्वाभिधानीमादत्ते' इति गर्दभरशनातो व्यावर्तते। न चेह ब्रह्मसाक्षात्कारे तादृशं प्रापकमस्ति। अतो न श्रवणादिविधिसंभव इति—तदयुक्तम्—अपूर्वविधित्वाभावेऽपि नियमविधित्वसंभवात्। बृहत्वात् बृंहणत्वाद्वा ब्रह्मण एव सतो जीवस्य प्रत्यक्षादिप्रमाणान्तरेण

साक्षात्कारसंभवात् । परमप्रेमास्पदत्वान्यथाऽनुपपत्त्या च तस्य सुख-स्वरूपत्वप्रतीतेः ॥

यदि च प्रमाणान्तरेणात्मसाक्षात्कारप्राप्तिर्न स्यात्, तर्ह्यद्वाय-सन्दिग्धं(?) अप्रयोजनेत्यादिपूर्वपक्षो नोपपद्येत । तदभावे च 'अथातो ब्रह्मजिज्ञासा '(ब्र. सू. १-१-१) इत्यादिसूत्रं त्वन्मतेऽपि निरर्थकं स्यात् ॥

अथ मतं वेदान्तवाक्यसिद्धब्रह्मात्मैकत्वसाक्षात्कारे मानान्तर-प्राप्तिर्नास्तीति न श्रवणादिनियमविधिसंभव इति—तदयुक्तम्—पूर्वतन्त्र-सिद्धसर्वनियमविधिभङ्गप्रसङ्गात् । न हि 'व्रीहीनवहन्ति ' इत्यवहननलब्ध-तण्डुलविशेषावस्थायां विदलनादिकृततण्डुलप्राप्तिः स्निकरा(?), तर्हि सामान्येन पुरोडाशार्थतण्डुलापेक्षायां एवमिहापि मुमुक्षोरैकात्म्यं जिज्ञासोः किं वेदान्तवाक्य-श्रवणादात्मसाक्षात्कारः सिध्यति? उत प्रत्यक्षादिना? इति उपायद्वयप्राप्तौ नियम्यते ज्ञानमनूद्य तत्साधनश्रवणादिकं नियम्यते । तदुक्तम्—'सर्वमान-प्रसिद्धौ च सर्वमानफलाश्रयात् । श्रोतव्य इत्यतः प्राह वेदान्ता न हत्तसया ' इति ॥

अपूर्वपरिसंख्याविध्यसंभवस्तु अस्माकमिष्ट एव । तत्रापि ब्रह्मा-त्मैकत्वसाक्षात्कारे मुख्यसाधनं श्रवणमेव, मनननिदिध्यासनयोः श्रवणं प्रत्यङ्गत्वात् । अन्यथा 'सहकार्यन्तरविधिः पक्षेण तृतीयं ' इति सूत्रगत 'पक्षेण ' इतिपदं व्यर्थं स्यात् । 'तस्मात् ब्राह्मणः पाण्डित्यं निर्विद्य ' (बृ. ३-५-१) इत्यादिवाक्ये 'पाण्डित्यं निर्विद्य ' इति पदेन उपनिषत्ता-त्पर्यरूपं पाण्डित्यं निश्शेषेण संपाद्येत्यर्थस्य संप्रतीयमानत्वात् । मुनिशब्द-वाच्यविद्यातिशयोऽपि विद्यावत्त्वे सति प्राप्नोतीति किं मौनविधिनेति माऽशोक्त' क्षेणेतिपदव्यावर्त्याशङ्कायां मौनस्य ब्रह्मसाक्षात्कारं प्रति मुख्या-

साधनत्वानुपपादनात् यस्मिन् पक्षे भेददर्शनप्राप्तबाल्यं न प्राप्नोतीति ‘पक्षेण’ इति पदार्थप्रतिपादकं भाष्यं व्यर्थं स्यात् ॥

अस्य भाष्यस्य चायमर्थः—अस्मिन् पक्षेण विशेषकर्मानुष्ठानशुद्धान्तःकरणस्याधिकारिणः पुरुषस्य संसारं प्रजिहासतः त्यक्तशेषक्रियस्य सकृच्छ्रवणादेव पिशाचादिवत् अपरोक्षज्ञानं जायते, तस्मिन् पक्षे विद्यावत्त्वे सति विद्यातिशयो भवत्येव । यत्पक्षेऽप्येवं विधस्याधिकारिणः श्रवणादपरोक्षज्ञाने जातेऽपि प्रतिबन्धबाहुल्यादविद्यावासनाजनितभेददर्शनप्राप्तबाल्यात् विद्यातिशयो न भवति तं प्रति मौनं विधीयत इति ॥

भाष्यकारेण च श्रवणस्यापरोक्षज्ञानहेतुत्वमसकृत् प्रपञ्चितम् । न च परोक्षज्ञानजननस्वभावस्यागमस्य कथमपरोक्षज्ञानहेतुत्वम् ? अन्यथा कुटजबीजादपि वंशांकुरोत्पत्तिप्रसङ्गादिति वाच्यम् ; ‘दशमस्त्वमसि’ इत्यादिवाक्यस्यापरोक्षज्ञानहेतुत्वदर्शनात् । न च तत्र शरीरस्य प्रत्यक्षत्वात् सहकृतः शब्दोऽपरोक्षज्ञानजनक इति दृष्टान्तदार्ष्टान्तिकयोः वैषम्यमिति सांप्रतम् ; अत्रापीश्वरार्पणबुध्यानुष्ठितधर्मसंशोधितान्तःकरणस्य सहकारिणः संभवात् ॥

किञ्च गुञ्जापुञ्जादौ वानराणामिव ध्यानजनिताजसाक्षात्कारवत् निदिध्यासनजनितब्रह्मसाक्षात्कारस्याप्यप्रामाणिकत्वप्रसङ्गात् ॥

यत्तु परैरुक्तं—वेदान्तवाक्यजनितमेव परोक्षज्ञानं मननिराकृतसकलसंशयजातं निदिध्यासनेनापरोक्षतां नीयमानं मूलश्रुतिप्रमाणदार्ढ्यात् न प्रमाणं भवतीति । यथाऽऽहुः—‘वेदान्तवाक्यजज्ञानभावनाजापरोक्षधीः । मूलप्रमाणदार्ढ्येन न भ्रमत्वं प्रपद्यते ’ इति—

तदेतदपेशलम्—ज्ञानानां स्वतः प्रामाण्यवादिनः तत्प्रामाण्याय मूलप्रमाणापेक्षायां स्वतःप्रामाण्यभङ्गप्रसङ्गात् ॥

किञ्च प्रत्यगात्मनः स्वप्रकाशत्वेन नित्यपरोक्षत्वात् तत्र परोक्षं जनयतां वेदान्तानामप्यप्रामाण्यं प्रसज्येत । 'यत्साक्षादपरोक्षाद्ब्रह्म' (बृ. ३-४-१) इति वेदान्तवाक्यमपि ब्रह्मणोऽपरोक्षत्वमेव वदति । न च परोक्षज्ञानं सहस्रशोऽभ्यस्यमानं अपरोक्षं भवति, अतिप्रसङ्गात् । तस्मात् श्रुतिसूत्रभाष्यार्थापरिज्ञानविलसितं पूर्वापरविरुद्धभाषित्वं न्यायविरुद्धभाषित्वं च भामतीमतानुसारिणामिति सिद्धम् ॥

श्रवणस्यापरोक्षब्रह्मात्मसाक्षात्कारं प्रति मुख्यसाधनत्वं, मनननिदिध्यासनयोस्तु श्रवणाङ्गिनं प्रति फलोपकार्यङ्गत्वं कर्तृत्वादिसंसारधर्मयुक्तस्य जीवस्य कथं नित्यशुद्धब्रह्मात्मैकत्वमित्यसंभवाशङ्कां साक्षिवेद्यत्वादिना संसारस्य मिथ्यात्वानुसन्धानलक्षणं मननं कर्तृत्वादेर्ब्रह्मव्यतिरेकेणासंभवं चिन्तयन् प्रबलवासनानिवृत्त्यर्थं निरन्तरज्ञाननिष्ठाख्यं निदिध्यासनं ब्रह्मात्मैकत्वविद्याफलोपकारकं कुर्वन् मुच्यते ॥

श्रवणादिमहान्यायरत्नमालाभिरर्चितः ।
विरूपाक्षो महादेवः प्रत्यगात्मा प्रसीदतु ॥

[इति सहकार्यन्तरविध्यधिकरणम्]

[१५. अनाविष्काराधिकरणम्]

१. अनाविष्कुर्वन्नन्वयात् ३-४-५०

* 'बाल्येन तिष्ठासेत्' (बृ. ३-५-१) इत्यत्र बाल्यं नाम, कामचारः? धीशुद्धिर्वा? इति संशये—बालस्य भावो बाल्यमिति व्युत्पत्त्या वयसः पुरुषानधीनत्वेन निष्पादयितुमशक्यत्वात् यथोपपादमूत्रत्वादिकामचारो बाल्यमिति प्राप्ते—

राद्धान्तः—अनाविष्कुर्वन्निति । ज्ञानाध्ययनधार्मिकत्वादिभिः आत्मानमविख्यापयत् दंभदर्पादिरहितो बाल इव शुद्धबुद्धिर्भवेत् । यथा बालोऽप्ररूढेन्द्रियो न परेषामात्मानमाविष्कर्तुमीहते, तद्वत् । एवं ह्यस्यात्मज्ञानप्रतिपादकवाक्येनान्वयः स्यात् । अन्यथा कामचाराख्यबाल्येऽङ्गीक्रियमाणे तस्य बुद्धिशुद्ध्यभावात् बाह्यरागादिग्रस्ततया च अनिष्टत्वायोगात् अनर्थ एव स्यात् ।। १ ।।

[इति अनाविष्काराधिकरणम्]

---

* पूर्वं मौनशब्दस्य ज्ञानातिशये निदिध्यासने प्रसिद्धत्वात् निदिध्यासनं विधेयमित्युक्तम् । तद्वद्बाल्यशब्दस्य कामचारादौ प्रसिद्धेः तत् विधेयमिति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

[१. ऐहिकाधिकरणम्]

१. ऐहिकमप्रस्तुतप्रतिबन्धे तद्दर्शनात् ३-४-५१

* किं श्रवणाद्यनुष्ठानादिहैव जन्मनि विद्या फलति ? जन्मान्तरे वा ? इति संशये — अधिकारोऽस्मिन्नेव जन्मनि फलापेक्षणात् श्रवणादेवापरोक्षज्ञानाङ्गीकारस्य च मोक्षनियमात् अस्मिन्नेव जन्मनि ज्ञानं जायत इति प्राप्ते—

राद्धान्तः — ऐहिकमिति । ऐहिकं विद्याजन्म, अप्रस्तुतप्रतिबन्धे । एतदुक्तं भवति — यदा प्रकृतस्य विद्यासाधनस्य कश्चित् प्रतिबन्धो न क्रियते उपस्थितविपाकेन कर्मणा, तदा इहैव विपच्यते । यदा खलु प्रतिबन्धः क्रियते, तदाऽमुत्रेति । उपस्थितविपाकत्वं च कर्मणां दुर्घटम् देशकालनिमित्तविपाकानां ज्ञातुम् । न च 'इहैव मे विद्योत्पद्यताम्' इति पुरुषस्याभिसन्धिः । 'इह वाऽमुत्र वा मे विद्या जायता' मित्यभिसन्धेर्निरङ्कुशत्वात् ॥

यत्तु श्रवणादेवापरोक्षज्ञानमितीहैव जन्मनि विद्या भवितुमर्हतीति— तत्राह — तद्दर्शनादिति । फलोपकारकमननिदिध्यासनानां वासनासहितश्रवणाद्युत्पद्यमानं प्रतिबन्धक्षयापेक्ष्यैवोत्पद्यत इत्येतस्य दर्शनादित्यर्थः । 'श्रवणायापि बहुभिर्यो न लभ्यः शृण्वन्तोऽपि बहवो यन्न विद्युः । आश्चर्यो वक्ता कुशलोऽस्य लब्धा आश्चर्यो ज्ञाता कुशलोऽनुशिष्टः' (क. १-२-७)

---

* इत्थं सन्यासादिवाल्यान्तं साधनजातमभिधाय तत्साध्यविद्याजन्म विचार्यत इति हेतुहेतुमद्भावसंगत्येदमाह—स.शि.वृ.

इति जन्मान्तरानुष्ठितसाधनैः जन्मान्तरे ज्ञानलाभः श्रुतौ दृश्यते 'गर्भ एवैतच्छयानो वामदेवः प्रतिपेदे' इत्यादौ। तस्मात् अनियतं विद्याजन्मेति सिद्धम् ॥ १ ॥

[इति ऐहिकाधिकरणम्]

[१७. मुक्तिफलाधिकरणम्]

१. एवं मुक्तिफलानियमस्तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः ३-४-५२

* मुक्तिः सातिशया वा? निरतिशया वा? इति संशये, विद्यासाधनावलम्बिनः साधनवीर्यविशेषात् विद्यालक्षणे फले ऐहिकामुष्मिकविशेषवद्ब्रह्मलोकाख्ये मोक्षे सालोक्यसारूप्यसामीप्यलक्षणविशेषाः संभवन्तीति प्राप्ते—

सिद्धान्तः—एवमिति। न खलु मुक्तौ फले कश्चिदेवंभूतो विशेषः प्रतिनियम आशङ्कितव्यः। कुतः? 'तदवस्थाऽवधृतेः'—मुक्त्यवस्थासु हि सर्वेषु वेदान्तेषु एकरूपैवावगम्यते। यतो ब्रह्मभावो जीवस्य मुक्त्यवस्था। ब्रह्मणस्तु अनेकाकारत्वं सप्रपञ्चं निराकृतं श्रुत्यैवेति 'प्रकृतैतावत्त्वं हि प्रतिषेधति' (ब्र. सू. ३-२-२२) इत्यस्मिन् अधिकरणे पादादौ

---

* पूर्वं यथा विद्यायाः ऐहिकामुष्मिकत्वविशेषनियम उक्तः, तथा तत्फलेऽपि मोक्षे कश्चिदुत्कर्षादिविशेषनियमः स्यात्—इति दृष्टान्तसंगत्येदमाह— स.शि.बु

निरूपितम् । तस्मात् चतुर्मुखस्य मनुष्यस्य चैकरूपा मुक्तिः । सालोक्यादिविशेषस्तु जन्मरूपत्वात् उपासनातारतम्येन भविष्यति सातिशयः । 'तदवस्थाऽवधृतेस्तदवस्थाऽवधृतेः' इति पदाभ्यासोऽध्यायपरिसमाप्तिं द्योतयति ॥ २ ॥

[इति मुक्तिफलाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

तृतीयाध्यायस्य

चतुर्थः पादः

चतुर्थाध्यायस्य

प्रथमः पादः

[१. आवृत्त्यधिकरणम्]

१. आवृत्तिरसकृदुपदेशात् ४-१-१

एवं तृतीयेऽध्याये परापरविद्यासाधनं निरूप्याधुना फलविचार आरभ्यते। तत्रादौ साधनशेषविचारः कैश्चिदधिकरणैः क्रियते* ॥

तत्र किं विद्यासाधनश्रवणादीनि सकृदेवानुष्ठेयानि? उत यावत्फलमसकृदनुष्ठेयानि? इति संशये—'सकृत्कृते कृतः शास्त्रार्थः' इति न्यायेन श्रवणादीनां प्रयाजादिवत् सकृदेवानुष्ठानमिति प्राप्ते—

राद्धान्तः—आवृत्तिरिति। श्रवणादीनामावृत्तिः कर्तव्या। कुतः? 'असकृदुपदेशात्'—'श्रोतव्यो मन्तव्यो निदिध्यासितव्यः'—(बृ. ४-५-६) इत्यादिको हि असकृदुपदेशः प्रत्ययावृत्तिं सूचयति। 'सकृत्कृते कृतः शास्त्रार्थः' इति न्यायस्तु अदृष्टार्थेषु भवतु। दृष्टार्थेषु श्रवणादिषु ब्रह्मसाक्षात्कारफलस्यासंभवात् अवघातादिष्विव यावत्फलमनुष्ठानं कार्यम् ॥ १ ॥

२. लिङ्गाच्च ४-१-२

लिङ्गमपि प्रत्ययावृत्तिं प्रत्याययति। तथा ह्युद्गीथविज्ञानं प्रकृत्य 'आदित्य उद्गीथः' (छा-१-५-१) इत्येकपुत्रतादोषेणापोद्य 'रश्मींस्त्वं

---

* पूर्वं मोक्षे विशेषाभाव उक्तः। तथा श्रवणादौ आवृत्तिविशेषो नास्तीति दृष्टान्तावान्तरसंगत्येदमधिकरणमाह—स. शि. वृ.

पर्यावर्तयात्' (छा-१-५-२) इति रश्मिबहुत्वविज्ञानं बहुपुत्रतायै विदधत् प्रत्ययावृत्तिं दर्शयति। तत्सामान्यात् सर्वप्रत्ययेष्वपि आवृत्तिसिद्धिः ॥

न चात्र सूत्रकारेण प्रत्ययावृत्त्यङ्गीकारात् निदिध्यासनजनितः कश्चित् वाक्यश्रवणजनितविद्यायामपरोक्षानुभवरूपातिशयोऽङ्गीकृत इति युक्तं वक्तुम्—'सहकार्यन्तरविधिः पक्षेण तृतीयं' (ब. सू-३-४-४७) इति सूत्रविरोधप्रसङ्गात् ॥

तर्ह्यावृत्तिनिरूपणमनर्थकमिति चेत् - सत्यम्—सकृत्प्रवृत्ततत्त्वमसीति वाक्यं ब्रह्मात्मैक्यं न बोधयेत् ॥

तर्ह्यावृत्तावपि तन्न बोधयत्येव। नापि मनननिदिध्यासनाभ्यां सहावर्त्यमानं श्रवणं ब्रह्मात्मैक्यसाक्षात्कारं करोति ; सकृत्प्रवृत्तवाक्यानवगतो विशेषो मनननिदिध्यासनाभ्यां सह सहस्रकृत्वोऽप्यभ्यस्यमानान्न प्रतीयेत। अस्थूलादिवाक्ये निराकृतप्रपञ्चविशेषं 'अथ' इत्यादिवाक्यावगतनिर्विशेषं च नित्यशुद्धबुद्धमुक्तस्वभावात्मरूपं ब्रह्म सकृदपि तावन्मात्रमेव बोध्यमानं विशेषविज्ञानोत्पत्त्यसंभवात् सविशेषदीर्घप्रपाठकग्रहणादिषु श्रवणमननध्यानावृत्त्या ग्रहणातिशयो युक्तः। तस्मात् ब्रह्मणि श्रवणादिनिरूपणमनर्थकमिति ॥

अत्रोच्यते—न तावत् सकृत् प्रवृत्तं तत्त्वमसिवाक्यं शुद्धान्तःकरणस्य मुमुक्षोर्जिज्ञासोर्मननादिसहकृतं तद्वियुक्तं वा ब्रह्मात्मत्वसाक्षात्कारं न करोतीति युज्यते वक्तुम्, विचित्रप्रतिपत्तित्वात् प्रतिपत्तॄणाम्। एतदुक्तं 'सकृच्छ्रवणमात्रेण पिशाचवदवाप्नुयात्' इति ॥

यस्य न शक्नोति तं प्रत्यनर्थकमिति चेत्—न—तं प्रति मनननिदिध्यासनाभ्यां सहकृतं तत्त्वमस्यादिवाक्यं बोधयति श्रवणानर्थक्यपरिहाराय

सूत्रकारेणाप्यावृत्तिनिरूपणात् । तदनेन 'सहाकार्यन्तरविधिः पक्षेण—' इत्यादिसूत्रगतं 'पक्षेण' इतिपदं सूत्रकारेणैव विवृतम् ॥

यत्त्वावर्त्यमानमपि नैव शक्ष्यति बोधयितुमिति—तदसत्—सकृच्छ्रुताद्वाक्यात् मन्दप्रतीतं वाक्यार्थमावर्तयतां तदाभासव्युदासेन तत्प्रतिपत्तेर्दर्शनात् । अत एव छान्दोग्ये 'तत्त्वमसि' (छा-६-८-७) इति नवकृत्वोऽभ्यासो दृश्यते । निर्विशेषेऽपि ब्रह्मणि अविद्यावासनाबाहुल्यात् वाक्यादेवापरोक्षज्ञाने जातेऽपि भेदवासनानिवृत्त्यर्थं मननिदिध्यासनसहितं श्रवणमावर्तनीयमिति सर्वमवदातम् ॥ २ ॥

[इति आवृत्त्यधिकरणम्]

——o——

[२. आत्मत्वोपासनाधिकरणम्]

१· आत्मेति तूपगच्छन्ति ग्राहयन्ति च ४–१–३

* श्रुत्याचार्याभ्यामुपदिष्टं ब्रह्म स्वाभाव्यतया ग्राह्यम् ? उतान्यतया ? इति संशये—अन्यतयैव, यतः दुःख्यदुःखिनोर्जीवब्रह्मणोरैक्यं न घटते—इति प्राप्ते—

सिद्धान्तः—आत्मेतीति । 'तु'शब्दः पक्षं व्यावर्तयति । आत्मेत्येव परमेश्वरः प्रत्येतव्यः । तथा हि परमेश्वरप्रक्रियायां एनमीश्वरमात्मत्वेनोपगच्छन्ति जाबालाः 'त्वं वा अहमस्मि भगवो देवते अहं वै त्वमसि' (जा.)

* पूर्वत्र श्रवणादेरावृत्तिरुक्ता, तामुपजीव्य किञ्चिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—स.शि.वृ.

इति। ग्राहयन्ति चैनमात्मत्वेन वेदवाक्यानि 'एष आत्मा सर्वान्तरः' (बृ. ३, ४-१) 'एष त आत्माऽन्तर्याम्यमृतः' (बृ. ३-७-३) 'स आत्मा तत्त्वमसि श्वेतकेतो' (छा. ६-८-७) इत्येवमादीनि ॥

यत्तु कैश्चिदुक्तं—प्रतिमादिष्विव विष्ण्वादिदर्शनवत् एकत्वेन ज्ञानमुपचरितमिति—तदसत्—उपक्रमादिषड्विधतात्पर्यलिङ्गबलात् वेदान्तानां ब्रह्मात्मैक्ये तात्पर्यसंभवेनोपचरितत्वायोगात् ॥

किञ्च ब्रह्मस्वरूपस्य सतो जीवस्यान्तःकरणोपाधिकृतो दुःखित्वादिसंसार इति वियत्पादे जीवविचारे प्रतिपादितम्। ततोऽविद्याकल्पितजीवगत कर्तृत्वादिकं परमेश्वरगतपरोक्षत्वादिकं च निराकृत्य यथास्थितैकत्वस्य ज्ञातुं शक्यत्वात् ॥

किञ्च आत्मशब्दश्च प्रत्यगात्मन्येव रूढ इति न परमात्मनः परमेश्वरस्य जीवस्य च भेदशङ्काऽपि नास्ति। 'उदरमन्तरं कुरुते। अथ तस्य भयं भवति' (तै. आ. ६) इति भेदनिन्दादर्शनाच्च न तयोर्भेद इति ॥ २ ॥

[इति आत्मत्वोपासनाधिकरणम्]

[३· प्रतीकाधिकरणम्]

१. न प्रतीके न हि सः ४–१–४

* 'मनो ब्रह्मेत्युपासीत' (छा. ३-१८-१) इत्यादिप्रतीकोपासनेषु किमात्मग्रहः कर्तव्यः ? उत न ? इति संशये—प्रतीकानामपि ब्रह्मविकारत्वात् तद्व्युदासेन ब्रह्मत्वोपपत्तेः तेष्वात्मग्रहः कर्तव्यः इति प्राप्ते—

सिद्धान्तः—नेति । न प्रतीकेष्वात्ममतिं बध्नीयात् । न हि स उपासकः प्रतीकान्यत्वेन कल्पयेत् । न च ब्रह्मविकारत्वात् प्रतीकानां विकारोपमर्दनेन तदुपलक्षितब्रह्मणाऽहंग्रहः उपासकस्य संभवति, प्रतीकत्वभङ्गप्रसङ्गात् । प्रतीकानां स्वरूपोपमर्दने तेषामात्मग्रहायोगात् । ब्रह्मदृष्ट्युपदेशोऽस्तीत्येतावता तेष्वात्मत्वकल्पनायोगात्, कर्तृत्वाद्यनिराकरणात् । कर्तृत्वाद्यनिराकरणे चाहंग्रहोपासनाऽपि न सिध्येत् ॥ २ ॥

[इति प्रतीकाधिकरणम्]

[४. ब्रह्मदृष्ट्यधिकरणम्]

१. ब्रह्मदृष्टिरुत्कर्षात् ४–१–५

† 'मनो ब्रह्मेत्युपासीत' (छा. ३-१८-१) इत्यादिप्रतीकोपासनेषु अन्यः संशयः । किं मनोदृष्टिर्ब्रह्मण्यध्येषितव्या ? किं ब्रह्मदृष्टिर्मनसि ?

---

* पूर्वं यथा ब्रह्मणा सहाभेदसत्त्वादहंग्रह उक्तः, तद्वत्—प्रतीकेष्वपि ब्रह्मविकारतया जीवाभिन्नब्रह्माभिन्नत्वान् जीवाभेदसत्त्वेनाहंग्रहः कार्य इति दृष्टान्तसंगत्येदमाह—स·शि·वृ.

† पूर्वोक्तप्रतीकोपासनानि विषयीकृत्यान्यत् किञ्चित् विचार्यत इत्येकविषयत्वसंगत्येदमाह—स. शि. वृ.

इति । तत्राब्रह्मस्वरूपमनोदृष्टिं ब्रह्मणि कृत्वा ब्रह्मोपासनीयम् , ब्रह्मणः फलप्रदत्वेनोपास्यमानत्वादिति प्राप्ते—

सिद्धान्तः—ब्रह्मदृष्टिरिति । ब्रह्मदृष्टिर्मनआदिषु स्यात् । कुतः ? उत्कर्षात्—एवमुत्कर्षेणादित्यादयो दृष्टा भवति, उत्कृष्टदृष्टेस्तेष्वध्यासात् । लोके च राजापेक्षया निकृष्टे मन्त्रिणि राजदृष्टिं कृत्वा राजवत् तं पूजयन्ति ॥ १ ॥

[इति ब्रह्मदृष्ट्यधिकरणम्]

[५. आदित्यादिमत्यधिकरणम्]

१. आदित्यादिमतयश्चाङ्ग उपपत्तेः ४-१-३

* 'य एवासौ तपति तमुद्गीथमुपासीत' (छा. १-३-११) इत्येवमादिषु संशयः—किमादित्यादिषूद्गीथादिदृष्टयो विधीयन्ते ? किं वोद्गीथादिष्वादित्यादिदृष्टयः ? इति । तत्र आदित्योद्गीथयोर्ब्रह्मविकारत्वेनान्यतरोत्कर्षानिश्चयात् अनियमप्राप्तौ—

सिद्धान्तः—आदित्यादीति । आदित्यादिमतय एवाङ्गेषूद्गीथादिषु क्षिप्येरन् । कुतः ? 'उपपत्तेः'—उपपद्यते ह्येवमपूर्वादिसन्निकर्षादादित्यादिमतिभिः संस्क्रियमाणेषूद्गीथादिषु कर्मसमृद्धिः । 'यदेव विद्यया करोति तदेव श्रद्धयोपनिषदा वीर्यवत्तरं भवति' (छा. १-१-१०) इति

---

* सिद्धरूपादित्यादिभ्यः कर्मरूपोद्गीथानां फलसन्निकर्षोत्कर्षात् ब्रह्मवद्विशेषवत्त्वनियम इति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

च विद्यायाः कर्मसमृद्धिहेतुतां च दर्शयति । फलात्मकत्वाच्चादित्यादीनां उद्गीथादिभ्यः उत्कर्षोपपत्तिः ॥ १ ॥

[इति आदित्यादिमत्यधिकरणम्]

[६. आसीनाधिकरणम्]

१. आसीनस्संभवात् ४-१-७

* कर्माङ्गावबद्धोपासनानां कर्मतन्त्रत्वान्नासनचिन्ता । नापि सम्यग्दर्शने, वस्तुतन्त्रत्वात् ज्ञानस्य । इतरेषूपासनेषु किमस्त्यासननियमः ? इति संशये—तत्र मानसव्यापारं प्रति विशेषस्यानुपयुक्तत्वान्नास्तीति प्राप्ते—

सिद्धान्तः—असीन इति । आसीन एवोपासीत । कुतः ? 'संभवात्'—उपासनं नाम मानसप्रत्ययप्रवाहकरणम् । न च तत् गच्छतो धावतो वा संभवति । गत्यादीनां चित्तविक्षेपकरत्वात् । तिष्ठतोऽपि धारणे व्यापृतं मनो न सूक्ष्मवस्तुनिरीक्षणक्षमम् । शयानस्यापि मनोऽकस्मादिव निद्रयाऽभिभूयेत । आसीनस्यैवंविधदोषास्सुपरिहरा इति परिशेषात् आसीनस्यैव उपासना संभवति ॥ १ ॥

२. ध्यानाच्च ४-१-८

किञ्च समानप्रत्ययप्रवाहकरणं नाम ध्यानम् । तच्च एकविषयाक्षिप्तचित्ताना घटते । 'ध्यायति प्रोषितनाथा वधूः' इत्यादौ तथा

---

* एवं कर्माङ्गाश्रितोपासनानां आसननियमानपेक्ष्याणामनुष्ठानप्रकार उक्तः । तद्वदङ्गाश्रितोपासनेष्वपि अनियम इति दृष्टान्तसंगत्येदमाह—र.शि.वृ.

दर्शनात् । ध्यानं चासीनस्यैव संभवति । तस्मादप्यासीनकर्मोपासनम् ॥ २ ॥

३. अचलत्वं चापेक्ष्य ४-१-९

'ध्यायतीव पृथिवी' (छा. ७-६-१) इत्येवमादिषु अचलत्वमेवापेक्ष्य ध्यायतिवादो भवति । तच्च लिङ्गमुपासनस्यासीनकर्मत्वे ॥ ३ ॥

४. स्मरन्ति च ४-१-१०

शिष्टा उपासनस्यासनाङ्गकत्वं स्मरन्ति 'शुचौ देशे प्रतिष्ठाप्य स्थिरमासनमात्मनः' (गी. ६-११) इति ॥ ४ ॥

[इति आसीनाधिकरणम्]

[७. एकाग्रताधिकरणम्]

१. यत्रैकाग्रता तत्राविशेषात् ४-१-११

* उपासनायां किं देशकालनियमोऽस्ति ? उत न ? इति संशये—वैदिकक्रियासु नियमदर्शनात् अस्तीति प्राप्ते—

सिद्धान्तः—यत्रेति । यत्रैकाग्रता, तत्रैवोपासनां प्रयोजयेत् । कुतः ? 'अविशेषात्' कर्मानुष्ठान इव दिग्देशकालनियमाभावात् ॥

---

* पूर्वमङ्गानाश्रितेषूपासनेषु यथा आसननियम उक्तः, तद्वद्दिगादिनियमोऽप्यस्तु ; 'प्राचीनप्रवणे वैश्वदेवेन यजेत' इत्यादिदिगादिनियमदर्शनादिति दृष्टान्त संगत्येदमाह—स·शि·वृ.

एतदुक्तं भवति—'ब्रह्मयज्ञेन यक्ष्यमाणः प्राच्यां दिशि ग्रामेषु' (तै. आ.) इति यथा दिग्विशेषः, 'कर्मणि प्राचीनप्रवणे वैश्वदेवेन यजेत' इति देशविशेषः, 'अपराह्णे पिण्डपितृयज्ञेन चरन्ति' इति कालविशेषः— न तथा सगुणोपासनायां मनसः सौकर्यं विना न किमप्यपेक्षणीयमस्ति। अत एव श्रुतिः योगाभ्यासाय प्रदेशं निर्दिशन्ती—'मनोऽनुकूले' (श्वे. २-१०) इत्याह॥

ननु 'समे शुचौ शर्करावह्निवालुकाविवर्जिते' (श्वे. २-१०) इति श्रुतिरेव योगाभ्यासाय देशविशेषं निर्दिशति—सत्यम्— दृष्टसौकर्यार्थं तदिति वाक्यशेषे मनोऽकूलत्वविशेषणात् निश्चीयते। तस्मान्नास्त्युपासनायामासन-नियमेऽपि देशादिनियमः॥ २॥

[इति एकाग्रताधिकरणम्]

———

[८. आप्रयाणाधिकरणम्]

१. आप्रयाणात्तत्रापि हि दृष्टम् ४-१-१२

* किमभ्युदयफलानामुपास्तीनां यावदिच्छमावृत्तिः? उताऽऽमृतेः? इति संशये—कियन्तं कालं प्रत्ययमभ्यस्योत्सृजेत्; आवृत्तिविशिष्टस्योपासना-शब्दार्थस्य तावता निष्पन्नत्वादिति प्राप्ते—

* पूर्वं यथा दिगादिनियमाश्रवणात् तदभाव उक्तः, तथा यावज्जीवमुपासना-वृत्त्यश्रवणात् तदभाव इति दृष्टान्तसंगत्येदमाह—स·शि·वृ.

अभिधीयते—आप्रयाणादिति । आप्रयाणादावर्तयेत् प्रत्ययम्, अन्त्यप्रत्ययवशाददृष्टफलप्राप्तिपर्यन्तमुपासनां कुर्यादित्यर्थः । न यथा ज्योतिष्टोमादिकर्मणां अदृष्टद्वारेणाभ्युदयफलानामामरणमनुष्ठानमपेक्षितम्, तथेहापीति वाच्यम्; यतो ज्योतिष्टोमादीन्यपि कर्माणि स्वानुरूपं भावना-विज्ञानं प्रयाणकाल आक्षिपन्ति । तथा च श्रुतिः—'सविज्ञानो भवति, सविज्ञानमेवान्ववक्रामति' 'यच्चित्तस्तेनैष प्राणमायाति प्राणस्तेजसा युक्तः सहात्मना यथासंकल्पितं लोकं नयति' इति । यदा च कर्मणामियं गतिः, तदा किमु वक्तव्यमुपासनानामामरणमावृत्त्यपेक्षणीतेति 'तत्रापि दृष्टम्' इत्यनेनोच्यते । तत्रापि—अग्निहोत्रादिकर्मण्यपि तदनुरूपं भावना-विज्ञानं दृष्टमित्यर्थः ॥

अथवा प्रायणकालेऽपि प्रत्ययावृत्तिः कर्तव्येत्यत्रापि श्रुतिवचनं स्मृति-वचनं च दृष्टमित्याह—तत्रापि हि दृष्टमिति । 'स यत्क्रतुरस्माल्लोकात् प्रैति' इति श्रुतिवचनम् । 'यं यं वाऽपि स्मरन् भावं त्यजत्यन्ते कले-बरम् । तं तमेवैति कौन्तेय सदा तद्भावभावितः' (गी ८-१०) इति स्मृतिवचनम् ॥ १ ॥

[इति आप्रयाणाधिकरणम्]

[९. तदधिगमाधिकरणम्]

१. तदधिगम उत्तराघपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात् ४-१-१३

* एवं तावत् साधनाध्यायविचारयोग्यानामपि केषांचित् साधनानां फलं प्रत्यासन्नत्वेनाष्टभिरधिकरणैः फलाध्याये विचारः कृतः। इदानीं ब्रह्मात्मैकत्वविद्याफलं प्रति चिन्त्यते ॥

किं ब्रह्मविज्ञानात् दुरितक्षयो भवति ? न वा ? इति संशये— 'नाभुक्तं क्षीयते कर्म कल्पकोटिशतैरपि' इत्यादिवचनात्, श्रुतौ च कर्मणां फलदायकत्वशक्त्यवगमात् न भवतीति प्राप्ते—

अभिधीयते—तदधिगम इति। तदधिगमे—ब्रह्मात्मैकत्वावगमे सति उत्तरपूर्वयोः अघयोरश्लेषविनाशौ भवतः। उत्तरस्याश्लेषः, पूर्वस्य विनाशः। कस्मात् ? 'तद्व्यपदेशात्'—तथाहि ब्रह्मविद्याप्रक्रियायां संभाव्यमानसंबन्धस्यागामिनो दुरितस्यानभिसंबन्धं विदुषो दर्शयति—'यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवंविदि पापं कर्म न श्लिष्यते' (छा. ४-१४-३) इति। तथा विनाशमपि पूर्वसञ्चितस्य दुरितस्य व्यपदिशति— 'तद्यथेषीकातूलमग्नौ प्रोतं प्रदूयेत एवं हास्य सर्वे पाप्मानः प्रदूयन्ते'— (छा. ५-१४-३) इति ॥

'नाभुक्तं' इत्यादिशास्त्रं तु सगुणनिर्गुणब्रह्मज्ञानरहितपुरुषविषयम्। नापि कर्मशक्तिमवजानीमहे, येन तत्प्रतिपादकं शास्त्रं कदर्थितं स्यात्। विद्यत एव तु सा। सा तु विद्यादिना कारणान्तरेण बाध्यते ॥

---

* पूर्वं यथा उपासकानां यावज्जीवं कर्तव्यमस्तीत्युक्तम्, न तथा ब्रह्मात्मविदामिति प्रत्युदाहरणसंगत्येदमाह—स. शि. बु.

किञ्च निर्गुणब्रह्मात्मविदः पापलेपशङ्कापि नोदेति । नाकारिषं, न करोमि, न करिष्यामीति कालत्रयेऽप्यकर्तृब्रह्मस्वरूपत्वेन निश्चितत्वात् । न ह्यकर्तुः पापफलं मन्दा अपि शङ्कन्ते ॥

सगुणब्रह्मविदोऽपि वचनबलान्न पापशङ्कावकाशः । तस्मात् ब्रह्माधिगमे दुरितक्षय इति सिद्धम् ॥ २ ॥

[इति तदधिगमाधिकरणम्]

[१०. इतरासंश्लेषाधिकरणम्]

१. इतरस्याप्येवमसंश्लेषः पाते तु ४-१-१४

*किं पुण्यमपि ब्रह्मात्मैकत्वज्ञानेन क्षीयते ? किं वा न क्षीयते ? इति संशये—धर्मस्य शास्त्रीयत्वात् शास्त्रीयेण ज्ञानेन विरोधाभावान्न पुण्यक्षय इति प्राप्ते—

राद्धान्तः—इतरस्यापीति । इतरस्यापि पुण्यस्य कर्मणः एवमसंश्लेषो विनाशश्च ज्ञानवतो भवतः । कुतः ? तस्यापि स्वफलहेतुत्वेन ज्ञानफलप्रतिबन्धकत्वात् । 'उभे उ हैवैष एते तरति' (बृ-४.४.२२) इत्यादिश्रुतिषु च दुष्कृतवत्सुकृतस्यापि प्रणाशव्यपदेशात् । शास्त्रीयस्यापि कर्मणः श्येनादिवत् अनर्थरूपकर्तृत्वादिप्रवर्तकत्वात् निवृत्त्युपपत्तेः ॥

---

* पूर्वं ब्रह्मविदः पापस्याश्लेषविनाशावुक्तौ, न तथा पुण्यस्यापि तौ भवतः, तस्य श्रौतत्वेन श्रौतब्रह्मज्ञानेनाविरोधादिति प्रत्युदाहरणसंगत्येदमाह—स. शि. वृ.

'पाते तु' इति 'तु' शब्दः अवधारणार्थः । एवं धर्माधर्मयोर्निवृत्तौ देहपाते मुक्तिरवश्यं भाविनीति ॥ १ ॥

[इति इतराश्लेषाधिकरणम्]

[१५. अनारब्धाधिकरणम्]

१. अनारब्धकार्ये एव तु पूर्वे तदवधेः ४-१-१५

* प्रारब्धं कर्मापि सञ्चितवन्नश्यति ? न वा ? इति । सुकृतत्वाविशेषाल्लयप्राप्तौ—

अभिधीयते—अनारब्ध इति । अनारब्धकार्ये एव—अप्रवृत्तफले एव तु पूर्वजन्मसञ्चिते, अस्मिन्नपि जन्मनि प्राक् ज्ञानोत्पत्तेः सञ्चिते ज्ञानाधिगमात् क्षीयेते । न त्वारब्धकार्ये सामिभुक्तफले, याभ्यामेतद्ब्रह्मज्ञानायतनं जन्म निर्मितम् । ज्ञाने चैतच्छरीरमपेक्ष्य जन्मासंभवात् न प्रारब्धकर्मबाधकत्वं, विरोधाभावात् । कुत एतत् ? 'तदवधेः'—पूर्वसूत्रगतशरीरपात एव तच्छब्दार्थः । स एवावधिः—तदवधिः । यस्मात् प्रारब्धकर्मणः, तस्मात् । तथाच श्रुतिः—'तस्य तावदेव चिरं यावन्न विमोक्ष्ये अथ संपत्स्ये' (छा-६-१४-२) इति ॥

अस्याश्चायमर्थः—तस्य—तत्त्वविदः मुक्तिर्विलम्बमानाऽपि नात्यन्तं विलम्ब्यते । किन्तु गर्भाधानकाले क्लृप्तस्यायुषः क्षयाभावे यावत् देहः

---

* पूर्वं ज्ञानात् कर्मक्षय उत्सर्गेत उक्तः । तस्येह प्रारब्धकर्मव्यतिरिक्तविषयत्वेनापवादः क्रियत इत्युत्सर्गापवादसंगत्येदमाह स॰ शि॰ वृ.

प्राणैर्न विमोक्ष्यते, तावदेव विलम्ब्यते । अथ—देहप्राणवियोगे सति ब्रह्म संपद्यत इति ॥

यद्यपि ब्रह्मात्मैकत्वज्ञानं मिथ्याज्ञानबाधनेन कर्माण्युच्छिनत्ति । बाधितमपि मिथ्याज्ञानं द्विचन्द्रज्ञानवत् संस्कारवशात् कञ्चित्कालमनुवर्तत एव ॥ १ ॥

[इति अनारब्धाधिकरणम्]

[१२. अग्निहोत्राद्यधिकरणम्]

१. अग्निहोत्रादि तु तत्कार्यायैव तद्दर्शनात् ४-१-१६

* किमग्निहोत्रादिकं नित्यं कर्म अपवन्नश्यति ? न वा ? इति संशये—ब्रह्मात्मैकत्वज्ञानसामर्थ्यान्नाशे प्राप्ते—

अभिधीयते—अग्निहोत्रादीति । 'तु'शब्दः आशङ्कामपनुदति । यत् नित्यं वैदिकं कर्माग्निहोत्रादि, 'तत्कार्यायैव' भवति । ज्ञानस्य यत् कार्यं तदेवस्यापि कार्यमित्यर्थः । कुतः ? 'तद्दर्शनात्'—'तमेतं' (बृ. ४-४-२२) इत्यादौ कर्मणामपि ज्ञानकार्यत्वदर्शनादित्यर्थः ॥

इह च सगुणब्रह्मज्ञानस्य नित्यकर्मसहकारित्वमुक्तम्, न निर्गुण-ब्रह्मात्मैकत्वज्ञानसहकारित्वम् । ब्रह्मात्मभावलक्षणमोक्षस्य नित्यस्यासाध्यत्वेन

---

* पूर्वमानारब्धकार्याणां ज्ञानात् क्षय उत्सर्ग उक्तः । तस्येह नित्यनैमित्तिकातिरिक्तानारब्धकर्मविषयत्वेनापवादः क्रियत इति उत्सर्गापवादसंगत्येदमाह— स. शि. वृ.

कर्मसाध्यत्वासंभवात् । चित्तशुद्धिद्वारा तु सर्वमपि कर्म प्रणाड्या ज्ञानप्रापकमिति मोक्षस्यापि कर्मसाध्यत्वोपचारः ॥

किञ्च कर्मसन्यासस्य साक्षाद्वेदान्तश्रवणसाधनत्वमिति 'विधिर्वा धारणवत्' (ब्र. सू. ३-४-२०) इत्यत्र स्वेनैवोक्तत्वात् । अनियोज्यात्मप्रतिपत्त्यनन्तरं शास्त्रस्याविषयत्वाच्च ॥

यद्यपि 'कर्मणा पितृलोकः' इत्यादिश्रुतिसामर्थ्यान्नित्यानामपि काम्यवदनर्थहेतुत्वमस्तीति अघवदश्लेषविनाशौ सिद्धावेव—तथापि यथा भोगेनोपक्षीणत्रीह्यादौ नाशव्यवहारदर्शनात् चित्तशुद्धिप्रदस्यापि विद्यायामुपक्षीणत्वात् न नाशो वर्णयितुं शक्य इति नित्यकर्मानाशं वदनः सूत्रकारस्याभिप्रायः ॥ १ ॥

ननु सगुणविद्यायामपि 'तस्य पुत्रा दायमुपयन्ति' इत्यादौ सर्वकर्मणामविशेषेण नाशः श्रूयते । ततः कथं सगुणविद्यायां नित्यकर्मानुष्ठानम् ? इति—तत्राह—

२. अतोऽन्याऽपि ह्येकेषामुभयोः ४–१–१७

अतः—अग्निहोत्रादेर्नित्यात् कर्मणः अन्याऽपि ह्यस्ति साधुकृत्या, या फलमभिसन्धाय क्रियते । तस्या एव विलय उक्तः एकेषां शाखिनां 'सुहृदः साधुकृत्यामुपयन्ति' इति । तस्या एव चेदमघवदश्लेषविनाशवचनमित्युभयोरपि जैमिनिबादरायणयोः संप्रतिपत्तिः ॥ २ ॥

[इति अग्निहोत्राधिकरणम्]

---

* [पूर्वोक्तनित्यादिकं विषयमुपजीव्य किञ्चिद्विचार्यत इति एकविषयत्वसंगत्येदमाह—

१. यदेव विद्ययेति हि ४-१-१८

अत्र पूर्वपक्षे केवलस्य नित्यादेः ज्ञानहेतुत्वासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्र किं नित्यादिकर्माङ्गाश्रितोपास्तिसहितमेवानुष्ठेयमिति नियमः? किं वा तत्सहितं—केवलं वा? इत्यनियम इति सन्देहे नियम इति पूर्वः पक्षः—

सिद्धान्तस्तु—अनियम एव युक्तः। तथाहि—'यदेव विद्यया करोति श्रद्धयोपनिषदा तदेव वीर्यवत्तरं भवति' (छा. १-१-१०) इति श्रुतिः विद्यासहितस्य कर्मणो वीर्यवत्तरत्वं ब्रुवती विद्याहीनस्य कर्मणो वीर्यवत्त्वं दर्शयति। तच्च केवलस्य कर्मणो ज्ञानहेतुत्व उक्तं स्यादित्यर्थः॥ १॥

[इति विद्याज्ञानसाधनत्वाधिकरणम्]

[१४. इतरक्षपणाधिकरणम्]

पूर्वमनारब्धकर्मणः क्षयोक्तौ आरब्धस्य कथं क्षय इत्याकाङ्क्षायां, अस्योत्थानादुत्थाप्योत्थापकलक्षणसंगत्येतदमाह—

---

* कुण्डलितो भागः (पुटद्वयगतः) मातृकाया लुप्तत्वात् सदाशिववृत्तेः पूरितः॥

१. भोगेन त्वितरे क्षपयित्वा संपद्यते ४-१-१९

अत्र पूर्वपक्षे विदेहकैवल्यासिद्धिः, सिद्धान्ते तत्सिद्धिरिति फलभेदः। तत्त्वविदत्र विषयः। स किं प्रारब्धक्षयानन्तरं संसरति ? उत न ? इति सन्देहे—देहपातात्पूर्वं संसारानुवृत्तिवत् देहपातानन्तरमपि ब्रह्मवित् संसरतीत्यनारब्धाधिकरणदृष्टान्तेन पूर्वः पक्षः—

सिद्धान्तस्तु इतरे तु—आरब्धपुण्यपापे भोगेन क्षपयित्वा विद्वान् संपद्यते—'तस्य तावदेव चिरं यावन्न विमोक्ष्येऽथ संपत्स्ये' (छा. ६-१४-२) इति, 'ब्रह्मैव सन् ब्रह्माप्येति' (तै. आ. २-२) इत्यादिश्रुतिभ्यः। देहपातात् पूर्वं प्रारब्धकर्मणां सत्त्वात् कुलालचक्रभ्रमणन्यायेन—मिथ्याज्ञानरूपनिमित्तनाशेऽप्यनुवृत्तिर्युक्ता। तद्भोगानन्तरं कस्य चिदपि कर्मणोऽभावान्न संसारानुवृत्तिः। तस्मात् भोगेन प्रारब्धकर्मनाशानन्तरं विद्वान् स्वरूपानन्दात्मनाऽवस्थानलक्षण कैवल्यं लभत इत्यतिशोभनम्] ॥ १ ॥

[इति इतरक्षपणाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

चतुर्थाध्यायस्य

प्रथमः पादः

चतुर्थाध्यायस्य

द्वितीयः पादः

[१. वागधिकरणम्]

१. व.ङ्मनसि दर्शनाच्छब्दाच्च ४-२-१

* अस्मिन् पादे सगुणविद्याफलप्राप्तये देवयानमार्गश्चिन्त्यते। उत्क्रान्त्यनन्तरं अर्चिरादिप्रतिपत्तिरित्यादावुत्क्रान्तिश्चिन्त्यते ॥

छान्दोग्ये श्रूयते—'अस्य सोम्य पुरुषस्य प्रयतो वाङ्मनसि संपद्यते मनः प्राणे प्रणस्तेजसि तेजः परस्यां देवतायाम्' (छा-६-८-६) इति। तत्र किं वाच एव वृत्तिमत्या मनसि संपत्तिरुच्यते? उत—वाग्वृत्तेः? इति संशये 'वाङ्मनसि' इति श्रुतौ वृत्तिशब्दाश्रवणात् स्वरूपलये प्राप्ते—

सिद्धान्तः—वाङ्मनसीति। वाग्वृत्तिर्मनसि संपद्यते। वृत्तिवृत्तिमतोरभेदोपचारात् मनःशब्देन वृत्तिरुच्यते। वक्ष्यति पुरस्तात्—'अविभागो वचनात्' (ब्र. सू. ४-२-१६) इति। मनसो वागाद्यनुपादानत्वात् वाचो मनसि लयानुपपत्तेः वृत्तिलय एव युक्तः। वृत्त्युद्भवाभिभवौ तु अनुपादानसमाश्रयावपि दृश्येते। पार्थिवेभ्यो हीन्धनेभ्यः तैजसस्याग्नेर्वृत्ति रुद्भवति, अप्सु चोपशाम्यति। कथं स्मिन् पक्षे श्रुतिः 'वाङ्मनसि संपद्यते'

---

* पूर्वपादे मुक्तिविरुद्धानारब्धकार्यकर्मनिवृत्त्या जीवन्मुक्तत्वं, आरब्धकर्मनिवृत्तौ तु विदेहमुक्तत्वमिति सगुणनिर्गुणविद्ययोः फलं सामान्यतो, निरूपितम्। संप्रात प्रारब्धकर्मक्षयानन्तरभाविनि मोक्षे विशेषप्रदर्शनाय पादत्रयमारभ्यते— स· शि. वृ·

इति । तत्राह शब्दाच्चेति । शब्दोऽस्मिन् पक्षे वृत्तिवृत्तिमतोरभेदोपचारात् घटत इत्यर्थः ।। १ ।।

२. अत एव सर्वाण्यनु ४-२-२

अत एव—'पुनर्भवमिन्द्रियैर्मनसि संपद्यमानैः' (प्र. ३-९) इत्यत्रापि चक्षुरादीनां सवृत्तिके मनसि अवस्थिते वृत्तिलोपदर्शनात्, तत्त्वप्रविलयासंभवात्, शब्दोपपत्तेश्च वृत्तिद्वारेणैव सर्वाणीन्द्रियाणि मनोऽनु वर्तन्ते । वाचः पृथग्ग्रहणमुदाहरणानुरोधेन ।। २ ।।

[इति वागधिकरणम्]

[२. मनोऽधिकरणम्]

१. तन्मनः प्राण उत्तरात् ४-२-३

* 'मनः प्राणे' (छा. ६-८-६) इत्यत्र किं मनोवृत्तिः प्राणे विलीयते ? उत वृत्तिमन्मनः ? इति संशये—प्रकृतिविकाराभेदन्यायेन अन्नमयस्य मनसः अम्मये प्राणे स्वोपादाने लयसंभवात् श्रुतिप्रामाण्यसंभवाच्च वृत्तिमल्लोपे प्राप्ते—

सिद्धान्तः—तन्मन इति । तदप्यागृहीतबाह्येन्द्रियं मनो वृत्तिद्वारेणैव प्राणे विलीयते, न स्वयम् । कुतः ? 'उत्तरात्'—'अन्ने मनः

* पूर्वं मनसि सर्वेन्द्रियवृत्तिलय उक्तः । न तथा मनसः प्राणे वृत्तिलयः ; 'अन्नमयं हि सौम्य मनः, आपोमयः प्रणः' इति श्रुतौ प्राणमनसोरबन्नविकारत्वश्रवणात् अबन्नयोश्चोपादानोपादेयभावात् स्वरूपलय इति प्रत्युदाहरणसंगत्येदमाह ।

—स· शि. वृ.

संपद्यते, अप्सु प्राणः' इत्युत्तरात् वाक्यात् इत्यर्थः । अस्मिन् वाक्ये स्वकारणभूते ह्यन्न मनसो लयः प्रतीयते, अन्नस्य च स्वकारणभूतास्वप्सु, न तु प्राणे । तस्मात् 'मन–प्राण इत्यत्र मनोवृत्तेरेव प्राणे लयः, न तु मनसो धर्मिणः, प्राणस्य तदनुपादानत्वात् ॥

यत्तु पृथिव्यब्विकारयोः स्वयोनिप्रणाडिकया मनःप्राणयोः प्रकृति-विकारभावं संपाद्य स्वोपादाने प्राणे मनसो धर्मिण एव लयः संभवतीति— तदयुक्तम्—यया कयाचित्कल्पनया तयोः प्रकृतिविकाराभ्युपगमे सांकर्य-प्रसङ्गात्, अतिप्रसङ्गश्च । तस्मान्मनोवृत्तिरेव प्राणे विलीयत इति सिद्धम् ॥ १ ॥

[इति मनोऽधिकरणम्]

[३. अध्यक्षाधिकरणम्]

१. सोऽध्यक्षे तदुपगमादिभ्यः ४–२–४

* यस्य यतो नोत्पत्तिः, ततस्तस्मिन् वृत्तिलय एव, न स्वरूपलय ति [illegible] तम् । इदानीं 'प्राणस्तेजसि' (छा. ६-८-६) इत्यत्र किं प्राणस्य तेजसि लयः? उत जीवे? इति संशये—श्रुतिप्रामाण्यात् तेजसीति प्राप्ते—

---

* [illegible]र्वं प्राणे मनसो वृत्तिलय उक्तः । तद्वत्तेजसि प्राणस्य वृत्तिलयोऽस्तु, 'प्राणस्तेजसि' इति श्रुतेरिति दृष्टान्तसंगत्येदमाह—स. शि. वृ.

अभिधीयते—सोऽध्यक्ष इति । सः प्रकृतः प्राणः अध्यक्षे—सर्वसाक्षिणि विद्याकर्मपूर्वप्रज्ञोपाधिके विज्ञानात्मन्यवतिष्ठते, तत्प्रधानत्वात्प्राणवृत्तेः । कुतः ? 'उपगमादिभ्यः'—'एवमेवेममात्मानमन्तकाले सर्वे प्राणा अभि समायन्ति' इति प्राणस्यात्मोपगमदर्शनात् । विशेषेण च 'तमुत्क्रामन्तं प्राणोऽनूत्क्रामति' इति पञ्चवृत्तेः प्राणस्याध्यक्षानुगामितां दर्शयति तदनुवृत्तितां चेतरेषां 'प्राणमनूत्क्रामन्ति' (बृ. ४-४-२) इति ।

कथं तर्हि 'प्राणस्तेजसि' (छा. ६-८-६) इति श्रुतिः ? तत्राह—

२. भूतेषु तच्छ्रुतेः ४–२–५

सः प्राणसंपृक्तोऽध्यक्षः तेजस्सहचरितेषु भूतेषु देहबीजभूतेष्ववतिष्ठत इति तेजश्शब्दवाच्यः । कुतः ? 'तच्छ्रुतेः'—'प्राणस्तेजसि' इति श्रुतेरेव ॥ २ ॥

ननु 'प्राणस्तेजसि' इति तेजस एकस्य श्रवणम् । अतः कथं तेजस्सहचरितेषु भूतेष्वित्युच्यते ? तत्राह—

३. नैकस्मिन् दर्शयतो हि ४–२–६

नैकस्मिन्नेव तेजसि शरीरान्तरप्रेप्सावेलायां जीवोऽवतिष्ठते, कार्यस्य शरीरस्यानेकात्मकत्वदर्शनात् । दर्शयतश्चेममर्थं प्रश्नप्रतिवचने । तत्र भूतस्वरूपं च वैराग्यपादे निरूपितम्—'त्र्यात्मकत्वात्तु भूयस्त्वात्' (ब्र. सू. इत्यत्र ॥ ३ ॥

[इति अध्यक्षाधिकरणम्]

———

[४. आसृत्युपक्रमधिकरणम्]

१. समाना चासृत्युपक्रमादमृतत्वं चानुपोष्य ४–२–७

* सेयमुत्क्रान्तिर्विद्वदविदुषोः समाना ? न वा ? इति संशये अविदुष एव, न विदुषः अमृतत्वश्रवणात् इति प्राप्ते—

अभिधीयते—समाना चेति । समाना चैषोत्क्रान्तिर्विद्वदविदुषोः आसृत्युपक्रमात् भवितुमर्हति, अविशेषश्रवणात् । 'यत्रैतत्पुरुषः स्वपिति नाम' (छा-६-८-१) इत्यादावुत्क्रान्त्यनन्तरं तु विशेषः अविद्वान् देहबीजभूतानि भूतसूक्ष्माण्याश्रित्य कर्मप्रयुक्तो देहग्रहणमनुभवन् संसरति । विद्वांस्तु ज्ञानप्रकाशितमोक्षनाडीद्वारमाश्रयते । तदेतत् 'आसृत्युपक्रमात्' इत्युक्तम् ॥

ननु अमृतत्वमेव विदुषा प्राप्तव्यमिति । तत्र सृत्युपक्रमो भूताश्रयत्वं च (?) ॥ २ ॥

[इति आसृत्युपक्रमाधिकरणम्]

[५. संसारव्यपदेशाधिकरणम्]

१. तदापीतेः संसारव्यपदेशात् ४–२–८

†'तेजःपरस्यां देवतायां' (छा-६-८-६) त्यत्र शरीराध्यक्षतेजश्शब्दवाच्यस्य किमात्यन्तिकी परस्यां देवतायां संपत्तिः ? उत न ? इति संशये—सर्वस्य जनिमतस्तत्प्रकृतित्वोपपत्तेः आत्यन्तिकीति प्राप्ते—

---

* पूर्वोक्तोत्क्रान्तिमुपजीव्यान्यत् किञ्चिद्विचार्यत इत्युपजीव्योपजीवकभाव संगत्येदमाह—स. शि. वृ.

† ननूत्क्रान्तिः समानेत्युक्तम् । मृतस्य स्वरूपत एवात्यन्तं ब्रह्मसंपत्तेरित्याक्षेपसंगत्येदमाह—स. शि. वृ.

अभिधीयते—तत्—तेजआदिभूतसूक्ष्मं श्रोत्रादिकरणाश्रयभूतं आपीतेः—आसंसारमोक्षात् सर्वमज्ञाननिमितमवतिष्ठते। कुतः? 'संसारव्यपदेशात्'—'योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः। स्थाणुमन्येऽनुसंयन्ति यथा कर्म यथा श्रुतम्' (क.२-१-७) इत्यादिसंसारव्यपदेशात् ॥ २ ॥

२. सूक्ष्मं प्रमाणतश्च तथोपलब्धेः ४-२-९

तच्च तेजो भूतान्तरसहितं स्वरूपतः प्रमाणतश्च सूक्ष्मं भवितुमर्हति। 'तथोपलब्धेः'—नाडीनिष्क्रमणश्रवणादिभ्यः सौक्ष्म्यमुपलभ्यते। तत्रातनुत्वे नाडीसंचारानुपपत्तेः देहान्निष्क्रमकाले पार्श्वस्थैरनुपलब्धेश्च स्वरूपतः सूक्ष्मं भवति ॥ २ ॥

३. नोपमर्देनातः ४-२-१०

अत एव सूक्ष्मत्वान्नास्य स्थूलशरीरोपमर्दनेन दाहादिनिमित्तेन इतरत् सूक्ष्मं शरीरं उपमृद्यते ॥ ३ ॥

४. अस्यैव चोपपत्तेरेष ऊष्मा ४-२-११

अस्यैव सूक्ष्मशरीरस्यायमूष्मा, यं स्थूलशरीरसंस्पर्शेन जानन्ति। मृतावस्थायामूष्मणोऽदर्शनात् स्थूलशरीरस्यायमूष्मा नोपपद्यते। तत उपपत्तेः प्रसिद्धशरीरव्यतिरिक्तव्यपाश्रय एवायमूष्मेति सिद्धम् ॥ ४ ॥

[इति संसारव्यपदेशाधिकरणम्]

[६. प्रतिषेधाधिकरणम्]

१. प्रतिषेधादिति चेन्न शारीरात् ४-२-२२

* 'अमृतत्वं चानुपोष्य' (ब्र. सू. ४-२-७) इति ब्रह्मात्मैकत्वविदो गत्युत्क्रान्ती न स्त इति सूचितम्। तत्र संशयः—किं ब्रह्मविदोऽपि गत्युत्क्रान्ती संभवतः ? न वा ? इति ॥

अत्रपूर्ववादी सिद्धान्तबीजमनूद्य दूषयति प्रतिषेधादिति। 'ब्रह्मैव सन् ब्रह्माप्येति न तस्य प्राणा उत्क्रामन्ति' (बृ. ४-४-६) इति। गत्युत्क्रान्त्योः प्रतिषेधात् ब्रह्मविदो न संभवत इति चेत्—न—कुतः ? 'शारीरात्'—शरीरादात्मनः प्राणानामुत्क्रान्तिप्रतिषेधः, न शरीरादित्यर्थः। उत्क्रान्तिप्रतिषेधस्य शरीरापादानत्वे मरणाभावप्रसङ्गात् ॥ १ ॥

अत्राह सिद्धान्ती—

२. स्पष्टो ह्येकेषाम् ४-२-१३

देहापादान एवोत्क्रान्तिप्रतिषेध एकेषां समाम्नातॄणां स्पष्ट उपलभ्यते 'यत्रायं पुरुषो म्रियते उदस्मात्प्राणाः क्रामन्त्याहो नेति' (बृ. ३-२-११) इत्यर्तभागेन पृष्टे, 'नेति होवाच याज्ञवल्क्यः' (बृ. ३-२-११) इत्यनुत्क्रान्तिपक्षं परिगृह्य, न तर्ह्ययमनुत्क्रान्तेषु प्राणेषु म्रियत इत्याकांक्षायां 'अत्रैव समवलीयन्ते' (बृ. ३-२-११) इति याज्ञवल्क्येन प्रतिज्ञातम्। प्रतिज्ञासिद्धये 'स उच्छ्वयत्याध्मायत्याध्मातो मृतश्शेते' (बृ. ३-२-११) इति देहस्योच्छ्वयादीनि चैतानि स्युः। ब्रह्मात्मैक्यविदः तप्ताश्मनि प्रक्षिप्तजल-

---

* आसृत्युपक्रमाधिकरणे मुख्यामृतत्वे उत्क्रान्त्यभावोऽवगतः। स न युक्त इत्याक्षेपसंगत्येदमाह। नाव्यहितेनास्य संगत्यपेक्षा—स. शि. वृ.

विन्दुवत् प्राणाः देहादनुत्क्रामन्तोऽपि न देहेऽवतिष्ठन्ते, किन्तु तत्रैव लीयन्ते इति तात्पर्यार्थः ॥

'न तस्य प्राणा उत्क्रामन्ति' (बृ. ३-२-११) इत्यपि न जीवापादानकप्राणोत्क्रान्तिप्रतिषेधकम्, तेषां जीवेन सहावस्थाने मुक्तिरेव न स्यात्। षष्ठी तु विद्वत्सम्बन्धिनी उत्क्रान्तिप्रतिषेधादुपपद्यते ॥ २ ॥

३. स्मर्यते च ४-२-१४

ब्रह्मात्मैकत्वविदो गत्युत्क्रान्त्योः प्रतिषेधो महाभारते स्मर्यते—'सर्वभूतात्मभूतस्य सम्यग्भूतानि पश्यतः। देवापि मार्गे मुह्यन्त्यपदस्य पदैषिणः' (म. भा.) इति ॥ ३ ॥

[इति प्रतिषेधाधिकरणम्]

[७. वागादिलयाधिकरणम्]

१. तानि परे तथा ह्याह ४-२-१५

* ब्रह्मात्मैकत्वविदः किं वागादीनीन्द्रियाणि स्वस्वहेतौ विलीयन्ते? उत परमात्मनि? इति संशये—'गताः कलाः पञ्चदश प्रतिष्ठाः' (मु. ३-२-७) इति कलाशब्दवाच्यानां प्राणादीनां प्रतिष्ठाशब्दवाच्यस्वस्वकारणेषु लय इति प्राप्ते—

---

* ननु ब्रह्मणि लय इत्ययुक्तम्, 'गताः कालः पञ्चदश प्रतिष्ठाः' इति विद्वद्विषयश्रुत्यैव पृथिव्यादिषु लयश्रवणादित्याक्षेपसंगत्येदमाह स. शि. वृ.

सिद्धान्तः—तानीति । तानि पुनः प्राणशब्दोदितानि इन्द्रियाणि भूतानि च परब्रह्मविदः तस्मिन्नेव परमात्मनि प्रलीयन्ते । कस्मात् ? तथा ह्याह श्रुतिः—'एवमेवास्य परिद्रष्टुरिमाष्षोडशकलाः पुरुषायणाः पुरुषं प्राप्यास्तं गच्छन्ति' (प्र. ६-५) इति । 'गताः कलाः' इति श्रुतिस्तु लौकिकव्यवहारापेक्षा, न ब्रह्मविदपेक्षा ।। २ ।।

[इति वागादिलयाधिकरणम्]

[८. अविभागाधिकरणम्]

१. अविभागो वचनात् ४-२-१६

*स किं कलाप्रलयः सावशेषः ? निरवशेषो वा ? इति संशये—प्रलयसामान्याच्छक्त्यवशेषप्रसक्तौ—

सिद्धान्तः—अविभागापत्तिरेवेति । कुतः ? 'वचनात्'—'स एषोऽकलोऽमृतो भवति' (प्र. ६-५) इति । अविद्यानिमित्तानां विद्यया प्रलये नावशेषोपपत्तिः ।। २ ।।

[इति अविभागाधिकरणम्]

---

* पूर्वोक्तविद्वत्कला विषयीकृत्यान्यत् किञ्चिद्विचार्यत इत्येकविषयत्वसंगत्येदमाह—स. शि. वृ.

[९. तदोकोऽधिकरणम्]

१. तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात् तच्छेषगत्यनुस्मृतियोगाच्च हार्दानुगृहीतश्शताधिकया ४-२-१७

*निर्गुणब्रह्मात्मैकत्वविद्यागता प्रासङ्गिकी चिन्ता समाप्ता । सगुणोपासकस्य लौकिकस्य वा सृत्युपक्रमादुत्क्रान्तिस्समानेत्युक्तं अधस्तात् । अथ मार्गोपक्रमे 'तस्य हैतस्य हृदयस्याग्रं प्रद्योतते । तेन प्रद्योतेनैष आत्मा निष्क्रामति चक्षुषो वा मूर्ध्नो वाऽन्येभ्यो वा शरीरदेशेभ्यः' (बृ. ४-४-२) इत्यादि श्रूयते । किमयं मार्गो विद्वदविदुषोः समः ? उतास्ति कश्चिद्विशेषः ? इति संशये—श्रुत्यविशेषादनियमप्राप्तौ—

सिद्धान्तः— तदोक इति । तस्य—उपसंहृतवागादिकलापस्योच्चक्रमिषतो जीवात्मनः ओकः—आयतनं हृदयं—'स एतास्तेजोमात्रास्समभ्याददानो हृदयमेवान्ववक्रामति' (बृ- ४- ४- १) इति श्रुतेः ; हृदयाग्रस्य प्रद्योतनं— तदोकोऽग्रज्वलनं, भवतीति शेषः । तत्र समानेऽपि विद्वदविदुषोः हृदयाग्रप्रद्योतने तत्प्रकाशितद्वारो विद्वान् मूर्धस्थानादेव निष्क्रामति, स्थानान्तरेभ्यस्त्वितरे । कुतः ? 'विद्यासामर्थ्यात्'। यदि विद्वानपि यतः कुतश्चिद्देशादुत्क्रामेत् नैवोत्कृष्टलोकं लभेत् । तदा चानर्थिका सगुणोपासना स्यात् । तच्छेषगत्यनुस्मृतियोगाच्च—सगुणविद्याशेषभूतां मूर्धन्यनाडीसंबद्धा गतिरनुशीलयितव्या सगुणविद्याविशेषेषु विहिता । तामभ्यस्यंस्तयैव प्रतिष्ठत इति युक्तम् । अतः हार्दानुगृहितः हृदयालयेन ब्रह्मणा सूपासितेनानुगृहितः

---

* स्थितेयं परविद्याचिन्ता । पूर्वं आसृत्युपक्रमाधिकरणे सगुणब्रह्मविदां येयमुत्क्रान्तिः, सेयमितरोत्क्रान्त्या मार्गोपक्रमपर्यन्तं समेत्युक्तम् । तद्वन्मार्गोपक्रमेऽपि समैवास्तु, 'तस्य हैतस्य हृदयस्याग्रं मूर्ध्नो वा' इति हृत्प्रद्योतनादेः समत्वश्रवणादिति दृष्टान्तसंगत्येदमाह –स. शि. वृ.

तद्भावमापन्नो विद्वन् मूर्धन्ययैव शतादतिरिक्तया एकशततम्या नाड्या निष्क्रामति, इतराभिरितरे। तथाहि हार्दविद्यां प्रस्तुत्य समामनन्ति—'शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति' (क- १. १६, छा- ८. ६. ६.) इति ॥ १ ॥

[इति तदोकोऽधिकरणम्]

——o——

[१०. रश्म्यधिकरणम्]

१० रश्म्यनुसारी ४–२–१८

'अथ यत्रैतदस्माच्छरीरादुत्क्रामति अथैतैरेव रश्मिभिरूर्ध्वमाक्रमते' (छा- ८-१-१) इति मूर्धन्यनाड्या निर्गतस्य रश्मिसम्बन्धः श्रूयते। स चाहन्येव मृतस्य संभवति? उत रात्रावपि मृतस्य? इति संशये—अहन्येव मृतस्य भवति, न तु रात्रौ मृतस्यापि इति प्राप्ते—

सिद्धान्त :— रश्म्यनुसारीति। रश्मनुसार्येवोपासक : ॥ १ ॥
पूर्ववाद्युक्तमनूद्य दूषयति—

---

* पूर्वोक्तनाडीसंबद्धरश्मीनत्रोपजीव्य किञ्चिद्विचायत इति उपजीव्योपजीवकभावसंगत्येदमाह—स. शि. वृ.

२. निशि नेति चेन्न सम्बन्धस्य यावद्देहभावित्वा-दर्शयति च ४-२-१९

रात्रौ रश्म्यभावात् नाडीरश्मिसम्बन्धो न घटत इति चेत्—न—कुतः? नाडीरश्मिसम्बन्धस्य यावद्देहभावित्वात्—यावद्देहभावी हि शिराकिरणसंपर्क इतीममर्थं श्रुतिश्च दर्शयति — 'अमुष्मादादित्यात् प्रतायन्ते ता आसु नाडीषु सृप्ता आभ्यो नाडीभ्यः प्रतायन्ते तेऽमुष्मिन्नादित्ये सृप्ताः' (छा. ८-६-२) इति। औष्ण्यदर्शनात् निदाघसमये रात्रावप्यनुवृत्तिर्दृश्यते रश्मीनाम् ॥ २ ॥

[इति रश्म्यधिकरणम्]

[१. दक्षिणायनाधिकरणम्]

१. अतश्चायनेऽपि दक्षिणे ४-२-२०

दक्षिणायने मृतस्य सगुणब्रह्मविदुषो ब्रह्मलोकप्राप्तिः किं संभवति? न वा? इति संशये—स्मृत्यादिषूत्तरायणकालस्य नियमात् न संभवतीति प्राप्ते—

सिद्धान्तः—अत इति। अत एव - रात्रौ रश्मिसंभवात् दक्षिणायने मृतस्याप्युत्तरायणाभिमानिन्या देवतायाः संभवात् अयने दक्षिणेऽपि मृतस्य 'स यावत् क्षिप्येन्मनस्तावदादित्यं गच्छति' (छा- ८. ६. ५) इति श्रुतौ अनुदीक्षादर्शनात्. कालप्रतीक्षणसंभवाच्च ब्रह्मलोकप्राप्तिस्संभवति। अयनादिदेवतासद्भावश्च 'आतिवाहिकास्तल्लिङ्गात्' (ब्र. सू. ४. ३. ४) इत्यत्र

---

* उक्तन्यायमन्यत्रातिदिशति—स. शि. वृ.

वक्ष्यते । भीष्मस्य कालप्रतीक्षणं तु पितृप्रसादलब्धस्वच्छन्दमरणलक्षणपरिपालनार्थम् ।। १ ।।

'यत्र काले त्वनावृत्तिं' (गी- ८-२३) इत्यादिस्मृतौ कालविशेषाऽनुवृत्तये स्मर्यते इति चेत् – तत्राह—

२. योगिनः प्रति च स्मर्यते स्मार्ते चैते ४–२–२१

योगिनः प्रति चायमहरादिकालविशेषोऽनावृत्तये स्मर्यते । स्मार्ते चैते योगसांख्ये, न श्रौते । अतो विषयभेदात् प्रमाणभेदाच्च नास्य स्मर्तव्यस्य कालविनियोगस्य श्रौतेषु ज्ञानेषु अवतारः । स्मृतावपि 'अग्निर्ज्योतिः' (गी- ८. २४) इत्यादौ देवतापरिग्रहेऽपि न कश्चिद्विरोधः ॥ २ ॥

[इति दक्षिणायनाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

चतुर्थाध्यायस्य

द्वितीयः पादः

चतुर्थाध्यायस्य

तृतीयः पादः

[१. अर्चिराद्यधिकरणम्]

१. अर्चिरादिना तत्प्रथितेः ४-३-१

*द्वितीयपादेनोत्क्रान्त्यादिकं निरूप्य इदानीं तृतीये सगुणब्रह्मविदो मृतस्योत्तरमार्गश्चिन्त्यते ॥

किं देवयानमार्गोऽनेकप्रकारः ? किं वा एक एवानेकविशेषणः ? इति संशये—'तेऽर्चिषमभिसंभवन्ति' (बृ ६-२-१५) इत्येकत्रार्चिरादिकस्य, 'स वायुमागच्छति' (बृ- ५. १०-१) इत्यन्यत्र वाय्वादिकस्येत्येवमाद्यनेकपरामर्शादनेकत्वप्राप्तौ—

सिद्धान्तः—अर्चिरादिनेति । सर्वो ब्रह्मलोकप्रेप्सुः अर्चिरादिनैवाध्वना रंहति । कुतः ? 'तत्प्रथितेः'—तस्य मार्गस्यानेकविशेषणयुक्तस्यैकस्यैव पञ्चाग्निविद्यावाक्यशेषे प्रथितेः—प्रसिद्धत्वादित्यर्थः । 'य इत्थं विदुर्ये चामी अरण्ये श्रद्धा तप इत्युपासते तेऽर्चिषमभिसंभवन्ति' (बृ.६-२-१५) इति श्रुत्यन्तरोक्तानां तु मार्गाणां गुणोपसंहारन्यायेनात्रैव योजयितुं शक्यत्वात् ॥ २ ॥

[इति अर्चिराद्यधिकरणम्]

———

* इत्थमुत्क्रान्तिं निरूप्य तत्साध्यमार्गं निरूपयितुं पादमारभ्यते । पूर्वं यदाकदाचिन्मृतस्यापि फलप्रसिद्धरुक्ता, तद्वत् येनकेन चिन्मार्गेण गतिरिति दृष्टान्तसंगत्येदमधिकरणमारभ्यते—स. शि. वृ.

[२. वाय्वधिकरणम्]

१. वायुमदब्दादविशेषविशेषाभ्याम् ४-३-२

*केन पुनः सन्निवेशविशेषेण गतिविशेषणानामन्वयः? इत्याकांक्षायां इदमधिकरणमारब्धम् ॥

एवं हि श्रूयते—'तेऽर्चिषमभिसंभवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान्षडुदङ्ङेतिमासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्याच्चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवस्स एनान् ब्रह्म गमयति' (कौ. १-३) (छा. ४-१५-५) इति शाखान्तरे मार्गपर्वत्वेन श्रुतस्य वायोरर्चिरादिपर्वणि केनापि सन्निवेशेनान्तर्भावोऽस्ति वा? न वा? इति संशये—अस्योपरि वायुरिति क्रमस्याश्रुतत्वात्, कल्पकाभावात् केनापि सन्निवेशेन नान्तर्भाव इति प्राप्ते—

अभिधीयते—वायुमदब्दादिति। 'संवत्सरादादित्यम्' इत्यत्र संवत्सरात् पराञ्चमादित्यादर्वाञ्चं च वायुमभिसंभवन्ति। कस्मात्? 'अविशेषविशेषाभ्याम्'—अविशेषोपदिष्टस्य वायोः श्रुत्यन्तरे विशेषदर्शनादित्यर्थः। 'स वायुमागच्छति तस्मै स तत्र विजिहीते यथा रथचक्रस्य खं तेन स ऊर्ध्वमाक्रमते स आदित्यमागच्छति' (बृ. ५-१० १) इति। अस्याः श्रुतेरयमर्थः—निर्गत्योपासको यदा वायुमागच्छति, तदा तद्वायुमण्डलं छिद्रितं भवति। तेन रथच्छिद्रप्रमाणेन वायुमण्डलमुल्लंघ्यादित्यमण्डलं प्राप्नोतीति। तस्मात् वायोरादित्यात्पूर्वत्वप्रतीतेः

---

* पूर्वं सर्वत्रार्चिराद्येकदेशप्रत्यभिज्ञानात् मार्गैक्यमित्युक्तम्। तद्वदग्न्यनन्तरं वायुपाठप्रत्यभिज्ञानात् तत्रैव वायुर्निवेशयितव्य इति दृष्टान्तसंगत्येदमाह—स.शि.वृ.

क्रमविशेषस्य निर्णेतुं शक्यत्वात् 'मासेभ्यः संवत्सरं संवत्सराद्वायुं वायोरादित्यम्' इत्येवं—सन्निवेशः कर्तव्यः ॥ १ ॥

[इति वाय्वधिकरणम्]

———

[३. [1]तडिदधिकरणम्]

१. तडितोऽधि वरुणः सम्बन्धात् ४–३–३

* 'स वरुणलोकं स इन्द्रलोकं स प्रजापतिलोकम्' इति कौषीतकीशाखापठितवरुणलोकादीनामर्चिरादिमार्गे सन्निवेशोऽस्ति? न वा? इति संशये—वायोरिव नियामकाभावात् नेति प्राप्ते—

सिद्धान्तः—तडिदोऽधीति । 'चन्द्रमसो विद्युतम्' (छा- ४-१५५) इत्यस्या विद्युत उपरिष्टात् 'स वरुणलोकम्' इति वरुणः—सम्बध्यते । कुतः? 'सम्बन्धात्'—विद्युत्पूर्वकवृष्टिगतजलस्य वरुणोऽधिपतिरिति विद्युद्वरुणयोस्संबन्धात् । इन्द्रप्रजापत्योस्तु स्थानान्तरासंभवेऽपि 'आगन्तूनामन्त निवेशः' इति न्यायात् वरुणलोकोपरि सम्बन्धः । तस्मादर्चिरादिमार्गो व्यवस्थापित इति सिद्धम् ॥ १ ॥

[इति तडिदधिकरणम्]

———

* पूर्वमग्न्यनन्तरं श्रुतस्य वायोः स्थानविशेषश्रवणात् अर्चिरादिमार्गपर्वत्वेन संबन्ध उक्तः । न तथा वरुणादीनां संबन्धः संभवति, स्थानविशेषाश्रवणादिति प्रत्युदाहरणसंगत्येदमाह—स शि. वृ.

१. अत्र सर्वत्र 'तडित्' इत्यस्य स्थाने 'तटित्' इत्यपि क्वचित्पाठः ।

[३· आतिवाहिकाधिकरण १]

१. आतिवाहिकास्तल्लिङ्गात् ४-३-४

* अर्चिरादयः किं मार्गचिह्नानि ? किं वा भोगस्थानानि ? उत नेतारः ? इति संशयः । 'ग्रामान्निर्गत्य नदीं व्रज । ततस्त्वमुं तरुम्' इत्यादाविव मार्गचिह्नभूता अर्चिरादयः ॥

अथवा तत्पूर्वब्रह्मलोकं गच्छतो विश्रमस्थानभोगभूमयः । वायुलोकवरुणलोकादिशब्दानां भोगभूमिवाचकत्वात् । तस्मात् न नेतार इति प्राप्ते—

सिद्धान्तः—आतिवाहिका इति । आतिवाहिकाः—नेतार एवैते अर्चिरादयो भवितुमर्हन्ति । कुतः ? 'तल्लिङ्गात्'—'स एनान् ब्रह्म गमयति' (छा. ४-१५-५) इत्यन्ते सिद्धवन्नेतृत्वावगमात् । उपसंहारे श्रूयमाणस्यामानवपुरुषस्य नेतृत्वावगमात् उपक्रमेऽपि नेतृत्वमर्चिरादिपुरुषाणां न्याय्यम्, उपक्रमे विशेषाश्रवणात् ॥ १ ॥

† ननु लिङ्गमात्रं न तेषां नेतृत्वगमकं, न्यायाभावादित्यत आह—

२. उभयव्यामोहात्तत्सिद्धेः ४-३-५

यद्यर्चिरादयोऽचेतनाः तर्हि मार्गतद्गन्त्रोः उभयोरपि व्यामोहात् अज्ञत्वादूर्ध्वगतिर्न स्यात् । अतः स्वयं प्रयत्नशून्यश्चेतनान्तरेण नेय इति लौकिकन्यायानुगृहीतात्लिङ्गात् तत्सिद्धेः—नेतृत्वसिद्धेरित्यर्थः ॥ ५ ॥

---

* पूर्वं यथा तडिद्वरुणसंबन्धात् तडिदनन्तरं वरुणस्य संबन्ध उक्तः, तद्वदिह लौकिकमार्गचिह्नसारूप्यसंबन्धात् अर्चिरादेः मार्गचिह्नोपदेश इति दृष्टान्तसंगत्येदमाह —स·शि·वृ.

† एतत्सूत्रस्य व्याख्याभागः मातृकायां न दृश्यते । रामानुजभाष्यमनुसृत्य न व्याख्यातं वा ? परन्तु, सूत्रभाष्ये दर्शनात्, सदाशिववृत्तः पूरितोयं भागः ॥

ननु अमानवपुरुषस्य नेतृत्वे वरुणादिषु तन्न संभवति, वरुणादीना-ममानवपुरुषत्वाभावादिति — तत्राह

२. वैद्युतेनैव ततस्तच्छ्रुतेः ४-३-६

ततः—विद्युदभिसंभवनादूर्ध्वं विद्युदनन्तरवर्तिनैव अमानवपुरुषेण वरुणलोकादिष्वतिवाह्य ब्रह्मलोकं गच्छन्तीत्यवगन्तव्यम् । 'तान् वैद्युतान् वै पुरुषोऽमानवस्स एत्य ब्रह्मलोकं गमयति ' इति तस्यैव गमयितृत्वश्रुतेः । वरुणादयस्तु तस्यैवानुग्राहका इति ॥ २ ॥

[इति आतिवाहिकाधिकरणम्]

[५. कार्याधिकरणम्]

१. कार्यं बादरिरस्य गत्युपपत्तेः ४-३-७

* 'स एनान् ब्रह्म गमयति ' (छा. ४-१५-५) इति गन्तव्यं ब्रह्म किं सोपाधिकं हिरण्यगर्भाख्यम् ? उत परमेव ब्रह्म ? इति संशये—सिद्धान्तेनोपक्रमते—कार्यं बादरिरिति ॥

कार्यमेव सगुणमपरमं ब्रह्म नयत्येतानमानवः पुरुष इति बादरिराचार्यो मन्यते । कुतः ? 'गत्युपपत्तेः '—अस्य हि कार्यब्रह्मणो गतिरुपपद्यते । गम्यत इति गतिः । गन्तव्यत्वं च प्रदेशवत्कार्यब्रह्मण्युपपद्यते, न तु परस्मिन् ब्रह्मणि, निष्प्रदेशत्वात् , सर्वगतत्वाच्च ॥ १ ॥

---

* इत्थं गन्तव्यप्राप्तिहेतुं मार्गं निरूप्य फलभूतं गन्तव्यं निरूपयतीति फलफलिभावसंगत्येदमाह—स. शि. वृ.

२. विशेषितत्वाच्च ४-३-८

'ब्रह्मलोकान् गमयति ते तेषु ब्रह्मलोकेषु पराः परावतो वसन्ति' (बृ. ६-२-१५) इति श्रुत्यन्तरे बहुत्वविशेषणं कार्यब्रह्मपक्षे घटते, अवस्था बहुत्वात्। न ह्येकस्मिन् परस्मिन् ब्रह्मणि बहुवचनं घटते ॥ २ ॥

ननु कार्ये परिच्छिन्नेऽपि ब्रह्मशब्दो नोपपद्यते, नेत्याह—

३. सामीप्यात्तु तद्व्यपदेशः ४-३-९

'तु'शब्दः शंकां निराकरोति। परब्रह्मसामीप्यादपरस्य ब्रह्मणः तस्मिन्नपि ब्रह्मशब्द उपपद्यते। अत एव परं ब्रह्म मनोमयत्वादिविशिष्ट मुपास्यत्वेनोपदिश्यते ॥ ३ ॥

ननु 'तयोर्ध्वमायन्नमृतत्वमेति' (क. २-६-१६ ज छा. ८-६-६) 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' (छा. ४-२५-६) इत्याद्यनावृत्त्यमृतत्वश्रवणं कथं घटते? इति—तत्राह—

४. कार्यात्यये तदध्यक्षेण सहातःपरमभिधानात् ४-३-२०

कार्यब्रह्मलोकप्रलयप्रत्युपस्थाने सति तत्रैवोत्पन्नसमदर्शनाः सन्तस्तद-ध्यक्षेण—हिरण्यगर्भेण सहातःपरं परिशुद्धं विष्णोः परमं पदं प्रतिपद्यन्ते। कुतः? 'अभिधानात्'—क्रममुक्त्यनावृत्त्याद्यभिधानादित्यर्थः ॥ ४ ॥

५. स्मृतेश्च ४-३-११

किञ्च स्मृतेरप्ययमर्थोऽवगम्यते—'ब्रह्मणा सह ते सर्वे संप्राप्ते प्रति-सञ्चरे। परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्' (कूर्मपु-पूर्व, १२७-२६९) इति ॥ ५ ॥

एवमुक्तसिद्धान्तपक्षव्यावर्त्यं पूर्वपक्षमाह—

६. परं जैमिनिर्मुख्यत्वात् ४-३-१२

जैमिनिस्त्वाचार्यः 'स एनान् ब्रह्म गमयति' (छा. ४-१५-६) इत्यत्र परमेव ब्रह्म प्रापयतीति मन्यते। कुतः? 'मुख्यत्वात्'—परमेव ब्रह्म ब्रह्मशब्दस्य मुख्यमालम्बनम्, न त्वपरं ब्रह्म ॥ ६ ॥

७. दर्शनाच्च ४-३-१३

किञ्च 'तयोर्ध्वमायन्नमृतत्वमेति' (क. १-३-६ & छा-८-६-६) इत्यमृतत्वदर्शनाच्च परमेव ब्रह्म त्र ब्रह्मशब्दवाच्यम् ॥ ७ ॥

८. न च कार्ये प्रत्यभिसन्धिः ४-३-१४

अपि च 'प्रजापतेः संभां वेश्म प्रपद्ये' (छा-८-१४-१) इति नायं कार्यब्रह्मविषयः प्र(ति?)त्यभिसन्धिः, 'नामरूपयोर्निर्वहिता ते यदन्तरा तद्ब्रह्म' (छा-८-१४-१) इति कार्यविलक्षणस्य ब्रह्मणः प्रकृतत्वात् ॥

तत्र गत्युपपत्त्यादय एव बादरिहेतवो जैमिनिहेतून् मुख्यत्वप्रभृतीन् आभासीकर्तुं प्रभवन्तीति सिद्धान्तव्याख्यानसमय एवोक्तम्। न ह्यसत्यपि संभवे मुख्यस्यैव ग्रहणमिति कश्चिदाज्ञापयिताऽस्ति। 'प्रजापतेः सभां वेश्म प्रपद्ये' इति पूर्ववाक्यविच्छेदेन कार्येऽपि प्रत्यभिसन्धिर्न विरुध्यते। तस्मात् कार्यमेव ब्रह्मात्र गन्तव्यत्वेनोक्तम् ॥ ८ ॥

[इति कार्याधिकरणम्]

[६. अप्रतीकालम्बनाधिकरणम्]

१. अप्रतीकालम्बनान्नयतीति बादरायण उभयथाऽ
दोषात्तत्क्रतुश्च ४-४-१५

* किं प्रतीकोपासकानपि इतरविकारालम्बनोपासकानिवामानवपुरुषो ब्रह्म लोकं नयति ? किं वा न ? इति संशये—ब्रह्मोपासकवत् प्रतीकोपासकानपि अमानवपुरुषः सत्यलोकं प्रापयति, अविशेषश्रवणात्—इति प्राप्ते—

प्रत्याह—अप्रतीकेति। प्रतीकालम्बनान् वर्जयित्वा सर्वानन्यान् विकारालम्बनान् नयति ब्रह्मलोकमिति बादरायण आचार्यो मन्यते। न ह्येवमुभयथाऽभ्युपगमे कश्चिद्दोषोऽस्ति। अविशेषश्रवणं तु प्रतीकव्यतिरिक्तोपासनेषु भविष्यति। 'तत्क्रतुश्च' अस्योभयथाभावस्य समर्थको हेतुर्द्रष्टव्यः ब्रह्मक्रतुर्ब्रह्मैश्वर्यमनुभवति—'तं यथा यथोपासते तदेव भवति' इति श्रुतेः। विकारप्रधानत्वात् प्रतीकेषु न ब्रह्मक्रतुत्वमस्ति। तस्मान्न ब्रह्मेति ॥ १ ॥

प्रतीकोपासितुः शब्दशास्त्रादिलक्षणे नामविषये स्वातन्त्र्यं भवति 'यावन्नाम्नो गतं तत्रास्य कामचारो भवति' (छा. ७-१-५) इति श्रुतेरित्याह—

---

* इत्थं अर्चिरादिगन्तव्यं निरूप्य गन्तॄणां बुद्धिस्थत्वात् बुद्धिस्थत्वसंगत्या तान्निरूपयितुमिदमाह—स. शि. वृ.

२. विशेषं च दर्शयति ४–४–१६

नामादिषु प्रतीकोपासनेषु श्रुतिर्विशेषं दर्शयति ।। २ ।।

[इति अप्रतीकालम्बनाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

चतुर्थाध्यायस्य

तृतीयः पादः

———

चतुर्थाध्यायस्य

चतुर्थः पादः

[१. संपद्याविर्भावाधिकरणम्]

१. संपद्याविर्भावः स्वेनशब्दात् ४-४-१

* इदानीं चतुर्थपादे पूर्वभागेन निर्गुणब्रह्मविदो विदेहकैवल्यमुच्यते । उत्तरभागेन सगुणब्रह्मविदो ब्रह्मलोकसंस्थितिः ।।

'य एष संप्रसादोऽस्माच्छरीरात्समुत्थाय परं ज्योतिरूपसंपद्य स्वेन रूपेणाभिनिष्पद्यते' (छा-८-१२-३) इति श्रूयते । अस्याः श्रुतेरयमर्थः— सम्यक् प्रसीदति उपाध्युपरताविति संप्रसादो जीवः । स च शरीरत्रयाभिमानं परित्यज्य परं ब्रह्म प्राप्य मुक्तरूपेणावतिष्ठत इति ।।

तत्र किं स्वर्गादिवदभिनवं मुक्तरूपम्? उत पुरातनमेवाभिव्यज्यते? इति संशये—अभिनिष्पत्तिवचनात् फलत्वाच्च नूतनत्वप्राप्तौ—

आह—संपद्येति । परं ज्योतिः परं ब्रह्मोपसंपद्य स्वेन केवलेनैवात्मनाऽऽविर्भावो भवति । कुतः? 'शब्दात्'—स्वेन रूपेणाभिनिष्पद्यत इति स्वशब्दात् इत्यर्थः । न च स्वशब्दः स्वकार्यमभिधत्ते, विशेषणवैयर्थ्यप्रसङ्गात् । यद्रूपं मुक्तावभवत्, तत् स्वकीयमेवेति कस्य व्यावृत्तये विशेषणं स्यात्? आत्मवाचित्वे तु स्वशब्दस्य स्वकीयत्वव्यावृत्तिः प्रयोजनं च अभिनिष्पत्तिः उत्पत्तिः, नित्यस्योत्पत्त्यसंभवात् किं तर्हि? तज्ज्ञाने ब्रह्मत्वाविर्भावो निष्पत्तिः ।।

---

* इत्थं पूर्वस्मिन् पादे सगुणब्रह्मोपासकानां कार्यब्रह्मप्राप्तिः कथिता । अधुना निर्गुणब्रह्मविदां तद्भावमभिधातुमयं पाद आरभ्यते ।—स० शि० वृ०

ननु स्वरूपानपायस्य, संसारमोक्षावस्थयाः समत्वात् को विशेषः ? तत्राह—

२. मुक्तः प्रतिज्ञानात् ४-४-२

अविद्याकल्पितसम्बन्धान्मुक्तः तत्राभिनिष्पद्यत इत्युच्यते शुद्धेनैवात्मनाऽवस्थानात् कथमिदनीं मुक्त इत्युच्यते? तत्राह—'प्रतिज्ञानात्' इति। 'एव त्वेव ते भूयोऽनुव्याख्यास्यामि' (छा. ८-९-३, ८. १०-४-८. ११-३) इति प्रतिज्ञाय, 'अशरीरं वा व सन्तं न प्रियाप्रिये स्पृशतः' (छा. ८-१२-१) इति चोपन्यस्य, 'स्वेन रूपेणाभिनिष्पद्यते स उत्तमः पुरुषः' (छा. ८-१२-३) इत्युपसंहारात् ॥ २ ॥

३. आत्मा प्रकरणात् ४-४-३

न च 'परं ज्योतिरुपसंपद्य' (छा. ८ १२-३) इति भौतिकं ज्योतिरुच्यते, येनात्मनो मुक्तिशङ्का स्यात्; किन्तु आत्मैव। कुतः? प्रकरणात्। 'य आत्माऽपहतपाप्मा' (छा. ८-७-१) इति प्रकृतत्वादित्यर्थः। 'ज्योतिर्दर्शनात्' (ब्र. सू १ १-) इत्यत्र ब्रह्मवाचकत्वं ज्योतिश्शब्दस्योक्तम्। न चात्मरूपमोक्षस्य पूर्वसिद्धत्वेन फलत्वाभावः, निवृत्ताज्ञानत्वाकारेण पूर्वसिद्धत्वाभावात्। तस्मात् पुरातनवस्त्वेव मुक्तिरूपमिति सिद्धम् ॥ ३ ॥

[इति संपद्याविर्भावाधिकरणम्]

———

[२. अविभागेन दृष्टत्वाधिकरणम्]

१. अविभागेन दृष्टत्वात् ४ ४–४

* पूर्वाधिकरणोक्तं मुक्तस्वरूपं परस्मात् ब्रह्मणो भिन्नम्? अभिन्नम् वा?—इति संशये,—'परं ज्योतिरुपसंपद्य' (छा. ८-१२-३) इति जीवब्रह्मणोः कर्मकर्तृभावव्यपदेशात् मुक्तस्वरूपं भिन्नमिति प्राप्ते—

अभिधीयते—अविभक्त एव परेणात्मना मुक्तोऽवतिष्ठते। कुतः? 'दृष्टत्वात्'—'तत्त्वमसि' (छा. ६-८-७) 'अहं ब्रह्मास्मि' (बृ. १-४-१०) 'यत्र नान्यत्पश्यति' (छा. ७-२४-१) इत्यदौ जीवब्रह्मणोरैक्यस्य दृष्टत्वादित्यर्थः। 'स भगवः कस्मिन् प्रतिष्ठितः स्वे महिम्नि' (छा. ७-२४-१) इतिवत्। भेदनिर्देशस्तु अविद्यासिद्धभेदापेक्षया। तस्मादभिन्नं मुक्तस्वरूपं परब्रह्मण इति सिद्धम्॥ १॥

[इति अविभागेन दृष्टत्वाधिकरणम्]

——o——

[३. ब्राह्माधिकरणम्]

१. ब्राह्मेण जैमिनिरुपन्यासादिभ्यः ४–४–५

† 'स्वेन रूपेण' इत्यागन्तुकरूपनिषेधे, तद्विशेषबुभुत्सायामाह—ब्राह्मेणेति। स्वमस्य रूपं अपहतपाप्मत्वादि सत्यसंकल्पत्वावसानम्।

---

* यथोक्तमेतदुपजीव्यान्यत्किञ्चिद्विचार्यत इत्युपजीव्योपजीवकभावसंगत्येदमाह—स. शि. वृ

† यथोदीरितं ब्रह्माभिन्नं मुक्तमुपजीव्य किञ्चिद्विचार्यत इति उपजीव्योपजीवकभावसंगत्येदमाह—स. शि. वृ.

तथा सर्वज्ञत्वं सर्वेश्वरत्वं च। तेन ब्राह्मेण रूपेणाभिनिष्पद्यत इति जैमिनिराचार्यो मन्यते। कुतः? 'उपन्यासादिभ्यः'— सत्यकामत्वादिनैवात्मत्वोपन्यासात्। तथा 'स तत्र पर्येति जक्षन् क्रीडन् रममाणः' (छा. ८-१२-३) इत्यादिनैश्वर्यप्रदर्शनाच्च। तस्मादपहतपाप्मत्वादि भावरूपं स्वाभाविकं परमेश्वरगतं मुक्तः संपद्यते ॥ १ ॥

२. चिति तन्मात्रेण तदात्मकत्वादित्यौडुलोमिः ४-४-६

निरस्ताशेषप्रपञ्चत्वेनाव्यपदेश्ये ब्रह्मणि स्वरूपे चैतन्यमात्रात्मनाऽभिनिष्पद्यमाने तदात्मकत्वात्— मुक्तात्मकत्वात्— अपहतपाप्मत्वसत्यकामत्वादिभिः प्रयोजनाभावात् ते शब्दमात्रविकल्पजा इत्यौडुलोमिराचार्यो मन्यते। 'एवं वा अरेऽयमात्माऽनन्तरोऽबाह्यः कृत्स्नः प्रज्ञानघन एव' (बृ- ४-५-१३) इत्यादिश्रुतौ ब्रह्मणो निष्प्रपञ्चत्वं सिद्धम्। 'न स्थानतोऽपि परस्योभयलिङ्गं सर्वत्र हि' (ब्र. सू. ३-२-११) इति सूत्रकारेणापि निष्प्रपञ्चत्वमुक्तम्। तस्मान्न ब्रह्मणो विरुद्धो भावाभावद्वययोगः। यतः सत्यकामत्वादयः शब्दविकल्पजाः। अत एवानाद्यविद्याकल्पिताः सांव्यवहारिकाः ॥ २ ॥

अत्राह सिद्धान्ती—

३. एवमप्युपन्यासात्पूर्वभावादविरोधं बादरायणः ४-४-७

'एवमपि'— पारमार्थिकचैतन्यस्वरूपाभ्युपगमेऽपि,— व्यवहारापेक्षया उपन्यासादिभ्योऽवगतस्य पूर्वस्य ब्राह्मैश्वर्यरूपस्य भावात्— अप्रत्याख्यानात् अविरोधं बादरायण आचार्यो मन्यते ॥

एतदुक्तं भवति—यद्यपि सत्यकामत्वापहतपाप्मत्वादयः सत्यविकल्पजाः उपाधिसम्बन्धाधीनाः, तथापि व्यावहारिकप्रमाणोपनीततया

लोकसिद्धत्वात् अनिर्वाच्यत्वात् ब्रह्मात्मैकत्वज्ञानान्निवर्तन्त इति सिद्धम् ॥ ३ ॥

[इति ब्रह्माधिकरणम्]

[४. संकल्पाधिकरणम्]

१. संकल्पादेव तच्छ्रुतेः ४-४-८

* एवं त्रिभिरधिकरणैः विदेहकैवल्यं निरूप्य, सगुणब्रह्मविदुषां ब्रह्मलोकगमनमोक्षनिरूपणाय परो ग्रन्थः ॥

अर्चिरादिमार्गेण ब्रह्मलोकं गताना भोग्यसृष्टौ किं बाह्यकारणापेक्षोऽस्ति ? उत संकल्पादेव भोग्यसृष्टिः ? इति संशये—लोकवन्निमित्तान्तरापेक्षाप्राप्तौ—

सिद्धान्त :—संकल्पादेव तु बाह्यसाधननिरपेक्षात् पित्रादिसमुत्थानमिति । कुतः ? 'तच्छ्रुतेः'—'संकल्पादेवास्य पितरः समुत्तिष्ठन्ति' (छा. ८-२-१) इति श्रुतेरित्यर्थः। बाह्यसाधनापेक्षायामियं श्रुतिर्बाधिता स्यात्। निमि†त्तान्तरापेक्षायां हि प्राकृतसंपत्तेः वन्ध्यसंकल्पत्वप्रसङ्गः इत्यर्थः ॥ १ ॥

किञ्च—

२. अत एव चानन्याधिपतिः ४-४-९

अत एव—सत्यसंकल्पत्वादेव विद्वाननन्याधिपतिर्भवति । यदि विदुषः कश्चिदधिपतिः स्यात्, तर्हि तदधीनभोगस्य संकल्पमात्रसाध्यत्वा-

---

* पूर्वत्र ब्रह्मणि विशेषासंभवादविशेषप्रवृत्तावपि सविशेषश्रुतिरौपाधिकविषयेति व्यवस्थापिता । न तथेहाविशेषप्रवृत्तमनुमानमयोगिविषये व्यवस्थापनीयम्, योगिन्यपि संकल्पातिरिक्त साधनसंभवादिति प्रत्युदाहरणसंगत्येदमाह—स· शि· वृ.

† एतदारभ्य 339 पुट पर्यन्तं मातृकाया लोपात् सदाशिववृत्तिः संयोजिता ॥

भावात् सत्यसंकल्पत्वं न स्यात् । तस्मात् ब्रह्मात्मकस्य विदुषः संकल्पादेव सर्वैश्वर्यप्राप्तिरिति सिद्धम् ।। २ ।।

[इति संकल्पाधिकरणम्]

[५. अभावाधिकरणम्]

पूर्वाधिकरणदृष्टान्तसंगत्येदमाह—

१. अभावं बादरिराह ह्येवम् ४-४-१०

अत्र पूर्वपक्षे विशेषणश्रुतेः अनेकधाभावश्रुतेर्वा मुख्यार्थत्वसिद्धिः । सिद्धान्ते द्वयोरपि श्रुत्योः विदुषः सत्यसंकल्पत्वादेव मुख्यार्थत्वसिद्धिरिति फलभेदः ।।

'संकल्पादेव' इति श्रुत्या विदुषस्तावत् मनोऽस्तीत्यवगतम् । किं तस्य शरीरेन्द्रियाणि न सन्ति? उत सन्ति? आहोस्वित् सन्ति न सन्ति च? इति संशये—यथा 'संकल्पादेव' इत्यवधारणश्रुत्या साधनान्तराभाव उक्तः, एवं बादरिराचार्यः शरीरेन्द्रियाणामभावं मन्यते । आह ह्येवमभावमाम्नायः 'मनसैतान् कामान् पश्यन् रमते य एते ब्रह्मलोके' (छा. ८-१२-५) इति । यदि विदुषः शरीरादिकं स्यात्, तदा 'मनसा' इति विशेषणमन्ययोगव्यवच्छेदकं अनर्थकं स्यादित्येकः पूर्वपक्षः ।। १ ।।

२. भावं जैमिनिर्विकल्पामननात् ४-४-११

शरीरेन्द्रियाणां मनस इव भावं—सद्भावं जैमिनिराचार्यो मन्यते, 'स एकधा भवति त्रिधा भवति' (छा. ७-२६-२) इत्यादिना विदुषः अनेक-

धाभावविकल्पामननात् । न हि शरीरभेदं विना कदाचिदेकधाभावः, कदाचिदनेकधाभावः संभवतीत्यपरः पूर्वपक्षः ।। २ ।।

सिद्धान्तस्तु—

३. द्वादशाहवदुभयविधं बादरायणोऽतः ४-४-१२

अत एव—'मनसा' इति विशेषणात् अनेकधाभावविकल्पामननाच्च एवं लिङ्गद्वयात्, यदा शरीरादिसंकल्पः तदा शरीरेन्द्रियवत्त्वं, यदा तु तत्संकल्पाभावः तदा शरीरेन्द्रियवत्त्वाभाव इत्युभयविधं विदुष ऐश्वर्यं बादरायण आचार्यो मन्यते । द्वादशाहवत्—यथा 'द्वादशाहमृद्धिकामा उपेयुः' इति उपैतिचोदनागम्यत्वात् द्वादशाहस्य सत्रत्वं, 'द्वादशाहेन प्रजाकामं याजयेत्' इत्यहर्गणत्वे सति यजतिचोदनागम्यत्वात् अहीनत्वं चेत्युभयविधत्वं तद्वदित्यर्थः ।। ३ ।।

ननु विदुषः शरीराद्यभावे कथं भोगः ? तत्राह—

४. तन्वभावे सन्ध्यवदुपपत्तेः ४-४-१३

तनोः—सेन्द्रियस्य शरीरस्य अभावकाले सन्ध्यवत्—यथा स्वप्ने मानसिकविषयभोगः जाग्रद्विलक्षणः, तद्वद्भोगः । कुतः ? 'मनसैतान् कामान् पश्यन् रमते' (छा. ८-१२-५) इति श्रुतेः । एवमेवोपपत्तेरित्यर्थः ।। ४ ।।

ननु देहाद्यभावेऽपि भोगश्चेत् शरीरादिसत्त्वाङ्गीकारो व्यर्थः स्यात्—अत आह—

५. भावे जाग्रद्वत् ४-४-१४

देहादिभावकाले यथा जाग्रद्भोगः स्वप्नभोगविलक्षणो भवति, तद्वदित्यर्थः ।। ५ ।।

[इति अभावाधिकरणम्]

[६. प्रदीपाधिकरणम्]

ननु विकल्पामननलिङ्गेन विदुषोऽनेकशरीराणि सन्तीत्यभाणि । तत् व्यर्थम्, निरात्मकेषु तेषु भोगायोगादित्याक्षेपसंगत्येदमाह—

१. प्रदीपवदावेशस्तथा हि दर्शयति ४-४-१५

अत्र पूर्वपक्षे एकस्मिन्नेव देहे भोगः सिद्धान्ते सर्वेष्विति फलभेदः ।।

तत्र किं विदुषा सृज्यमानानि शरीराणि दारुयन्त्रवन्निरात्मकानि ? उतास्मदादिशरीरवत् सात्मकानि ? इति सन्देहे—निरात्मकानीति पूर्वः पक्षः—

सिद्धान्तस्तु—विदुषा सृज्यमानेष्वनेकेषु शरीरेषु विदुष आवेशः—अभिव्यक्तिः विद्यासामर्थ्यादुपपद्यते । 'प्रदीपवत्'—यथा प्रदीपः एकोऽनेकवर्तिषु प्रविशति तद्वद्विद्वान् अनेकान्तःकरणद्वारा देहेषु प्रविशति । तथा हि दर्शयति श्रुतिः—'स एकधा भवति' (छा. ७-२६-२) इत्यादिका । तस्मात् सर्वाणि शरीराणि सात्मकान्येवेति सिद्धम् ।। १ ।।

ननु विदुषः न शरीरवत्त्वं युक्तम् —'तत् केन कं पश्येत्' (बृ. ४-५-१५) इति, 'ततोऽन्यद्विभक्तं यत्पश्येत्' (बृ. ४-३-३०) इति च विशेषज्ञानाभावश्रवणात् इत्यत आह —

२. स्वाप्ययसंपत्त्योरन्यतरापेक्षमाविष्कृतं हि ४-४-१६

स्वाप्ययसंपत्त्योः—सुषुप्तिपरममुक्त्योः अन्यतरापेक्षमिदं विशेषज्ञानाभावश्रवणम् । हि—यतः प्रकरणादेवमाविष्कृतम् । सुषुप्तिप्रकरणापेक्षया 'ततोऽन्यत्' इत्यादि श्रुतम्, परममुक्तिप्रकरणापेक्षया 'तत्केन' इत्यादि श्रुतम्, तस्मान्नेदं सगुणब्रह्मविदः शरीराङ्गीकारे बाधकमिति ।। २ ।।

[इति प्रदीपाधिकरणम्]

[७. जगद्व्यापाराधिकरणम्]

पूर्वं संकल्पमात्रेण देहादिसर्गे विदुष उत्सर्गतः सर्वैश्वर्यमुक्तम् । तस्येह जगदुत्पत्त्यादावपवादः क्रियत इत्युत्सर्गापवाद संगत्येदमाह—

१. जगद्व्यापारवर्जं प्रकरणादसन्निहितत्वाच्च ४-४-१७

अत्र पूर्वपक्षे ईश्वरनानात्वं, सिद्धान्ते तदेकत्वमिति फलभेदः ।।

तत्र किं विदुष ऐश्वर्यं ईश्वरस्येव निरङ्कुशम्? उत सातिशयम्? इति विशये निरङ्कुशमिति पूर्वः पक्षः—

सिद्धान्तस्तु—जगदुत्पत्त्यादिव्यापारवर्जं सातिशयमैश्वर्यम्, जगद्व्यापारस्तु परमेश्वरस्यैव, सृष्टिवाक्येषु सर्वत्र तस्यैव प्रकरणात्—प्रकृतत्वा]* दित्यर्थः। इतरेषां योगिनां सगुणोपासनया ब्रह्मलोकं गतानां तदनुग्रहप्राप्तैश्वर्याणां आदिमदैश्वर्यवत्त्वेन जगद्व्यापारे असन्निहितत्वाच्च। अन्यथा अनेकेश्वरत्वे सति कश्चित् सृजति, कश्चित् संजिहीर्षतीति जगद्व्यवस्थैव न सिद्ध्येत् ॥ १ ॥

'आप्नोति स्वाराज्यम्' (तै. शि. ६-२) इत्यादिप्रत्यक्षोपदेशात् निरवग्रहं तेषामैश्वर्यमिति पक्षमनूद्य दूषयति—

२. प्रत्यक्षोपदेशादिति चेन्नाधिकारिकमण्डलस्थोक्तेः ४-४-१८

प्रत्यक्षोपदेशात् निरवग्रहमेषामैश्वर्यमिति चेत्—न—कुतः? यतः आधिकारिको यः सवितृमण्डलादिषु विशेषायतनेष्ववस्थितः पर ईश्वरः तदायत्तैवेयं स्वाराज्यप्राप्तिरुच्यते। स्वाराज्यश्रुतिरीश्वराधीनस्वाराज्यप्रतिपादनपरेत्यर्थः। ईश्वरो ह्युपासनया तोषितः तदुपभोगमात्रसिद्धये स्वाराज्यमुपासकेभ्यः प्रयच्छति, न जगत्सृष्ट्यादिस्वातन्त्र्यम्। ततश्च 'आप्नोति स्वाराज्यम्' इत्यस्य, यः सर्वमनसां पतिः पूर्वसिद्ध ईश्वरः, तं प्राप्नोतीत्यर्थः। तदनुसारेणैवानन्तरं 'वाक्पतिश्चक्षुष्पतिः। श्रोत्रपतिर्विज्ञानपतिः' (तै. शि. ६-२) इत्याह। एवमन्यत्रापि नित्यसिद्धेश्वरायत्तं तेषामैश्वर्यमिति द्रष्टव्यम् ॥ २ ॥

३. विकारावर्ति च तथा हि स्थितिमाह ४-४-१९

किञ्च सवितृमण्डलाद्यधिष्ठानं यत् पारमेश्वररूपं, तत् विकारावर्ति—किञ्चिद्विकारगोचरम्। तथा ह्यस्य द्विरूपां स्थितिमाहाम्नायः 'तावानस्य

* 334 पुटादेतत्पर्यन्तं मातृकाया लोपात् सदाशिववृत्तिः पूरिता ॥

महिमा ततो ज्यायांश्च पूरुषः' (छा. ३-१२-६) इति। तत्र 'तावानस्य महिमा' इति विकारावर्ति रूपमुक्तम्। 'ततो ज्यायांश्च' इति निर्विकाररूपमुक्तम्। 'पादोऽस्य विश्वा भूतानि' (पु. सू.) इति विकारावर्तिरूपमुक्तम्। 'त्रिपादस्यामृतं दिवि' (छा. ३-१२-६) इति निर्विकारं रूपमुक्तम्। तत्र यथा सविकारगुणालम्बना निर्विकारं रूपं न प्राप्नुवन्ति, तथैव निरतिशयमैश्वर्यमपि न प्राप्नुवन्ति, परतन्त्रत्वादित्यर्थः॥ ३॥

४. दर्शयतश्चैवं प्रत्यक्षानुमाने ४-४-२०

दर्शयतश्च विकारावर्तित्वं परस्य ज्योतिषः श्रुतिस्मृती—'न तत्र सूर्यो भाति न चन्द्रतारकं नेमा विद्युतो भान्ति कुतोऽयमग्निः' (क. २-९-१५) इति श्रुतिः। 'न तद्भासयते सूर्यो न शशाङ्को न पावकः' (गी. १५-६) इति स्मृतिः। तदेवं विकारावर्तित्वं परस्य ज्योतिष प्रसिद्धमित्यर्थः॥ ४॥

५. भोगमात्रसाम्यलिङ्गाच्च ४-४-२१

अनेन भोगमात्रमेषामितरेण समानमित्युच्यते। भोगमात्रेण साम्यं—भोगमात्रसाम्यम्, तत्र लिङ्गं – भोगमात्रसाम्यलिङ्गं, तस्मात्—इति विग्रहः। 'स यथैतां देवतां सर्वाणि भूतान्यवन्ति, एवं हैवंविदं सर्वाणि भूतान्यवन्ति' (बृ. १-५-२३) इति भोगसाम्यलिङ्गम्। यथा एतां देवतां—परदेवतां सर्वाणि भूतानि—प्राणिनः अवन्ति —प्रीणयन्ति—भोजयन्ति, एवं एवंविदं—सगुणब्रह्मस्वरूपवेदिनं सर्वाणि भूतानि परमेश्वरप्रेरणया भोजयन्तीति श्रुत्यर्थः॥ ५॥

ननु तर्हि सातिशयत्वात् अन्तवदैश्वर्यं स्यात् *—नेत्याह—

६. अनावृत्तिःशब्दादनावृत्तिःशब्दात् ४-४-२२

ब्रह्मलोकं गतानां सातिशयैश्वर्याणामपि पुनरावृत्तिर्नास्ति । कुतः ? 'शब्दात्'—'तयोर्ध्वमायन्नमृतत्वमेति' (क. २-६-१६, छा. ८-६-६) 'एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते' (छा. ४-१५-६) इत्यादिशब्दप्रामाण्यादित्यर्थः । ब्रह्मणा सह तेषामपि सगुणब्रह्मविदुषां तत्समीपं प्राप्तानां महाप्रलये ब्रह्मात्मैकत्वज्ञानात् क्रममुक्तिशास्त्रसिद्धात् अमृतत्वेनानावृत्तेः 'कार्यात्यये तदध्यक्षेण सहातः परम्' (ब्र. सू. ४-३.१०) इत्यत्रोपपादितत्वाच्च । 'अनावृत्तिः शब्दादनावृत्तिः शब्दात्' इति सूत्राभ्यासः शास्त्रसमाप्तिं द्योतयति ॥ ६ ॥

[इति जगद्व्यापारवर्जाधिकरणम्]

इति श्री राजाधिराजराजपरमेश्वरगजमृगयाधिराज

श्री वीरप्रतापप्रौढदेवमहाराजकृतौ

पम्पायां

ब्रह्मसूत्रवृत्तौ

चतुर्थाध्यायस्य

चतुर्थः पादः

---

* एवञ्च विदुषामावृत्तिः प्रसज्येत—इति शेषः]॥

ब्रह्मसूत्राणामकाराद्यनुक्रमणिका

अधिकारणनामकराद्यनुक्रमणिका

॥ प्रमाणानामकारद्यनुक्रमणिका ॥

ब्रह्मसूत्रागतमहर्षीणां नामानुक्रमणिका

Printed at :

Bhaskara Printers, Behind Central Police Station, Mysore-570001